# मणिका

संस्कृत-अभ्यास-पुस्तकम्

**द्वितीयो भागः**

दशमश्रेण्यै





केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

आत्मीयच्छात्राः !

यदि कश्चित्/काचिद् भवन्तं भवतीं वा अनुचितरूपेण स्पृशति, सः च स्पर्शः भवत्कृते असहजः अस्वाभाविकः वा स्यात् तर्हि मौनं मा तिष्ठतु।

1. भवान् /भवती अहमेव 'दोषी/दोषिणी' इति मा चिन्तयतु।
2. यस्मिन्/यस्यां भवान् /भवती विश्वसिति, तं/तां सर्वं वृत्तं सूचयतु।
3. भवान्/भवती **पॉक्सो ई बॉक्स** माध्यमेन राष्ट्रिय-बालाधिकार-संरक्षणायोगमपि सूचयितुमर्हति।

**यदा भवन्तं भवतीं वा कश्चित्/काचित् अनुचितरूपेण स्पृशति तदा भवान्/भवती असहजम् अनुभवितुं शक्नोति। दुविधाग्रस्तः/दुविधाग्रस्ता भवान्/भवती असहायः/असहाया अहमिति अनुभवितुं शक्नोति परं तथा चिन्तयितुम् आवश्यकता नास्ति। यतः भवतः/भवत्याः कश्चित् दोषः नास्ति।**



POSCO ई.बॉक्स NCPCR

**एतं पिञ्जं नुदतु।**

**पॉक्सो ई.बॉक्स NCPCR@gov.in इत्यत्र उपलभ्यते।**

नवसमाजं प्रति
Towards a new dawn

**यदि भवतः/भवत्याः आयुः अष्टादशवर्षेभ्यः न्यूनम् अस्ति, भवान्/भवती कस्याञ्चिद् विपदि अस्ति अथवा दुविधाग्रस्तः/दुविधाग्रस्ता अस्ति। भवता भवत्या वा साकं कश्चन दुर्व्यवहारः घटितः, भवान्/भवती कस्मिंश्चित् सङ्कटे अस्ति अथवा कञ्चिद् एतादृशं बालकं काञ्चिद् एतादृशीं बालिकां वा जानाति तदा....**

**1098 इत्यस्यां सङ्ख्यायां दूरवाणीं करोतु यतः केचन उत्तमाङ्काः जीवनं परिवर्तयन्ति।**




**बाल-सहायिका सङ्ख्या 1098 विपद्ग्रस्तेभ्यः बालेभ्यः अहर्निशं निःशुल्का राष्ट्रिया आपत्कालीना दूरवाणी-सेवा, महिला एवं बाल-विकास-मन्त्रालयस्य सहयोगेन चाइल्ड इंडिया फाउण्डेशन इति संस्थायाः प्रयासः अस्ति।**

नवसमाजं प्रति
Towards a new dawn

स्वच्छम् भारतम्
एकं पदं स्वच्छतां प्रति

# मणिका

## संस्कृत-अभ्यास-पुस्तकम्

### द्वितीयो भागः

### दशमश्रेण्यै





केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्




**प्रथमं संस्करणम्** : फरवरी 2007

**द्वितीयं संशोधितं संस्करणम्** : जून 2025



© CBSE



**प्रकाशकः** : निदेशकः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्
एकीकृत-कार्यालय-परिसरः, सैक्टर-23, फेस-1,
द्वारका, नई दिल्ली-110077



This book or part thereof may not be reproduced by any person or agency in any manner.



**मुद्रकः आवरण-सज्जा च** : **लक्ष्मी प्रिंट इंडिया**
556, जी.टी. रोड, शाहदरा, दिल्ली-110032

# पुरोवाक्
## ( द्वितीयं संशोधितं मुद्रितं संस्करणम् 2025 )

भारतस्य द्वे प्रतिष्ठे वर्तेते संस्कृतं संस्कृतिश्चेति। संस्कृतस्य महत्त्वं सुविदितमेव। संस्कृतिश्च जीवनस्य श्रेयो मार्गः। कस्याः अपि भाषायाः शिक्षणे श्रवणं, भाषणं, पठनं लेखनञ्च इत्येतेषु चतुर्षु कौशलेषु नैपुण्यम् अपेक्षितमेव भवति। परन्तु बहुभ्यः वर्षेभ्यः अथकप्रयत्नानन्तरम् अधुनापि विद्यालयेषु संस्कृतभाषायाः अध्यापनं यथा भवितव्यं तथा न जायमानं वर्तते। प्रायः सर्वत्रापि अनुवादमाध्यमेन अध्यापनं क्रियते। येन द्वादशकक्षामपि उत्तीर्णाः छात्राः न केवलं भाषणे, वाचने अपि तु स्वतन्त्रतया लेखनेऽपि काठिन्यमनुभवन्ति उत वा असमर्थाः भवन्ति। अत एव राष्ट्रियशिक्षानीतिः 2020 इत्यत्रापि विशेषेण भारतीयभाषाणां संस्कृतीनाञ्च संवर्धनाय बलं प्रदत्तं विद्यते।

एतदनुभूय एव विद्यालयेषु संस्कृतस्य शिक्षणार्थम् उपयुक्तपाठ्यपुस्तकाभ्यासपुस्तकयोः श्रव्यदृश्योपकरणानां च निर्माणे केन्द्रीयमाध्यमिकशिक्षासङ्घटनस्य शैक्षणिकविभागः निरन्तरमेव प्रयत्नशीलः विद्यते। एतदुद्दिश्य एव संस्कृतशिक्षणे सम्प्रेषणोपागममधिकृत्य अनेन सङ्घटनेन माध्यमिक-उच्चमाध्यमिककक्षाभ्यः चतुर्वर्षीयनवीनसंस्कृतपाठ्यक्रमस्य तदनुकूलपाठानां पुस्तकानां च विकासाय एका नवीना प्रायोजना उपस्थापिता। अस्यां प्रायोजनायाम् अभ्यासपुस्तकसहितं '**मणिका-द्वितीयो भागः**' इति नाम पाठ्यपुस्तकं द्वितीयपुष्परूपेण विकसितम्। नवीन-सामग्रीणां माध्यमेन विद्यार्थिनः संस्कृतभाषायां लेखनेन सह संस्कृतभाषणे अपि नैपुण्यं प्राप्स्यन्ति इति वर्तते पावनं लक्ष्यम्। संस्कृतस्य भाषिकतत्त्वानि अधिकृत्य व्याकरणस्य प्रायोगिकाभ्यासार्थम् इदम् अभ्यासपुस्तकं वर्तते। अस्य पुनः पुनः अभ्यासमाध्यमेन विद्यार्थिनः संस्कृतभाषायाः संरचनात्मकस्वरूपं ज्ञात्वा अस्याः व्यावहारिकरूपेण प्रयोगं कर्तुं समर्थाः भविष्यन्ति इति विश्वसिमि।

अस्यां मणिका-अभ्यासपुस्तकस्य सम्पादन-परियोजनायां यैः अभ्याससामग्रीनिर्माणसमिति-सदस्यैः अनवरतं परिश्रमः कृतः, ते नूनं साधुवादानर्हन्ति। पुनरपि एम. एल. खन्ना डी.ए.वी. पब्लिकविद्यालयः, द्वारका, नवदेहली इत्यस्य संस्कृतशिक्षकः श्रीअशोककुमारः, हंसराज मॉडल स्कूल, पञ्जाबीबाग, नवदेहली इत्यस्य सेवानिवृत्तः संस्कृतशिक्षकः डॉ. श्रीओमभारद्वाजः, अमृताविद्यालयम्, पुष्पविहारम्, नवदेहली इत्यस्य संस्कृतशिक्षकः श्रीउपेन्द्रकुमारमिश्रः इत्येतैः अभ्यासपुस्तक-संशोधनसमिति सदस्यैः अनवरतं परिश्रमः कृतः। कालानुगुणम् आवश्यकतानुसारं पुस्तकस्य निर्माणादारभ्य अधुनायावत् नैके विद्वांसः अस्य पुस्तकस्य संवर्धनं सम्पादनं च कृतवन्तः। अस्यां प्रायोजनायां यैः अभ्यासनिर्माणसमिति-सदस्यैः पुस्तकसंशोधनसमिति-सदस्यैश्च अनवरतं परिश्रमः कृतः ते सर्वेऽपि पौनः पुन्येन साधुवादार्हाः।

अस्य अभ्यासपुस्तकस्य पुनः प्रकाशनार्थं केन्द्रीयमाध्यमिकशिक्षाबोर्ड इति सङ्घटनस्य शैक्षणिक-निदेशिका-डॉ. प्रज्ञा एम. सिंह-महोदयायाः विशिष्टं योगदानं निश्चयेन उद्देश्यं पूरयति, अतः महोदयायाः कृतेऽपि भूयांसः धन्यवादाः।

अन्यैरपि च यैः महानुभावैः अस्य पुस्तकस्य समीक्षणाय मुद्रणाय च सहयोगः प्रदत्तः तान् सर्वान् प्रति केन्द्रीयमाध्यमिक-शिक्षासङ्घटनं नूनं स्वकृतज्ञतां ज्ञापयति।

शिक्षाजगति किमपि मौलिकं कर्म अथवा अन्यविधं कार्यं वा अन्तिममिति कथयितुं न शक्यते। यतः सर्वत्र काले काले परिष्कारस्य संस्कारस्य वा अवकाशः भवत्येव । अतः अस्य पुस्तकस्य संशोधनाय परामर्शाः अपेक्षिताः स्वागतार्हाः च।

राहुलसिंहः, आई.ए.एस.

अध्यक्षः, केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड, भारतम्

# सम्प्रेषणाधारितः पाठ्यक्रमः

प्रायः आधुनिकविद्यालयेषु संस्कृतस्य अध्ययनम् अध्यापनं च अनुवादसाहाय्येन एव भवति। इदम् अनुभूयते यत् अनेन मार्गेण छात्राणां संस्कृतवाचन-लेखन-भाषणनैपुण्यं सन्तोषप्रदं न अस्ति। एतेषु नैपुण्यं प्राप्तुं भूयो भूयः अभ्यासस्य आवश्यकता वर्तते। मन्यते एव 'अभ्याससारिणी विद्या' इति ।

एतदुद्दिश्य केन्द्रीय-माध्यमिकशिक्षा-सङ्गटनेन भाषा-शिक्षणे सम्प्रेषणोपागममधिकृत्य माध्यमिक-उच्चमाध्यमिककक्षाभ्यः संस्कृतस्य चतुर्वर्षीयनवीन-पाठ्यक्रमहेतुना तदनुकूल-पाठ्यपुस्तकविकासाय एका प्रायोजना उपस्थापिता। अस्याः योजनायाः प्रमुखोद्देश्यानि सन्ति -

- राष्ट्रस्य सांस्कृतिकसमन्वये संस्कृतस्य भूमिकायाः उद्घाटनम्।
- छात्राणां मातृभाषायाः (अथवा क्षेत्रभाषायाः) संस्कृतस्य च मध्ये साम्यदर्शनम्।
- संस्कृतसाहित्ये निहितजीवनमूल्यानां प्रस्फुटनम्।
- संस्कृतवाचन-लेखन-भाषणनैपुण्यस्य विकासः।
- रुचिकरसामग्रीनिर्माणम् ।
- संस्कृते वस्तुनिष्ठ-उपयुक्त-मूल्याङ्कन-विधीनाम् आयोजनम् ।

अस्याः प्रायोजनायाः प्रमुखसोपानानि एतानि सन्ति-

(क) प्रथमचरणे पाठ्यपुस्तकस्य निर्माणम् ।

(ख) द्वितीयचरणे भाषिकतत्त्वाश्रिता कार्यपुस्तिका (अभ्यासपुस्तकम्)।

(ग) तृतीयचरणे संस्कृतध्वनिवैशिष्ट्यं विरामचिह्नवैशिष्ट्यं पाठ्यपुस्तकसामग्रीञ्च अधिकृत्य 'ऑडियोकैसेट्स' इति एषां निर्माणम्। (लिंग्वाफोनध्वनि-मुद्रिकापाठ्यपुस्तकम्)

(घ) अध्यापकनिर्देशिका इति चतुर्थचरणे ।

भाषा तु कौशलप्रधानविषयः। मन्यते यत् यथा जलतरणकौशलार्थं जलतरणम् एव उपायः तथैव वाचन-लेखन-भाषणेषु नैपुण्यं प्राप्तुं भाषायाः भूयो भूयः श्रवणम्, भाषणम्, वाचनम्, लेखनम् इत्येव उपायः। अतः भाषायाः शिक्षणस्य अधिगमनस्य च मूलं भाषिकतत्त्वानां भूयो भूयः अभ्यासे एव निहितम्। अस्य अभ्यासपुस्तकस्य निमार्णम् अनया दृष्ट्या एव कृतम्।

इदं विश्वस्यते यत् एतैः अभ्यासैः छात्राः संस्कृतमाध्यमेन सम्भाषणलेखनादिषु समर्थाः भविष्यन्ति। अस्मिन् अभ्यास-पुस्तके चित्राणां प्रचुरप्रयोगः कृतः येन विद्यार्थिनः प्रत्यक्षविधिना एव संस्कृतस्य प्रयोगं कर्तुं समर्थाः भवेयुः। अनुप्रयुक्तं व्याकरणम् एव एतेषाम् अभ्यासानाम् उद्देश्यम् अस्ति। छात्राः संस्कृतेन व्यवहारे सोत्साहाः भवेयुः इयम् एव कामना ।

**चांदकिरण सलूजा**

**संयोजकः**, पाठ्यसामग्री-निर्माण-समितिः (प्रथम-संस्करणस्य)

# मणिका-अभ्यासपुस्तकम् ( दशमश्रेण्यै )

## संशोधितं नूतनसंस्करणम् - 2025

### केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड-परामर्श-समितिः

- श्री राहुलसिंहः, आई.ए.एस., अध्यक्षः, केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली
- डॉ. प्रज्ञा एम. सिंह, निदेशिका (शैक्षणिक-विभागः), केन्द्रीय-माध्यमिक-शिक्षाबोर्ड, नवदेहली

### पाठ्यसामग्री-निर्माणसमितिः सम्पादन-समितिः च ( संशोधित-नूतनसंस्करणस्य )

- श्री अशोककुमारः, एम एल खन्ना डी. ए. वी. पब्लिकविद्यालयः, द्वारका, नवदेहली (संयोजकः समन्वयकश्च)
- डॉ. श्रीओमभारद्वाजः, हंसराज मॉडल स्कूल पञ्जाबीबाग, नवदेहली (सेवानिवृत्तः)
- श्री उपेन्द्रकुमारमिश्रः, अमृता-विद्यालयम् पुष्पविहारम्, नवदेहली

### पाठ्यसामग्री-निर्माणसमितिः ( प्रथमसंस्करणस्य )

- श्री चांदकिरणसलूजा, प्राध्यापकः, शिक्षाविभागः, दिल्ली-विश्वविद्यालयः (संयोजकः) (सेवानिवृत्तः)
- डॉ. माणिकगोविन्दचतुर्वेदी, केन्द्रीय-हिन्दी-संस्थानम् (सेवानिवृत्तः)
- श्रीमती सन्तोष ठाकुर, पूर्व उप-प्रधानाचार्या, सर्वोदयविद्यालयः, पीतमपुरा, नवदेहली (सेवानिवृत्ता)
- डॉ. भास्करानन्दपाण्डेयः, प्रवक्ता राजकीय-वरिष्ठ-बालविद्यालयः, एस. पी. रोड, नांगलोई, नवदेहली (सेवानिवृत्तः)
- श्रीमती राजबत्रा, मुख्याध्यापिका, माध्यमिक-शाखा, मॉडर्न स्कूल, बाराखम्बा रोड, नवदेहली (सेवानिवृत्ता)

### सी.बी.एस.ई. समन्वयिका

- डॉ. प्रज्ञा वर्मा (संयुक्तसचिव)



# राष्ट्रियशिक्षानीतिः 2020

अध्ययनकाले भारतीयभाषाः इति विषये षष्ठीतः अष्टमीस्तरपर्यन्तम् ''एकं भारतं श्रेष्ठं भारतम्'' इत्युपक्रमान्तर्गतं देशस्य प्रत्येकं विद्यार्थी आनन्ददायकपरियोजनायां गतिविधौ वा भागग्रहणं कुर्यात्। अनया परियोजनया गतिविधिना वा छात्राः अधिकांशरूपेण प्रमुखभारतीयभाषाणाम् उल्लेखनीयायाः परस्परसमानतायाः विषये जानीयुः। तदन्तर्गतं तासां सामान्यध्वन्यात्मकरूपेण वैज्ञानिकरूपेण च व्यवस्थितवर्णमालां, लिपिं सामान्यव्याकरणसंरचनाः च अवगच्छेयुः। संस्कृतभाषातः अन्यशास्त्रीयभाषातः वा तासां शब्दावलीस्रोतसः उद्भवस्य च अन्वेषणेन सह तद्भाषाणां समृद्धेः परस्परप्रभावस्य अन्तर्भेदस्य चापि ज्ञानं भवति। ते इदमपि जानीयुः यत् कस्मिन् क्षेत्रे का भाषा भाष्यते तथा च आदिवासिभाषाणां प्रकृतिः संरचना च कीदृशी भवति। एवं भारतस्य प्रमुखभाषासु सामान्यरूपेण उच्यमानानां केषाञ्चन वाक्यानां तत्रत्यसमृद्धसाहित्यस्य च किञ्चित् परिचयं वक्तुं शक्नुयुः (आवश्यकतानुसारम् अनुवादमाध्यमेन)। एतादृग्गतिविधिना ते भारतस्य एकतायाः सुन्दरसांस्कृतिकपरम्परायाः विविधतायाः च परिचयं प्राप्नुयुः। आजीवनं ते भारतस्य अन्यभागानां जनैः सह मेलनावसरे सहजताम् अनुभवेयुः। इयं परियोजना गतिविधिः वा रुचिकरः आनन्ददायी गतिविधिः भवेत्। अपि च तत्र केनापि रूपेण मूल्याङ्कनस्य अन्तर्भावो न स्यात्। 4.16

भारतस्य शास्त्रीयभाषाणां साहित्यस्य महत्त्वं प्रासङ्गिकता सौन्दर्यञ्च कदापि हेयदृष्ट्या वीक्षितुं न शक्यन्ते। संस्कृतं संविधानस्य अष्टमानुसूच्यां वर्णिता महत्त्वपूर्णा आधुनिकभाषा विद्यते। अस्याः साहित्यम् एतादृशं विशालं विद्यते यत् लैटिन-ग्रीक-साहित्यं मेलयित्वा तुलना क्रियते चेदपि समानता न भवति। संस्कृतसाहित्ये गणितम्, दर्शनम्, व्याकरणम्, सङ्गीतम्, राजनीतिः, चिकित्सा, वास्तुकला, धातुविज्ञानम्, नाटकम्, कविता, कथा, (यस्य संस्कृतज्ञानप्रणाल्यां परिगणना भवति) इत्यादिविषयाणां विशालभाण्डागारो विद्यते। एतेषां साहित्यानां लेखनं भिन्नधार्मिकजनैः सह धार्मिकेतरजनैः सामाजिकार्थिकपृष्ठभूमिवर्गीयजनैः अपि सहस्रवर्षेभ्यः लिखितं विद्यते। अनया रीत्या संस्कृतं त्रिभाषासूत्रस्य मुख्याधारविकल्पेन सह विद्यालयेषु उच्चतरशिक्षायाः सर्वेषु स्तरेषु छात्राणां कृते महत्त्वपूर्णेन समृद्धेन विकल्पेन सह प्रदीयते। संस्कृतं रोचकतया अनुभवात्मकविधिना सह समकालिकप्रासङ्गिकतानुगुणं यत्र संस्कृतज्ञानप्रणाल्याः अन्तर्भावः स्यात् विशेषरूपेण ध्वनिमाध्यमेन उच्चारणमाध्यमेन च पाठ्यते। प्राथमिकस्तरस्य माध्यमिकस्तरस्य च संस्कृतपाठ्यपुस्तकानि 'संस्कृतेन संस्कृतपाठनम्' (एसटीएस) इति रीत्या पाठनीयानि। तदध्ययनम् आनन्ददायकं कर्तुं सरलमानकसंस्कृतस्य (एसएसएस) प्रयोगः कर्तुं शक्यते। 4.17



# भारत का संविधान

## उद्देशिका

हम, भारत के लोग, भारत को एक सम्पूर्ण [1]प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य बनाने के लिए, तथा उसके समस्त नागरिकों को:

सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए
तथा उन सब में व्यक्ति की गरिमा
[2]और राष्ट्र की एकता और अखंडता
सुनिश्चित करने वाली बंधुता बढ़ाने के लिए

दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवम्बर, 1949 ई॰ को एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।

1. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान ( बयालीसवां संशोधन ) अधिनियम, 1976 की धारा 2 द्वारा ( 3.1.1977 ) से "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

---

### भाग 4 क

## मूल कर्त्तव्य

**51 क. मूल कर्त्तव्य** – भारत के प्रत्येक नागरिक का यह कर्त्तव्य होगा कि वह –

(क) संविधान का पालन करे और उसके आदर्शों, संस्थाओं, राष्ट्रध्वज और राष्ट्रगान का आदर करे;

(ख) स्वतंत्रता के लिए हमारे राष्ट्रीय आंदोलन को प्रेरित करने वाले उच्च आदर्शों को हृदय में सँजोए रखे और उनका पालन करे;

(ग) भारत की प्रभुता, एकता और अखंडता की रक्षा करे और उसे अक्षुण्ण रखे;

(घ) देश की रक्षा करे और आह्वान किए जाने पर राष्ट्र की सेवा करे;

(ङ) भारत के सभी लोगों में समरसता और समान भ्रातृत्व की भावना का निर्माण करे जो धर्म, भाषा और प्रदेश या वर्ग पर आधारित सभी भेदभाव से परे हों, ऐसी प्रथाओं का त्याग करे जो स्त्रियों के सम्मान के विरुद्ध हैं;

(च) हमारी सामासिक संस्कृति की गौरवशाली परंपरा का महत्त्व समझे और उसका परिरक्षण करे;

(छ) प्राकृतिक पर्यावरण की जिसके अंतर्गत वन, झील, नदी, और वन्य जीव हैं, रक्षा करे और उसका संवर्धन करे तथा प्राणिमात्र के प्रति दयाभाव रखे;

(ज) वैज्ञानिक दृष्टिकोण, मानववाद और ज्ञानार्जन तथा सुधार की भावना का विकास करे;

(झ) सार्वजनिक संपत्ति को सुरक्षित रखे और हिंसा से दूर रहे;

(ञ) व्यक्तिगत और सामूहिक गतिविधियों के सभी क्षेत्रों में उत्कर्ष की ओर बढ़ने का सतत प्रयास करे जिससे राष्ट्र निरंतर बढ़ते हुए प्रयत्न और उपलब्धि की नई उंचाइयों को छू ले;

[1](ट) यदि माता-पिता या संरक्षक है, छह वर्ष से चौदह वर्ष तक की आयु वाले अपने, यथास्थिति, बालक या प्रतिपाल्य के लिये शिक्षा के अवसर प्रदान करे।

1. संविधान ( छयासीवां संशोधन ) अधिनियम, 2002 द्वारा प्रतिस्थापित।

# THE CONSTITUTION OF INDIA

## PREAMBLE

**WE, THE PEOPLE OF INDIA,** having solemnly resolved to constitute India into a [1]**SOVEREIGN SOCIALIST SECULAR DEMOCRATIC REPUBLIC** and to secure to all its citizens :

**JUSTICE,** social, economic and political;

**LIBERTY** of thought, expression, belief, faith and worship;

**EQUALITY** of status and of opportunity; and to promote among them all

**FRATERNITY** assuring the dignity of the individual and the[2] unity and integrity of the Nation;

**IN OUR CONSTITUENT ASSEMBLY** this twenty-sixth day of November, 1949, do **HEREBY ADOPT, ENACT AND GIVE TO OURSELVES THIS CONSTITUTION.**

1. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "Sovereign Democratic Republic" (w.e.f. 3.1.1977)
2. Subs, by the Constitution (Forty-Second Amendment) Act. 1976, sec. 2, for "unity of the Nation" (w.e.f. 3.1.1977)

---

# THE CONSTITUTION OF INDIA

### Chapter IV A

## FUNDAMENTAL DUTIES

**ARTICLE 51A**

**Fundamental Duties -** It shall be the duty of every citizen of India-

(a) to abide by the Constitution and respect its ideals and institutions, the National Flag and the National Anthem;

(b) to cherish and follow the noble ideals which inspired our national struggle for freedom;

(c) to uphold and protect the sovereignty, unity and integrity of India;

(d) to defend the country and render national service when called upon to do so;

(e) to promote harmony and the spirit of common brotherhood amongst all the people of India transcending religious, linguistic and regional or sectional diversities; to renounce practices derogatory to the dignity of women;

(f) to value and preserve the rich heritage of our composite culture;

(g) to protect and improve the natural environment including forests, lakes, rivers, wild life and to have compassion for living creatures;

(h) to develop the scientific temper, humanism and the spirit of inquiry and reform;

(i) to safeguard public property and to abjure violence;

(j) to strive towards excellence in all spheres of individual and collective activity so that the nation constantly rises to higher levels of endeavour and achievement;

[1](k) to provide opportunities for education to his/her child or, as the case may be, ward between age of 6 and 14 years.

1. Subs, by the Constitution (Eighty-Sixth Amendment) Act. 2002.

# पाठानुक्रमणिका


| अभ्यासः | | विषयाः | | पृष्ठाङ्काः |
|---|---|---|---|---|
| पुनरावृत्तिः | – | ( वर्णानाम् उच्चारणस्थानानि, स्वरसन्धयः, व्यञ्जनसन्धयः, विसर्गसन्धयः ) | | 1-8 |
| प्रथमः अभ्यासः | – | सन्धयः | | 9-34 |
| | | ( क ) | स्वरसन्धयः | 9 |
| | | | वृद्धिः, यण्, अयादिः, पूर्वरूपम् | |
| | | ( ख ) | व्यञ्जनसन्धयः | 27 |
| | | | जश्त्वम्, परसवर्णः, छत्वम्, तुगागमः, अनुनासिकः | |
| | | ( ग ) | विसर्गसन्धिः | 25 |
| | | | उत्वम्, रत्वम्, लोपः, शत्वम्, षत्वम्, सत्वम् | |
| द्वितीयः अभ्यासः | – | समासाः | | 35-62 |
| | | ( क ) | अव्ययीभाव समासः | 37 |
| | | | उप, अनु, निर्, यथा, प्रति, सह | |
| | | ( ख ) | तत्पुरुषाः | 41 |
| | | | विभक्तितत्पुरुषः, कर्मधारयः, द्विगुः, नञ्, उपपदतत्पुरुषः | |
| | | ( ग ) | द्वन्द्वसमासः | 54 |
| | | | इतरेतरः, समाहारः, एकशेषः | |
| | | ( घ ) | बहुव्रीहिः | 58 |
| | | | समानाधिकरणम्, व्यधिकरणम् | |
| तृतीयः अभ्यासः | – | प्रत्ययाः | | 63-89 |
| | | ( क ) | कृत्प्रत्ययाः | 63 |
| | | | तव्यत्, अनीयर्, शतृ, शानच् | |
| | | ( ख ) | तद्धितप्रत्ययाः | 71 |
| | | | मतुप्, णिनि, ठक्, त्व, तल् | |
| | | ( ग ) | स्त्रीप्रत्ययौ | 83 |
| | | | टाप्, ङीप् | |
| चतुर्थः अभ्यासः | – | वाच्यम् | | 90-100 |
| | | कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् | | |
| पञ्चमः अभ्यासः | – | सङ्ख्या | | 101-103 |
| षष्ठः अभ्यासः | – | समयः | | 104-106 |

| | | |
|---|---|---|
| सप्तमः अभ्यासः – | अव्ययानि | 107–116 |
| अष्टमः अभ्यासः – | अशुद्धिसंशोधनम् | 117–120 |
| नवमः अभ्यासः – | रचनात्मककार्यम् | 121–139 |
| | (क) चित्रवर्णनम् | 121 |
| | (ख) अनुच्छेदलेखनम् | 125 |
| | (ग) पत्रलेखनम् | 126 |
| | (घ) संवादलेखनम् | 132 |
| | (ङ) कथापूर्तिः | 137 |
| दशमः अभ्यासः – | अपठितावबोधनम् | 140 |

# वाग्वैभवम्

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिः आसंसारं न दीप्यते॥

येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्॥

# वन्दना

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा॥

शुक्लां ब्रह्मविचारसारपरमाम् आद्यां जगद्व्यापिनीम्
वीणा-पुस्तक-धारिणीमभयदां जाड्यान्धकारापहाम्।
हस्ते स्फाटिकमालिकां विदधतीं पद्मासने संस्थिताम्
वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम्॥



# पुनरावृत्तिः

नवमकक्षायाम् अस्माभिः संस्कृतवर्णमालायाः उच्चारणस्थानानां सन्धीनां च विषये यत् पठितं तस्य पुनरावृत्तिं कुर्मः।

## संस्कृतवर्णमाला

**स्वराः** – येषां वर्णानाम् उच्चारणं स्वतन्त्रतया भवति ते स्वराः कथ्यन्ते। स्वराः त्रिविधाः सन्ति–

1) ह्रस्वस्वराः 2) दीर्घस्वराः 3) प्लुतस्वराः

अत्र वयं केवलं ह्रस्वस्वराणां दीर्घस्वराणां च अध्ययनं करिष्यामः।

| ह्रस्वस्वराः (एते एकमात्राकालेन उच्चार्यमाणाः भवन्ति।) | दीर्घस्वराः (एते द्विमात्राकालेन उच्चार्यमाणाः भवन्ति।) |
|---|---|
| अ | आ |
| इ | ई |
| उ | ऊ |
| ऋ | ॠ |
| ऌ | – |
| | ए |
| | ऐ |
| | ओ |
| | औ |

**व्यञ्जनानि** – येषां वर्णानाम् उच्चारणं स्वतन्त्रतया न अपितु स्वराणां सहायतया एव भवति ते व्यञ्जनवर्णाः भवन्ति।

| वर्गीयव्यञ्जनानि | | अवर्गीयव्यञ्जनानि | |
|---|---|---|---|
| | | अन्तःस्थाः | उष्माणः |
| क ख ग घ ङ | | य | श |
| च छ ज झ ञ | | र | ष |
| ट ठ ड ढ ण | | ल | स |
| त थ द ध न | | व | ह |
| प फ ब भ म | | | |

**अयोगवाहौ** – (ं) अनुस्वारः (:) विसर्गः

# वर्णानाम् उच्चारणस्थानानि

| वर्णानाम् उत्पत्तिस्थानम् | उच्चारिताः वर्णाः: स्वराः | उच्चारिताः वर्णाः: वर्गीयव्यञ्जनानि | उच्चारिताः वर्णाः: अवर्गीयव्यञ्जनानि: अन्तस्थाः | उच्चारिताः वर्णाः: अवर्गीयव्यञ्जनानि: उष्माणः | स्थानजन्यस्य वर्णस्य नाम |
|---|---|---|---|---|---|
| **कण्ठः**<br>अकुहविसर्जनीयानां कण्ठः | अ आ ( : ) | क ख ग घ | | ह | कण्ठ्यः |
| **तालु**<br>इचुयशानां तालु | इ ई | च छ ज झ | य | श | तालव्यः |
| **मूर्धा**<br>ऋटुरषाणां मूर्धा | ऋ ॠ | ट ठ ड ढ | र | ष | मूर्धन्यः |
| **दन्ताः**<br>लृतुलसानां दन्ताः | लृ | त थ द ध | ल | स | दन्त्यः |
| **ओष्ठौ**<br>उपूपध्मानीयानाम् ओष्ठौ | उ ऊ | प फ ब भ | | | ओष्ठ्यः |
| **नासिका** (ञमङणनानां नासिका) — कण्ठनासिकम् | | ङ | | | कण्ठनासिक्यः |
| **नासिका** (ञमङणनानां नासिका) — तालुनासिकम् | | ञ | | | तालुनासिक्यः |
| **नासिका**<br>ञमङणनानां नासिका — मूर्धानासिकम् | | ण | | | मूर्धानासिक्यः |
| **नासिका** (ञमङणनानां नासिका) — दन्तनासिकम् | | न | | | दन्तनासिक्यः |
| **नासिका** (ञमङणनानां नासिका) — ओष्ठनासिकम् | | म | | | ओष्ठनासिक्यः |
| **कण्ठतालु**<br>एदैतोः कण्ठतालु | ए ऐ | | | | कण्ठतालव्यः |
| **कण्ठोष्ठम्**<br>ओदौतोः कण्ठोष्ठम् | ओ औ | | | | कण्ठोष्ठ्यः |
| **दन्तोष्ठम्**<br>वकारस्य दन्तोष्ठम् | व | | | | दन्तोष्ठ्यः |

# स्वरसन्धयः

भवद्भिः नवमकक्षायां विस्तृतरूपेण स्वर-व्यञ्जन-विसर्ग-सन्धयः पठिताः। अत्र तेषां सन्धीनाम् अभ्यासः करणीयः। प्रथमं स्वरसन्धेः पुनरावृत्तिं कुर्मः।

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् |  | सन्धिनाम |
|---|---|---|---|---|---|
|  |  |  | सन्धिच्छेदः | सन्धिः |  |
| अ / आ | अ / आ | द्वयोः स्थाने आ | जल + आगमः | जलागमः | दीर्घः |
| इ / ई | इ / ई | द्वयोः स्थाने ई | कवि + इन्द्रः | कवीन्द्रः |  |
| उ / ऊ | उ / ऊ | द्वयोः स्थाने ऊ | भानु + उदयः | भानूदयः |  |
| ऋ / ॠ | ऋ / ॠ | द्वयोः स्थाने ॠ | मातृ + ऋणम् | मातॄणम् |  |
| अ / आ | इ / ई | द्वयोः स्थाने ए | गज + इन्द्रः | गजेन्द्रः | गुणः |
| अ / आ | उ / ऊ | द्वयोः स्थाने ओ | चन्द्र + उदयः | चन्द्रोदयः |  |
| अ / आ | ऋ / ॠ | द्वयोः स्थाने अर् | महा + ऋषिः | महर्षिः |  |
| अ / आ | ए | द्वयोः स्थाने ऐ | जन + एकता | जनैकता | वृद्धिः |
| अ / आ | ऐ | द्वयोः स्थाने ऐ | महा + ऐश्वर्यम् | महैश्वर्यम् |  |
| अ / आ | ओ | द्वयोः स्थाने औ | तव + ओदनम् | तवौदनम् |  |
| अ / आ | औ | द्वयोः स्थाने औ | महा + औदार्यम् | महौदार्यम् |  |
| इ / ई | भिन्नस्वरः | 'इ / ई' स्थाने य् | यदि + अपि | यद्यपि | यण् |
| उ / ऊ |  | 'उ / ऊ' स्थाने व् | लघु + इदम् | लघ्विदम् |  |
| ऋ / ॠ |  | 'ऋ / ॠ' स्थाने र् | मातृ + आदेशः | मात्रादेशः |  |
| ऌ |  | 'ऌ' स्थाने ल् | ऌ + आकारः | लाकारः |  |
| ए | स्वरः | 'ए' स्थाने अय् | चे + अनम् | चयनम् | अयादिः |
| ओ |  | 'ओ' स्थाने अव् | पो + अनः | पवनः |  |
| ऐ |  | 'ऐ' स्थाने आय् | गै + अकः | गायकः |  |
| औ |  | 'औ' स्थाने आव् | उभौ + अत्र | उभावत्र |  |

## अभ्यासः

❖ **अधोलिखिते अनुच्छेदे रेखाङ्कितस्थूलपदानां सन्धिः सन्धिच्छेदः वा क्रियताम् –**

एकदा **पाण्डवाग्रजः** .................. + .................. युधिष्ठिरः वने **पिपासा + आकुलः** .................................... अभवत्। सः नकुलं जलम् आनेतुम् आदिशत्। नकुलः अपि **तृषार्तः** .................. + .................. आसीत्। सः किञ्चिद् दूरं **गत्वा + एकं** .................................... तडागम् अपश्यत्। तडागस्य स्वामी यक्षः तं जलपानात् निवारयन् अवदत् – भोः! प्रथमं मम **प्रश्नस्य + उत्तरं** .................................... देहि। ततः जलं पिब। परं शक्ति-दर्पोन्मत्तः नकुलः जलम् अपिबत्। **पीत्वा + एव** .................................... मोहं गतः। पश्चात् अन्ये त्रयः भ्रातरः अपि क्रमशः **तत्र + आगताः** .................................... यक्षः प्रत्येकं जलपानात् निवारितवान्, किन्तु कोऽपि तद्वचनं **न + अमन्यत** .................................... जलपानेन सर्वेऽमुह्यन् अन्ते **युधिष्ठिरस्योत्तरैः** .................. + .................. यक्षः अतुष्यत्।

# व्यञ्जनसन्धयः

| पूर्ववर्णः | परवर्णः | विकारः | उदाहरणम् |
|---|---|---|---|
| पदान्त म् | व्यञ्जनानि | म् → ं | रामम् + वन्दे = रामं वन्दे |
| क् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ग् | वाक् + ईशः = वागीशः<br>वाक् + दानम् = वाग्दानम् |
| च् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ज् | अच् + अन्तः = अजन्तः<br>अच् + वर्णः = अज्वर्णः |
| ट् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ड् | सम्राट् + आगतः = सम्राडागतः<br>षट् + वादने = षड्वादने |
| त् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः द् | सत् + आचारः = सदाचारः<br>सत् + गुणाः = सद्गुणाः |
| प् | स्वराः / वर्गाणां तृतीयवर्णाः/ चतुर्थवर्णाः / य्/र्/ल्/व्/ह् | तृतीयवर्णः ब् | अप् + जम् = अब्जम्<br>सुप् + अन्तः = सुबन्तः |
| त् | च् | त् स्थाने च् | तत् + च = तच्च |
| त् | ज् | त् स्थाने ज् | तत् + जालम् = तज्जालम् |
| त् | ल् | त् स्थाने ल् | तत् + लीनम् = तल्लीनम् |
| र् | र् | र् लोपः, पूर्वस्वरस्य दीर्घत्वम् | निर् + रोगः = नीरोगः |
| ऋ,ॠ,र्,ष् | सह्यव्यवधानम्<br>स्वराः, ह्, य्, व्, कवर्गः, पवर्गः | | विकारः<br>न् → ण् |
| ऋ,ॠ,र्,ष् | असह्यव्यवधानम्<br>ल्, श्, स् चवर्गः, टवर्गः, तवर्गः | | विकारः<br>न् → न् |
| पदान्तं न् | | | न् → न् |

## अभ्यासः

❖ रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।

सुभाषितवचनानि नरं यथा **सद्विचारान्** .................. + .................. प्रति प्रेरयन्ति यथा **सत् + गुरुः** ......................... स्वशिष्यं **यत् + उपदिशति** ........................ शिष्यः **तच्चित्ते** .................. + .................... धारयति। सः उपदेशः **तत् + जीवनं** ........................ **कल्याणमयम् + विदधाति** ........................। एवं सुभाषितानि पठित्वा मानवः **प्रेरणां लभते** .................. + ..................। **तच्चिते** .................. + .................. उत्साहस्य सञ्चारः भवति। तस्य शरीरं स्वस्थं **मनः + च** ........................ **प्रसन्नताम् + विन्दति**। ........................ ईदृशः मानवः **जगदीश्वरे** ........................ + .................. विश्वासं करोति। स्वकर्तव्येषु **तत् + लीनः** ........................ भूत्वा **जीवनलक्ष्यम् + साधयित्वा** ........................ संसारे **कीर्तिम् + लभते** ........................।

# विसर्गसन्धयः

| विसर्गात् पूर्ववर्णः | विसर्गः | विसर्गात् परवर्णः | परिणामः | उदाहरणम् |
|---|---|---|---|---|
| यः कोऽपि वर्णः भवेत्। | : | क् / ख् | विकारः न भवति | कः कृन्तति। / शिशुः खेलति। |
| | : | प् / फ् | विकारः न भवति | बालः पठति। / तरुः फलति। |
| | : | श् / च् / छ् | विसर्गस्य स्थाने श् | हरिश्चलति / रामश्शेते। |
| | : | ष् / ट् / ठ् | विसर्गस्य स्थाने ष् | कष्टीकते / गजष्षष्ठः। |
| | : | स् / त् / थ् | विसर्गस्य स्थाने स् | विभुस्तरति / समीरस्सुप्तः। |
| अ | : | अ | विसर्गस्य स्थाने 'ओ' उत्तरवर्तिनः अकारस्य लोपः तत्स्थाने (ऽ) | बालः + अवदत् = बालोऽवदत् |
| अ | : | अकारं विहाय सर्वे स्वराः | विसर्गलोपः | बालः + आगच्छत् = बाल आगच्छत् |
| अ | : | वर्गाणां तृतीयः/चतुर्थः/ पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गस्थाने 'ओ' | रामः + गच्छति = रामो गच्छति |
| आ | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गलोपः | छात्राः + आगताः = छात्रा आगताः |
| अ-आ स्वरौ विहाय अन्ये स्वराः | : | स्वराः/वर्गाणां तृतीयः/ चतुर्थः/पञ्चमः वर्णः/ य्/र्/ल्/व्/ह् | विसर्गस्थाने 'र्' | शिशुः + हसति = शिशुर्हसति |
| स | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' अकारस्य लोपः तत्स्थाने (ऽ) | सः + अहसत् = सोऽहसत् |
| एष | : | ह्रस्वः अकारः | विसर्गस्थाने 'ओ' अकारस्य लोपः तत्स्थाने (ऽ) | एषः + अक्रीडत् = एषोऽक्रीडत् |
| स | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | सः + वदति = स वदति |
| एष | : | अकारं विहाय सर्वे वर्णाः | विसर्गलोपः | एषः + आयाति = एष आयाति |

## अभ्यासः

❖ **अधोदत्ते अनुच्छेदे रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कृत्वा लिखत।**

क्रीडाणाम् उपयोगितां सर्वे स्वीकुर्वन्ति। **एताः + क्रीडाः** ........................ शरीरेण सह **मनोऽपि** .................. + .................. सबलं कुर्वन्ति। **एताभिः + परस्परं** ...................... सद्भावस्य **वृद्धिर्जायते** ................. + .................। **मनः + रञ्जनं** ........................ तु भवति एव। **बालाः + अपि** ........................, **युवानोऽपि** .................. + .................. **वृद्धा अपि** .................. + .................. **लाभान्विताः + भवन्ति** ........................ अतः **सर्वैराजीवनं** .................. + .................. क्रीडाः क्रीडितुं शक्यन्ते। स्वरुचिम् आवश्यकतां च अनुसृत्य **क्रीडाः + चयनीयाः** ........................।

# प्रथमः अभ्यासः

# सन्धयः

## सन्धयः

| (क) स्वरसन्धयः | (ख) व्यञ्जनसन्धयः | (ग) विसर्गसन्धयः |
|---|---|---|
| वृद्धिः | जश्त्वम् | उत्वम् |
| यण् | परसवर्णः | रत्वम् |
| अयादिः | तुगागमः | लोपः |
| पूर्वरूपम् | छत्वम् | शत्वम् |
| | | षत्वम् |
| | | सत्वम् |

## (क) स्वरसन्धयः

### वृद्धिः

❖ **अधोलिखितानि वाक्यानि पठत –**

1. अरुणाचलः **वनौषधीनां** स्रोतः एव।
2. मयूरः तु **विधात्रैव** पक्षिराजः कृतः।
3. आश्रमे एकः **जनौषधालयः** अस्ति।
4. मानवेषु परस्परं **सदैव** सौहार्दं भवेत्।

❖ **उपरिलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा लिखत –**

...................... + ......................        ...................... + ......................

...................... + ......................        ...................... + ......................

**ज्ञातव्यम्–** अ/आ वर्णाभ्यां पश्चाद् यदि ए/ऐ, ओ/औ एतेषु वर्णेषु कश्चिद् वर्णः आगच्छति तर्हि द्वयोः वर्णयोः स्थाने क्रमशः ऐ, औ भवतः।

| | |
|---|---|
| अ / आ + ए / ऐ = ऐ | एक + एकम् = एकैकम् |
| | महा + ऐश्वर्यम् = महैश्वर्यम् |
| अ / आ + ओ / औ = औ | जल + ओघः = जलौघः |
| | सदा + औदार्यम् = सदौदार्यम् |

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत –**

1. अहो धृतिः! अहो सत्यम्! अहो **सत्त्वहित + एषिता**।  ......................................................

2. शक्रः **तत्र + एव** अन्तर्हितः अभवत्। ..............................................................

3. **एकैकपक्षे** ग्रथितं मणीनां तथापि काको न तु राजहंसः। ............................ + ............................

4. युक्तः नरः क्रोधोद्भवं वेगम् **इह + एव** सोढुं शक्नोति। ..............................................................

5. **आत्मैव** ह्यात्मनो बन्धुः। ............................ + ............................

6. **नैतद्** अस्त्रं प्रयोक्तव्यम्। ............................ + ............................

7. **मा + एवं** वद। ..............................................................

8. भयङ्करः सर्पः **सहसा + एव** बहिरागतः। ..............................................................

9. ज्ञानार्जनाय **सदौत्सुक्यं** भवेत्। ............................ + ............................

10. **तवौदार्यं** जनकल्याणाय भवतु। ............................ + ............................

## यण्सन्धिः

❖ **अधोलिखितवाक्यानि ध्यानेन पठत –**

1. पाप्मानं प्रजहि **ह्येनं** ज्ञानविज्ञाननाशम्।
2. राज्ञः स्वेषु **गात्रेष्वपि** निरासक्तिः आसीत्।
3. यूथपः कपीन् आहूय **रहस्यवदत्**।
4. तस्य वचनं श्रुत्वा **बुद्धिमत्युवाच**।

❖ **उपरिलिखितवाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कृत्वा लिखत –**

...................... + ......................    ...................... + ......................

...................... + ......................    ...................... + ......................

**ज्ञातव्यम्** – यत् इ / ई , उ /ऊ, ऋ / ॠ, ऌ इत्येषां वर्णानां पश्चात् कश्चिद् असमानस्वरः भवति, तदा –

| | | | | |
|---|---|---|---|---|
| इ / ई | उ / ऊ | ऋ / ॠ | ऌ | |
| ↓ | ↓ | ↓ | ↓ | भवन्ति। |
| य् | व् | र् | ल् | |

**यथा–** हि + अविचारणीया
ह् इ + अविचारणीया
ह् य् + अविचारणीया
= ह्यविचारणीया

वीथिकासु + एव
वीथिकास् + उ + एव
स् व् + एव
= वीथिकास्वेव

पितृ + उपदेशः
पित् ऋ + उपदेशः

ऌ + आकृतिः
ल् + आकृतिः

पित् र् + उपदेशः = लाकृतिः

= पित्रुपदेशः

❖ **अधोलिखितानां पदानां सन्धिं सन्धिच्छेदं वा अवधानेन कुरुत –**

1. इच्छत्यात्मनः = ................ + ................
2. स्वच्छम् = ................ + ................
3. अभि + उदीरयेत् = ......................
4. साधु + इति = ......................
5. पित्रिच्छा = ...................... + इच्छा
6. लाकारः = ................ + ................
7. प्रत्येकम् = ................ + ................
8. मातृ + अंशः = ......................
9. अन्वयः = ................ + ................
10. सु + आहा = ......................
11. भवत्यधुना = ................ + ................
12. मात्रधिकारः = ................ + ................

❖ **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिच्छेदं वा कुरुत –**

1. याचकाः **सुवर्णादिकानि + अभीष्टानि** वस्तूनि प्राप्तवन्तः। ........................................
2. अहमस्य चक्षुषः **प्रत्यारोपणाय** प्रयतिष्ये। ...................... + ....................
3. भरतर्षभ! तस्मात् त्वम् **इन्द्रियाणि + आदौ** नियम्य एनं पाप्मानं प्रजहि। ........................................
4. **मानवेष्वस्त्राणां** प्रयोगः निषिद्धः आसीत्। ...................... + ....................
5. **स्वसृ + आगमनस्य** सूचनां प्राप्य भ्राता प्रसन्नोऽभवत्। ........................................
6. **स्वस्ति** आचार्यपुत्राय। ...................... + ....................
7. भरतस्य **भ्रातृ + औदार्यं** जगत्प्रसिद्धम् अस्ति। ........................................
8. द्रौणेः अस्त्रं पाण्डवान् **प्रधक्ष्यति +एव**। ........................................
9. **तेष्वेव** कश्चन बालकः अवदत्। ...................... + ....................
10. आचारः प्रथमो धर्मः **इति + एतद्** विदुषां वचः। ........................................

## अयादिसन्धिः

| | | | |
|---|---|---|---|
| ए → अय् | ओ → अव् | ऐ → आय् | औ → आव् |

❖ **अधोलिखितानि वाक्यानि पठत –**

1. विद्या एव वास्तविकं **नयनम्** अस्ति।
2. पश्य पश्य रमणीयं **भवनम्**।
3. अस्य नाटकस्य **नायकः** कः अस्ति ?
4. विशालौ **पर्वताविव**।
5. सह **नाववतु** सह नौ भुनक्तु।

उपरिदत्तेषु वाक्येषु स्थूलानि पदानि सन्धियुक्तानि सन्ति। अस्य सन्धेः नाम **अयादि-सन्धिः** अस्ति।

**अयादिसन्धिः = अय्, अव्, आय्, आव् ( अय् + आदिः = अयादिः सन्धिः। )**

**ज्ञातव्यम् –** ए, ओ, ऐ, औ इत्येतेभ्यः वर्णेभ्यः पश्चाद् यदि कश्चन स्वरवर्णः आगच्छति तर्हि ए, ओ, ऐ, औ इत्येतेषां स्थाने क्रमशः अय्, अव्, आय्, आव् इत्येते भवन्ति।

| पूर्ववर्णः | | परवर्णः | परिवर्तनम् | |
|---|---|---|---|---|
| ए | + | स्वरः | ए स्थाने अय् | ए → अय् + स्वरः |
| ओ | + | स्वरः | ओ स्थाने अव् | ओ → अव् + स्वरः |
| ऐ | + | स्वरः | ऐ स्थाने आय् | ऐ → आय् + स्वरः |
| औ | + | स्वरः | औ स्थाने आव् | औ → आव् + स्वरः |

### उदाहरणानि

**ए + स्वरः = अय् +स्वरः**

**यथा –** ने + अनम् = न् + ए + अनम्
= न् + अय् + अनम् = नयनम्

शे + अनम् = श् + ए + अनम्
= श् + अय् + अनम् = शयनम्

**ओ + स्वरः = अव् +स्वरः**

**यथा –** भो + अनम् = भ् + ओ + अनम्
= भ् + अव् + अनम् = भवनम्

पो + अनः = पवनः

**ऐ + स्वरः = आय् +स्वरः**

| | | | |
|---|---|---|---|
| **यथा –** | नै + अकः | = | न् + ऐ + अकः |
| | | = | न् + आय् + अकः = नायकः |
| | गै + अकः | = | गायकः |

**औ + स्वरः = आव् +स्वरः**

| | | | |
|---|---|---|---|
| **यथा –** | पौ + अकः | = | प् + औ + अकः |
| | | = | प् + आव् + अकः = पावकः |
| | नौ + इकः | = | नाविकः |

## पदान्ते 'य्-व्' वर्णयोः लोपः

| | | | |
|---|---|---|---|
| **यथा –** | हरे + आगच्छ | = | हर् + ए + आगच्छ |
| | | = | हर् + अय् + आगच्छ |
| | | = | हरयागच्छ अथवा हर आगच्छ (य्-लोपः) |
| | श्रियै + अभिलाषः | = | श्रिय् + ऐ + अभिलाषः |
| | | = | श्रिय् + आय् + अभिलाषः |
| | | = | श्रियायभिलाषः / श्रिया अभिलाषः (य्-लोपः) |
| | प्रभो + आगच्छ | = | प्रभ् + ओ + आगच्छ |
| | | = | प्रभ् + अव् + आगच्छ |
| | | = | प्रभवागच्छ / प्रभ आगच्छ (व्-लोपः) |
| | गुरौ + आगते | = | गुर् + औ + आगते |
| | | = | गुर् + आव् + आगते |
| | | = | गुरावागते / गुरा आगते (व्-लोपः) |

**ध्यातव्यम् –** यत्र 'य्-व्'-वर्णयोः लोपः भवति तत्र पुनः सन्धिः न भवति।
यथा 'गुरा आगते' अत्र पुनः सन्धिः न भवति।

❖ **उदाहरणम् अनुसृत्य अधोलिखितेषु सन्धिं कुरुत –**

**यथा –** गुरौ + आगते = गुर् + आव् + आगते = गुरावागते

1. द्वौ + अपि = ...................... + ...................... + ...................... = ......................

2. शिशिरवसन्तौ + इह = ...................... + ...................... + ...................... = ......................

3. ते + आसन् = ...................... + ...................... + आसन् = ......................

4. के + आगच्छन् = ...................... + ...................... + ...................... = ......................

5. हरे + इह = ...................... + ...................... + ...................... = ......................

❖ **सन्धिच्छेदं कुरुत –**

**यथा –** रात्रावागतायाम् = रात्र् + आव् + आगतायाम् = रात्रौ + आगतायाम्

1. उभावपि = ............... + ............... + ............... = ............... + ...............

2. तावत्र = ............... + ............... + ............... = ............... + ...............

3. द्वावपि = ............... + ............... + ............... = ............... + ...............

4. कन्यायायासनम् = ............... + ............... + ............... = ............... + ...............

5. मुनावासीने = ............... + ............... + ............... = ............... + ...............

❖ **अधोलिखितेषु सन्धिं कुरुत –**

1. उभौ + अपि = उभ् + औ + अपि

= ........ ........ ........ = ..............................

2. तौ + अत्र = ........ ........ ........ = ..............................

= ........ ........ ........ = ..............................

3. के + आगच्छन् = ........ ........ ........ = ..............................

= ........ ........ ........ = ..............................

4. हरे + इह = ........ ........ ........ = ..............................

= ........ ........ ........ = ..............................

5. विष्णो + इह = विष्ण् + ओ + इह

❖ **सन्धिच्छेदं कुरुत –**

1. रात्रावागते / रात्रा आगते = ........ + ..............

2. द्वावपि / द्वा अपि = ........ + ..............

3. मुनावासीने / मुना आसीने = ........ + ..............

4. कवयेहि / कव एहि = कवे + ..............

5. नाववतु / ना अवतु = नौ + ..............

❖ **अधोलिखितानां सन्धिं कृत्वा 'य् / व्' वर्णयोः लोपं विकल्पेन प्रदर्शयत –**

1. द्वौ + अपि = .................. / ..............
2. कस्मै + इति = .................. / ..............
3. नद्यै + इह = .................. / ..............
4. कवे + इह = .................. / ..............
5. हरे + इह = .................. / ..............
6. प्रभो + एहि = .................. / ..............

## पूर्वरूपसन्धिः

**पदान्ते ए / ओ + अ = ए / ओ + ऽ ( अवग्रहस्य चिह्नम् )**

❖ **अधोदत्तान् पद्यांशान् पठत –**

1. वेदानां **सामवेदोऽस्मि**।
2. **कीटोऽपि** सुमनः सङ्गादारोहति सतां शिरः।
3. जगद्धिताय जायन्ते मानवाः **केऽपि** भूतले।

एतेषु स्थूलाक्षरपदेषु 'ऽ' इति चिह्नम् अवग्रहः कथ्यते। वस्तुतः अवग्रहः अकारं सूचयति।

उपरिदत्तानि उदाहरणानि पूर्वरूपसन्धेः सन्ति। पूर्वरूपसन्धिः कदा भवति? आगच्छन्तु, अस्य स्वरूपं जानीयाम।

**यथा** 1. के + अपि
2. कीटो + अपि

अत्र 'ए, ओ' वर्णाभ्यां पश्चात् यः 'अ' वर्णः भवति सः पूर्ववर्णस्य रूपम् एव अङ्गीकरोति – अर्थात् 'अ' वर्णः न दृश्यते अपि च तस्य स्थाने 'ऽ' इति चिह्नं भवति।

अतः 1. के + अपि = के पि = केऽपि
2. कीटो + अपि = कीटो पि = कीटोऽपि

**ध्यानेन पश्यत**

**यथा** – वने + अस्मिन् = वन् (ए + अ) स्मिन् = वन् ए ऽ स्मिन् = वनेऽस्मिन्
प्रभो + अत्र = प्रभ् (ओ + अ) त्र = प्रभ् ओ ऽ त्र = प्रभोऽत्र

❖ उदाहरणानुसारं सन्धिं कुरुत –

| | पूर्वपदस्य अन्तिमस्वरः | उत्तरपदस्य आदिमस्वरः | सन्धिपदम् |
|---|---|---|---|
| वने + अस्मिन् | ए + | अ | वनेऽस्मिन् |
| हरे + अत्र | ए + | अ | हरेऽत्र |
| पुस्तके + अत्र | – | – | – |
| देशे + अभावः | – | – | – |
| विष्णो + अत्र | – | – | – |
| विभो + अस्मान् | – | – | – |
| सेवते + अधुना | – | – | – |
| मोदे + अहम् | – | – | – |
| लज्जते + अयम् | – | – | – |

❖ उदाहरणम् अनुसृत्य सन्धिच्छेदः क्रियताम् –

यथा – केऽपि = के + अपि

1. गृहेऽपि = ........ + .............
2. साधोऽत्र = ........ + .............
3. प्रभोऽनुग्रहः = ........ + .............
4. त्यागेऽपि = ........ + .............
5. परिणामेऽमृतम् = ........ + .............
6. सर्वेऽस्मिन् = ........ + .............

## ( ख ) व्यञ्जनसन्धयः

### जश्त्वसन्धिः

❖ अवधानेन वाक्यानि पठत अवगच्छत च –

1. **जगदीशः** जगत् पालयति।
2. **वागीशः** सर्वं जानाति।
3. अद्य कार्यक्रमे **षड्जनाः** आगच्छन्ति।
4. **सुबन्तानां** पदानाम् एकविंशतिः रूपाणि भवन्ति।
5. **अज्वर्णानां** त्रयो भेदाः भवन्ति।

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिच्छेदम् अवलोकयत अवगच्छत च –

जगत् + ईशः    वाक् + ईशः    षट् + जनाः

सुप् + अन्तानाम्    अच् + वर्णानाम्

अधः प्रदत्तां तालिकाम् अवगच्छत –

| पूर्वपदस्य अन्तिमाः वर्णाः | | उत्तरपदस्य आदिमाः वर्णाः | | परिवर्तिताः वर्णाः |
|---|---|---|---|---|
| क् | | ग् घ् | | क् → ग् |
| च् | | ज् झ् | | च् → ज् |
| ट् | + | ड् ढ् | स्वराः य् र् ल् व् ह् | ट् → ड् |
| त् | | द् ध् | | त् → द् |
| प् | | ब् भ् | | प् → ब् |

❖ अधोलिखितानां पदानां सन्धिं सन्धिच्छेदं वा कुरुत –

1. सद्गुणाः = ............ + ............
2. अब्जः = ............ + ............
3. षट् + आननः = ............
4. भवत् + आज्ञा = ............
5. तदनुसारः = ............ + ............
6. अजादिः = ............ + ............
7. प्राक् + ऐतिहासिकम् = ............
8. अच् + अन्तः = ............
9. सम्राट् + गच्छति = ............
10. अप् + धिः = ............

❖ अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं सन्धिच्छेदं वा कुरुत –

1. **ऋक् + वेदः** विश्वसाहित्ये आदिमः आलेखः अस्ति। ............................................................
2. **धिग्युष्मान्** इति बकः सर्वान् खगान् वदति। ............................ + ............................
3. जिह्वालोलुपः मेषः यत् पश्यति **तत् + भक्षयति**। ............................................................
4. न **कुर्यादहितं** कर्म स परेभ्यः कदाचन। ............................ + ............................
5. **षट् + ऋतवः** एव संवत्सरस्य नाभयः सन्ति। ............................................................
6. अनिच्छन् अपि वार्ष्णेय **बलादिव** नियोजितः। ............................ + ............................

7. श्रीकृष्णः **विराट् + रूपं** दर्शितवान्। ..........................................

8. **गुप्* + धेनूः** रक्षति। *(रक्षक इत्यर्थे) ..........................................

9. **सम्यगभिज्ञातं** भवता। .................... + ....................

10. कालः भूतं वर्तमानं **भविष्यत् + अपि** जानाति। ..........................................

## परसवर्णसन्धिः

### अधोलिखितम् अनुच्छेदं पठत –

वर्षर्तौ आकाशः मेघैः आच्छादितः भवति। ग्रीष्मतापेन तप्ताः नराः **सुखं** लभन्ते। पवनः **मन्दं मन्दं** वहति। **भूमिं** स्नापयन्ति। भूमिः **उष्णं वाष्पं** मुञ्चति। **कृषकाणां** मनः **प्रसन्नं** जायते। प्रकृतिः **हरितं वेशं** धारयति।

उपरि दत्ते अनुच्छेदे स्थूलाक्षरपदेषु अनुस्वारः (ं) दृश्यते। एषः अनुस्वारः पदान्तमकारस्य स्थाने भवति इति पूर्वं पठितं भवद्भिः। उदाहरणानि पश्यत—

1. शिष्यः **गुरुम्** पृच्छति = शिष्यः **गुरुं** पृच्छति
2. कृषकः **मेघम्** पश्यति = कृषकः **मेघं** पश्यति
3. बालिका **पाठम्** स्मरति = बालिका **पाठं** स्मरति
4. त्वम् **चित्रम्** रचयसि = त्वं **चित्रं** रचयसि

**यदा पदान्तमकारात् परे व्यञ्जनानि भवन्ति तदा मकारस्य स्थाने अनुस्वारः भवति।**

यदि अनुस्वारात् परे अवर्गीय – व्यञ्जनानि भवन्ति, तदा अनुस्वारः एव तिष्ठति, किमपि परिवर्तनं न भवति। किन्तु यदि अनुस्वारात् परतः वर्गीयव्यञ्जनानि भवन्ति, तदा अनुस्वारः अथवा पञ्चमः वर्णः भवति।

कस्य पञ्चमः वर्णः ?

अनुस्वारात् परतः यस्य वर्गस्य वर्णः भवति, तस्य वर्गस्य पञ्चमः वर्णः।

| | | | | |
|---|---|---|---|---|
| ं | + | क् ख् ग् घ् ङ् | ङ् | अंकः – अङ्कः |
| | | च् छ् ज् झ् ञ् | ञ् | संजयः – सञ्जयः |
| | | ट् ठ् ड् ढ् ण् | ण् | दंडः – दण्डः |
| | | त् थ् द् ध् न् | न् | दंतः – दन्तः |
| | | प् फ् ब् भ् म् | म् | अंबा – अम्बा |

❖ **अधुना उदाहरणानुसारं परसवर्णसन्धिं कुरुत –**

**यथा** राकेशः **विद्यालयम् + गच्छति**। राकेशः विद्यालयं गच्छति / विद्यालयङ्गच्छति।

1. भारत्याः कोषः **सम् + चयात्** नश्यति। ................................ / ................................

2. सः एकं **भयम् + करं** दृश्यम् अपश्यत्। ................................ / ................................

3. ये अविद्याम् उपासते, ते **अन्धम् + तमः** प्रविशन्ति। ................................ / ................................

4. नृपः **रिपुम् + जयति**। ................................ / ................................

5. सा **नदीम् + तरति**। ................................ / ................................

6. **सम् + गच्छध्वम्**। ................................ / ................................

7. अहं **वेदम् + पठामि**। ................................ / ................................

## अवधेयम्

♦ पदान्ताद् अनुस्वारात् परतः यः अपि वर्गीयवर्णः भवति, अनुस्वारस्य स्थाने तस्य वर्गस्य पञ्चमवर्णः विकल्पेन भवति, अन्यथा अनुस्वारः एव तिष्ठति। यदि अनुस्वारात् परतः अवर्गीयवर्णः भवति तदा अनुस्वारः एव तिष्ठति।

## अपदान्तानुस्वारः –

यदि अनुस्वारः अपदान्तः भवति तदा वर्गीयवर्णेषु परेषु तस्य स्थाने पञ्चमः वर्णः अनिवार्यत्वेन भवति।

## ❖ अधोलिखितेषु सन्धिं कुरुत –

1. अं + कितः (कवर्गः) = अङ्कितः
2. चं + चलः (चवर्गः) = ................................
3. घं + टा (ट वर्गः) = ................................
4. चं + दनम् (तवर्गः) = ................................
5. चं + पकः (पवर्गः) = ................................

## ध्यानेन पठत

'विद्यालयं + गच्छति' इति प्रथमे उदाहरणे अनुस्वारात् परतः 'ग' वर्णः अस्ति, 'ग' वर्णः कस्य वर्गस्य अस्ति?

कवर्गस्य – | क्, ख्, ग्, घ्, ङ् |

अत्र कवर्गस्य अन्तिमः वर्णः कः अस्ति?

'ङ्' इति।

एषः 'ङ्' वर्णः एव अत्र परसवर्णः मन्यते। अतः अनुस्वारस्य स्थाने 'ङ्' भवति–

**विद्यालयम् + गच्छति = विद्यालयं गच्छति = विद्यालयङ्गच्छति**

## एवमेव

1. भयं + करः इति उदाहरणे अनुस्वारस्य पश्चात् कः वर्णः अस्ति? ............

   एषः वर्णः कस्य वर्गस्य अस्ति? ............

   अस्य 'वर्गस्य' अन्तिमः वर्णः कः अस्ति? ............

   अतः भयं + करः .................... = .................... च भविष्यतः।

2. रिपुं + जयति इति उदाहरणे।

अनुस्वारस्य पश्चात् कः वर्णः अस्ति ? ............

एषः वर्णः कस्य वर्गस्य अस्ति ? ............

अस्य 'वर्गस्य' अन्तिमः वर्णः कः अस्ति ? ......................

अतः रिपुं + जयति = ...................... = ...................... च भविष्यतः।

❖ **परस्वर्ण-नियमस्य तालिकां पूरयत –**

| अनुस्वारसहितपदानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य प्रथमः वर्णः | पूर्वपदस्य स्थाने पञ्चमवर्णः | सन्धियुक्तम् पदम् | विकल्परूपम् |
|---|---|---|---|---|---|
| तृणं + चरति | ं (अनुस्वारः) | च् | ञ् | तृणञ्चरति | तृणं चरति |
| धनं + ददाति | | द् | न् | ............... | धनं ददाति |
| कार्यं + करोति | | क् | ङ् | ............... | कार्यं करोति |
| भोजनं + पचति | | प् | म् | ............... | भोजनं पचति |
| वृक्षं + परितः | | प् | म् | ............... | वृक्षं परितः |
| प्रमाणं + टीकते | | ट् | ण् | ............... | प्रमाणं टीकते |
| वेदं + जानाति | | ज् | ञ् | ............... | वेदं जानाति |

❖ **सन्धिच्छेदम् कुरुत –**

| उदाहरणानि | सन्धिच्छेदः | विकल्परूपम् |
|---|---|---|
| पायसम्भुङ्क्ते | पायसम् + भुङ्क्ते | पायसं भुङ्क्ते |
| भोजनङ्करोति | ...................................... | ...................................... |
| सायङ्कालः | ...................................... | ...................................... |
| तृणञ्ज्वलति | ...................................... | ...................................... |
| विद्यान्धारयति | ...................................... | ...................................... |
| धनन्ददाति | ...................................... | ...................................... |
| शत्रुञ्जयति | ...................................... | ...................................... |

❖ अधः प्रदत्तसूक्तिषु स्थूलाक्षरपदानां सन्धिच्छेदं कुरुत –

1. **किङ्कुलेन** विशालेन विद्याहीनेन जन्तुना। (..............................)
2. नैतदस्त्रं मनुष्येषु प्रयोक्तव्यं **कथञ्चन।** (..............................)
3. **पापिनाञ्च** सदा दुःखम्। (..............................)
4. **विद्वत्वञ्च नृपत्वञ्च** नैव **तुल्यङ्कदाचन।** (..............................) (...............) (...............)

## छत्वसन्धिः

वर्गस्य 1, 2, 3, 4, वर्णाः + श्–स्वराः / य् र् ल् व् ह् / वर्गाणां पञ्चमवर्णाः
= श् → छ्

❖ अधोलिखितानि वाक्यानि पठत –

1. **तच्छरेण** तरुशाखा छिन्ना अभवत्।
2. ईदृशानि कार्याणि कुरु यानि **जगच्छिवानि** भवेयुः।
3. **एतच्छङ्करेण** गीताभाष्ये कथितम्।
4. महात्मानः सर्वेषां कल्याणम् इच्छन्ति, कः **तच्छत्रुः** ?

भवद्भिः दृष्टं यत् स्थूलाक्षरपदेषु 'छ्' इति वर्णस्य (छकारस्य) प्रयोगः वर्तते। एषः 'छ्' वर्णः (छकारः) 'श्' वर्णस्य स्थाने अस्ति। अपि च शकारात् पूर्ववर्तिनः तकारस्य स्थाने 'च्' भवति।

**वर्गीय-प्रथम-द्वितीय-तृतीय-चतुर्थ-वर्णेभ्यः शकारे परे तस्य स्थाने विकल्पेन छकारः भवति, यदि 'श्' वर्णात् परतः स्वराः, य् र् ल् व् ह्, ङ् ञ् ण् न् म् वर्णाः भवेयुः।**

| उदाहरणानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य आदिमः वर्णः | शकारात् परवर्णः | सन्धिपदम् |
|---|---|---|---|---|
| तत् + शिवः | त् | श् | इ | तच्छिवः |
| मत् + शिरः | त् | श् | इ | मच्छिरः |
| जगत् + शत्रुः | त् | श् | अ | जगच्छत्रुः |
| तत् + श्लोकेन | त् | श् | ल् | तच्छ्लोकेन |
| वाक् + शरः | क् | श् | अ | वाक्छरः |
| तत् + शान्तिः | त् | श् | आ | तच्छान्तिः |

❖ उदाहरणम् अनुसृत्य अधोलिखिततालिकां पूरयत –

| पदानि | पूर्वपदस्य अन्तिमः वर्णः | उत्तरपदस्य प्रथमः वर्णः | शकारात् परवर्णः | सन्धिपदम् |
|---|---|---|---|---|
| तत् + शिवः | त् | श् | इ | तच्छिवः |
| मत् + शत्रुः | ...................... | ...................... | ...................... | ...................... |
| श्रीमत् + शरच्चन्द्रः | ...................... | ...................... | ...................... | ...................... |
| सत् + शीलः | ...................... | ...................... | ...................... | ...................... |
| उत् + श्रितम् | ...................... | ...................... | ...................... | ...................... |
| त्यागात् + शान्तिः | ...................... | ...................... | ...................... | ...................... |
| एतत् + शक्यम् | ...................... | ...................... | ...................... | ...................... |
| उत् + श्वासः | ...................... | ...................... | ...................... | ...................... |
| हृत् + शान्तिः | ...................... | ...................... | ...................... | ...................... |
| तत् + श्रुत्वा | ...................... | ...................... | ...................... | ...................... |
| सत् + शास्त्रम् | ...................... | ...................... | ...................... | ...................... |

## तुगागमः

ह्रस्वस्वरः + छ = ह्रस्वस्वरः + च् + छ्

दीर्घस्वरः + छ = दीर्घस्वरः + छ् दीर्घस्वरः + च् + छ्

❖ अधोलिखितानि वाक्यानि पठत, विशेषतः स्थूलाक्षराणि पदानि –

1. पर्वतीयं वातावरणं **स्वच्छम्** अस्ति।
2. यत्र यत्र **तरुच्छाया** तत्र तत्र पथिकाः।
3. विहगाः गगने **स्वच्छन्दं** विहरन्ति।
4. एकम् **अनुच्छेदं** लिखत।
5. **बदरीच्छायायाम्** उपविश।

अत्र स्थूलपदानां यदि सन्धिच्छेदं कुर्मः तदा वयं द्रक्ष्यामः यत् सन्धिच्छेदरूपे 'च्' इति वर्णः न अस्ति, यथा स्व+छम्, तरु+छाया, स्व+छन्द, अनु+छेदम्।

तदा 'च्' इति वर्णः (चकारः) कुतः आगतः ?

अस्य नियमः अस्ति –

**यदि ह्रस्वस्वरात् परे 'छ्' वर्णः अस्ति, यथा तरु+छाया = त + र् + उ + छाया; अत्र स्वरात् पश्चात् छकारात् च पूर्वं 'च्' वर्णस्य आगमः भवति। यथा– तरुच्छाया इति। किन्तु दीर्घ-स्वरात् परे छकारे आगते छकारात् पूर्वं 'च्' वर्णस्य आगमः विकल्पेन भवति।**

**एवमेव**

| | | |
|---|---|---|
| वृक्ष + छाया | = | वृक्षच्छाया |
| अनु + छेदः | = | अनुच्छेदः |
| वि + छेदः | = | विच्छेदः |
| एक + छत्रम् | = | एकच्छत्रम् |
| स्व + छः | = | स्वच्छः |
| लक्ष्मी + छाया | = | लक्ष्मीच्छाया / लक्ष्मीछाया |

❖ **उदाहरणम् अनुसृत्य सन्धिच्छेदं कुरुत –**

**यथा** तरुच्छायायाम् — तरु + छायायाम्

1. विच्छेदम् ......................
2. परिच्छेदः ......................
3. अनुच्छेदः ......................
4. कुशलच्छात्रः ......................
5. एकच्छत्रम् ......................

## अनुनासिकसन्धिः

**वर्गीयव्यञ्जनम् + अनुनासिकवर्णः = पञ्चमाक्षरम् + अनुनासिकवर्णः**

**निम्नलिखितम् अनुच्छेदं पठत –**

मम एकं मित्रं **जगन्नाथः** प्रतिदिनं पुस्तकालयं गच्छति। सः तत्र संस्कृत-हिन्दी-आङ्ग्ल-भाषाणां **वाङ्मयं** पठति। सः भारतीयसंस्कृतिमधिकृत्य शोधकार्यं करोति। **तन्मतेन** एतत् कार्यं समाजाय अतीव उपयोगि वर्तते।

उपरि दत्ते अनुच्छेदे स्थूलाक्षरपदानि अनुनासिकसन्धेः उदाहरणानि सन्ति।

के सन्ति अनुनासिकवर्णाः ?

वर्गाणां पञ्चमाक्षराणि ङ् ञ् ण् न् म् वर्णाः अनुनासिकवर्णाः सन्ति।

अधुना अस्य नियमं ज्ञास्यामः

| पूर्वपदस्य अन्तिमः वर्णः | | उत्तरपदस्य आदिमः वर्णः | | विकारो भवति | | | | |
|---|---|---|---|---|---|---|---|---|
| क् | | ङ् | | क् | → | ङ् | | वाक् + मयम् = वाङ्मयम् |
| च् | | ञ् | | च् | → | ञ् | | |
| ट् | + | ण् | = | ट् | → | ण् | → | षट् + नवतिः = षण्णवतिः |
| त् | | न् | | त् | → | न् | | तत् + मनः = तन्मनः |
| प् | | म् | | प् | → | म् | | सुप् + मयम् = सुम्मयम् |

वर्गीयव्यञ्जनेभ्यः अनुनासिकवर्णेषु परेषु तस्य व्यञ्जनस्य स्थाने स्ववर्गस्य – पञ्चमाक्षरं भवति, किन्तु एषः नियमः विकल्पेन भवति। यदि प्रत्ययस्य प्रथमः वर्णः अनुनासिकः भवति, तदा पञ्चमाक्षरं नित्यं भवति।

### उदाहरणानि

1. अहं **वाक् + मयं** पठामि = अहं **वाङ्मयं** पठामि।
2. वयं **जगत् + नाथं** प्रणमामः = वयं **जगन्नाथं** प्रणमामः
3. हे प्रभो! मह्यं **सत् +मतिं** देहि = हे प्रभो! मह्यं **सन्मतिं** देहि
4. प्रलयकाले सर्वं विश्वम् **अप् + मयं** भवति = प्रलयकाले सर्वं विश्वम् **अम्मयं** भवति

### अधः दत्तेषु वाक्येषु स्थूलाक्षरम् आश्रित्य सन्धिः विच्छेदः वा क्रियताम्।

1. सर्वे व्यवहाराः **वाक् + मूलाः** सन्ति = ......................
2. **एतत् + न** रोचते = ......................
3. छात्रः **तन्मयः** भूत्वा पठति = ...................... + ......................
4. सभायां **षण्णवतिः** नागरिकाः तिष्ठन्ति = ...................... + ......................

## ( ग ) विसर्गसन्धिः

### विसर्गस्य उत्वम्

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. अपूर्वः **कोऽपि कोशोऽयं** विद्यते तव भारति।
2. **व्ययतो वृद्धिम्** आयाति।
3. अर्थिसमूहः यथेच्छं दानं प्राप्य **सन्तुष्टोऽभवत्**।
4. **को भेदः** बकहंसयोः।
5. **एको मेषः** महानसं प्रविश्य यत्किञ्चिदपि भक्षयति स्म।
6. एतेषां **कलहो न** वानराणां हिताय।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिच्छेदम् अवगच्छत –**

| | |
|---|---|
| कः + अपि | कोशः + अयम् |
| व्ययतः + वृद्धिम् | सन्तुष्टः + अभवत् |
| कः + भेदः | एकः + मेषः |
| कलहः + न | |

◆ अत्र वयं पश्यामः यत् रेखाङ्कितपदेषु विसर्गस्य स्थाने 'ओ' इति प्रयुक्तम्। एषः 'ओ' वर्णः अत्र कथम् अभवत् इति अधः प्रदत्तां तालिकां दृष्ट्वा अवगच्छत –

| अः+अ | | | | अः | + वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः<br>य्, व्, र्, ल्, ह् |
|---|---|---|---|---|---|
| अः + | अ | कः + अपि | अः + | भ | कः + भेद |
| ↓ | | | ↘ | | |
| अ उ | अ | क उ + अपि | अ उ | भ | क उ + भेद |
| ओ | अ | को + अपि | ओ | भ | को भेद |
| ओ | ↓ ऽ | कोऽपि | | | |

❖ **अधः प्रदत्तानि पदानि उदाहरणानुसारं सन्धिं सन्धिच्छेदं वा कृत्वा लिखत –**

**यथा** – पठतः + अपि = पठतोऽपि     कः + जागर्ति = को जागर्ति

1. यः + अकार्यरतः = ......................
2. कालोऽहम् = .................. + ..................
3. कः + अनर्थफलः = ......................
4. विशिष्टो राजपशुः = .................. + ..................

5. प्रबन्ध: + अपि = ......................

6. शक्य: + भवेत् = ......................

7. स्तब्धो जात: = .................... + ....................

8. वध्य: + असि = ......................

9. ध्यायत : + विषयान् = ......................

10. प्रयुक्तोऽयम् = .................... + ....................

❖ अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत –

1. **महाशन: + महापाप्मा** विद्ध्येनमिह वैरिणम्। ......................
2. सङ्गात् सञ्जायते काम:, कामात् **क्रोधोऽभिजायते।** .................... + ....................
3. **चन्द्रो नाम** भूपति: तत्रावसत्। .................... + ....................
4. **ज्ञानवृद्ध: + बाल:** अपि पूजनीय: भवति। ......................
5. नीरक्षीरविवेके तु काक: काक: **बक: + बक:**। ......................
6. **कुक्कुटोऽपि** जनजागरणं करोति। .................... + ....................
7. आचार: **प्रथमो धर्म:** इत्येतद् विदुषां वच:। .................... + ....................
8. देवराज: शक्र: **उपस्थित: + भूत्वा** अवदत्। ......................
9. व्यसनं प्राप्य **यो मोहात्** केवलं परिदेवयेत् तस्य क्रन्दनं वर्धते। .................... + ....................
10. जनकल्याणकर्मसु **रत: + असौ** पुत्रवत् प्रजा: पालयति स्म। ......................

## स: / एष:

❖ एतानि वाक्यानि ध्यानेन पठत अवगच्छत च –

1. **सोऽपि** बालक: संस्कृतं जानाति।
2. **एषोऽतीव** बुद्धिमान् छात्र: अस्ति।
3. **एषोऽहं** संस्कृतकार्याय सङ्कल्पितोऽस्मि।
4. **सोऽपि** तन्नेत्रं यथास्थानम् अस्थापयत्।
5. **एषोऽध्यक्ष:** भाषणं करोति।
6. **सोऽध्ययनाय** प्रतिदिनं विद्यालयं गच्छति।

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां विच्छेदम् अवगच्छत –

स: + अपि

एष: + अतीव

एष: + अहम्

स: + अपि

एष: + अध्यक्ष:

स: + अध्ययनाय

❖ अत्र वयं पश्यामः यत् सः, एषः इत्यनयोः पदयोः विसर्गस्य ( : ) स्थाने 'उ' ( अ + उ = ओ ) प्रयुक्तम् अस्ति।

| | | | | |
|---|---|---|---|---|
| सः | + | अपि | एषः | + अतीव |
| स उ | + | अपि | एष उ | + अतीव |
| स् अ उ | | | एष् अ उ | + अतीव |
| स् ओ | + | अपि | एष् ओ | + अतीव |
| सो | + | ऽपि | एषो | + ऽतीव |
| | = | सोऽपि | | = एषोऽतीव |

❖ अधः प्रदत्तानि पदानि सन्धिं विच्छेदं वा कृत्वा लिखत –

1. सः + अग्रजः = ..............................
2. सोऽपठत् = ............ + ............
3. सः + अत्र = ..............................
4. सोऽन्यथा = ............ + ............
5. सोऽर्जुनः = ............ + ............
6. एषः + अनुजः = ..............................
7. एषोऽलिखत् = ............ + ............
8. एषः + अधुना = ..............................
9. एषोऽधावत् = ............ + ............
10. एषोऽजेयः = ............ + ............

## विसर्गस्य लोपः ( अ )

❖ एतानि अधः प्रदत्तानि वाक्यानि सावधानं पठत –

1. <u>**स बाल्यादेव**</u> वृद्धोपसेवी विनयशीलः च आसीत्।
2. <u>**स राजा**</u> अचिन्तयत्।
3. <u>**एष कामः**</u> <u>**एष क्रोधः**</u> रजोगुण समुद्भवः।
4. <u>**एष याचकः**</u> धनं याचते।
5. धनस्य निस्सारलघोः <u>**स सारः**</u>।

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिछेदम् अवगच्छत –

1. सः + बाल्यात्
2. सः + राजा
3. एषः + कामः
4. एषः + क्रोधः
5. एषः + याचकः
6. सः + सारः

❖ अधुना वयं पश्यामः यत् रेखाङ्कितपदेषु 'स, एष' इत्येताभ्यां सह विसर्गः न प्रयुक्तः। किमर्थं तत्र विसर्गः ( : ) न प्रयुक्तः ? इति अधुना जानीमः।

| | | | | |
|---|---|---|---|---|
| सः / एषः | + | 'अ' भिन्नः कश्चिदपि वर्णः | : → | लोपः |

**अत्र ज्ञातव्यम् –** सः / एषः इत्येताभ्यां पश्चात् यदि अकाराद् (अ) भिन्नः यः कोऽपि वर्णः स्वरवर्णः व्यञ्जनवर्णः वा आगच्छति तर्हि सः / एषः इत्यनयोः पदयोः विसर्गस्य लोपः भवति। अपि च विसर्गलोपानन्तरं कश्चिदपि सन्धिः न भवति।

❖ **अधः प्रदत्तानि वाक्यानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. सः आगच्छति = ............ ............
2. स पठति = ............ ............
3. सः उद्घोषयति = ............ ............
4. स राजपशुः = ............ ............
5. सः बालसमूहः = ............ ............
6. एषः उपविशति = ............ ............
7. एष क्रीडति = ............ ............
8. एषः इच्छति = ............ ............
9. एष पर्यटनाधिकारी = ............ ............
10. एषः मेषः = ............ ............

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितानि पदानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. **सः + परेभ्यः** कदापि अहितं कर्म न कुर्यात्। = ....................................
2. यः तत्त्वार्थनिर्णयं करोति **स विवेकः** कथितः। = ................ + ................
3. **एषः + एव** महान् कविः अस्ति। = ....................................
4. **सः + विकलाङ्गो** भूत्वा चिरं क्लेशम् अनुभवेत्। = ....................................
5. **एषः + महान्** पावनो ग्रन्थः। = ....................................
6. **स तस्य** आवरणम् अपसारयति। = ................ + ................
7. **एषः + नकुलः** तव सारथिः भवतु। = ....................................
8. एकदा **सः + द्वारकापुरीम्** आगच्छत्। = ....................................

## विसर्गस्य लोपः (आ)

❖ **अधोलिखितानि वाक्यानि सावधानं पठत –**

1. वाङ्मयं **तप उच्यते**।
2. **नृप आसनम्** अधितिष्ठति।
3. **शक्र ईक्षते** जगत्।
4. विनय**शील एव** ज्ञानं लभते।
5. **अत एव** अहं वदामि।

❖ **अत्र उपरि वाक्येषु रेखाङ्कितानि पदानि सन्ति। यदि वयं ध्यानेन अवलोकयामः तर्हि अवगच्छामः यदत्र पूर्वपदस्य अन्ते विसर्गः न दृश्यते, परं किं तत्र वस्तुतः विसर्गः नास्ति? विसर्गः तु अस्ति परन्तु तस्य लोपः (अदर्शनम्) अभवत्। लोपः कथं भवति तालिकां दृष्ट्वा जानीमः –**

| | | | |
|---|---|---|---|
| अः | + | 'अ' भिन्नस्वराः | : → लोपः |
| तपः | + | उच्यते | |
| तप् अः | + | उच्यते | |
| तप् अ | + | उच्यते | = तप उच्यते |

**अत्र ज्ञातव्यम्** – 'अ'कारात् परं यदि विसर्गः भवति, विसर्गात् परम् अकारम् अतिरिच्य कोऽपि स्वरः भवति तर्हि विसर्गस्य लोपः भवति। अर्थात् विसर्गः न दृश्यते / अपि च विसर्गलोपाद् अनन्तरं पुनः कश्चिदपि सन्धिः न भवति।

❖ **उदाहरणानुसारं प्रदत्तानां पदानां सन्धिविच्छेदं कुरूत –**

**यथा** – नृप आसनम् = नृपः + आसनम्

1. शक्र ईक्षते = ........................ + ........................
2. विनयशील एव = ........................ + ........................
3. अत एव = ........................ + ........................
4. आचार्य उपदिशति = ........................ + ........................
5. अर्जुन उवाच = ........................ + ........................
6. एक एव = ........................ + ........................
7. भवत आदेशः = ........................ + ........................
8. अर्थिन आगच्छन्ति = ........................ + ........................

❖ **अधः वाक्येषु रेखाङ्कितानि पदानि सन्धिं सन्धिच्छेदं वा कृत्वा लिखत –**

1. **यः + इच्छत्यात्मनः** श्रेयः। ..........................
2. **काम एषः क्रोध एषः** रजोगुणसमुद्भवः। ................... + ................... ..........................
3. छात्रेभ्यः **काकः + आदर्श** एव। ..........................
4. आयुषः **क्षण एकोऽपि** न लभ्यः स्वर्णकोटिकैः। ..........................
5. **हंसः + एव** नीरक्षीरविवेकी मन्यते। ..........................

## विसर्गस्य लोपः ( इ )

| | | | |
|---|---|---|---|
| आः | + | स्वरवर्णाः | : → लोपः |
| | | वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः | |
| | | य्, व्, र्, ल्, ह् | |

यथा – पाठका: + गुणा:

पाठक् आ: + गुणा:

पाठक् आ + गुणा: = पाठका गुणा:

**ज्ञातव्यम्** – 'आ' वर्णात् परं यदि विसर्ग: स्यात् विसर्गात् परं च कश्चिदपि स्वर:, वर्गीय: तृतीय: चतुर्थ: पञ्चम: वर्ण:, य् व् र् ल् ह् एतेषु कश्चन वर्ण: आगच्छति तर्हि विसर्गस्य (:) लोप: भवति।

विसर्गलोपाद् अनन्तरं पुन: कश्चिदपि सन्धि: न भवति।

### ❖ उदाहरणानुसारं प्रदत्तपदानां सन्धिं सन्धिच्छेदं वा कुरुत –

यथा – **एता: + अजन्ता** गुहा: । एता अजन्तागुहा:

**समृद्धा दानशाला:** = समृद्धा: + दानशाला:

1. ता: + महिला: = ..........................................
2. जिह्वालोलुपा वानरा: = ...................... + ......................
3. पुत्रा: + भ्रातर: = ..........................................
4. शैला विदीर्यन्ते = ...................... + ......................
5. बालका: + अवदन् = ..........................................
6. नद्या उद्गमस्थलम् = ...................... + ......................
7. गणनाया: + आधार: = ..........................................
8. सज्जना एव = ...................... + ......................
9. प्रमुखा: + उत्सवा: = ..........................................
10. पञ्चाशदधिका नद्य: = ...................... + ......................

### ❖ अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां सन्धिं विच्छेदं कुरुत –

1. **अमात्या: + विषण्णा:** अभवन्। = ..........................................
2. **एकस्या लघुनाटिकाया:** प्रस्तुतिं करिष्याम:। = ...................... + ......................
3. ज्वालमाला**कुला: + अश्वा:** इतस्तत: अधावन्। = ..........................................
4. अस्माभि: **अवधीरिता गुरूपदेशा:**। = ...................... + ......................
5. द्रौपद्या: **पुत्रा: + वीरगतिं** प्राप्ता:। = ..........................................
6. गगनात् सहस्रश: **उल्का: + भूमौ** पतन्ति। = ..........................................
7. अये! कथमिमं सङ्कल्पं श्रुत्वा **विस्मिता यूयम्**। = ...................... + ......................
8. **द्वादशमासा: + एव** अक्षत्वेन गण्यन्ते। = ..........................................
9. एते पाषाणा: किमपि **वक्तुकामा एव**। = ...................... + ......................
10. लोहितजनपदे अपि अनेके **बोधविहारा: + वर्तन्ते**। = ..........................................

# विसर्गस्य रत्वम् ( अ )

❖ **अधोलिखितानि वाक्यानि सावधानं पठत अवगच्छत च –**

1. लोके **चक्षुर्दानं** दुष्करम् एव।
2. **सहस्रांशुर्न** भासते।
3. रमणीया हि **सृष्टिरेषा**।
4. अहं बकः एव **वृष्टेरभिनन्दनं** करोमि।
5. कः **शुचिरिह**? यस्य मानसं शुद्धम्।
6. मनसः निग्रहं **वायोरिव** सुदुष्करम्।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानि अधः प्रदत्तेषु रिक्तस्थानेषु लिखत –**

.................................... .................................... ....................................

.................................... .................................... ....................................

❖ **अधुना एतेषां पदानां सन्धिच्छेदं पश्यत अवगच्छत च –**

| | |
|---|---|
| चक्षुः + दानम् | सहस्रांशुः + न |
| सृष्टिः + एषा | वृष्टेः + अभिनन्दनम् |
| शुचिः + इह | वायोः + इव |

❖ **अत्र ज्ञातव्यं यत्** 'अ/आ' वर्णौ अतिरिच्य भिन्नस्वरेभ्यः पश्चात् यदि विसर्गः (:) भवति, विसर्गात् परं च कश्चन स्वरः, वर्गीयः तृतीयः, चतुर्थः, पञ्चमः वर्णः, य् व् र् ल् ह् एतेषु कश्चन वर्णः आगच्छति तर्हि विसर्गस्य (:) स्थाने 'र्' भवति।

| | | | | |
|---|---|---|---|---|
| अ / आ भिन्न स्वराः : | + | स्वराः<br>वर्गीयः तृतीयः,<br>चतुर्थः, पञ्चमः वर्णः,<br>य् , व् , र् , ल् , ह् | : | → र् |

**यथा –**

| | |
|---|---|
| पितुः + उपदेशः | परैः + न |
| पित् उः + उपदेशः | पर् ऐः + न |
| पित् उ र् + उपदेशः | पर् ऐ र् + न |
| = पितुरुपदेशः | = परैर्न |

❖ **अधः प्रदत्तानां पदानां सन्धिं विच्छेदं वा कुरुत –**

1. चक्षुः + हीनः = ........................ 2. प्रकृतिः + एव = ........................
3. उच्चैः + अक्रन्दत् = ........................ 4. संस्कृतिः + अपि = ........................

5. विविधैः + भोग्यपदार्थैः = ............................ 6. शनैर्गच्छ = ............ + ............

7. मातुराज्ञा = ............ + ............ 8. वाक्पटुर्धैर्यवान् = ............ + ............

9. भूमिरियम् = ............ + ............ 10. पितुर्द्रोणात् = ............ + ............

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. अहं भवते **चक्षुर्द्वयमेव** प्रयच्छामि। = ........................ + ........................
2. **प्रकृतिरेव** सर्वेषां जननी अस्ति। = ........................ + ........................
3. **सर्वैरेव** मे शोभा। = ........................ + ........................
4. ज्ञानवृद्धः बालोऽपि **सर्वैर्वन्द्यः** भवति। = ........................ + ........................
5. पुष्पाणां **सुगन्धिः + मनोहरः**। = ..................................................
6. **सुन्दरैः + अक्षरैः + लिखितम्**। = ..................................................
7. **गुरुः + ब्रह्मा गुरुर्विष्णुः गुरुर्देवः** महेश्वरः। = ..................................................
   = ........................ + ........................
   = ........................ + ........................
8. भारतीयमासानां नामानि **नक्षत्रनामभिः + एव** सम्बद्धानि। = ..................................................

❋ ❋ ❋

## अव्ययसम्बद्धविसर्गस्य रत्वम् ( आ )

| |
|---|
| क्वचित् अव्ययसम्बद्धविसर्ग ( : ) + स्वराः / वर्गीयः तृतीयः, चतुर्थः, पञ्चमवर्णः / य् व् र् ल् ह् = विसर्गस्य ( : ) 'र्'। |

**यथा** – पुनः + अत्र = पुनरत्र

1. प्रातः + गच्छति = ........................ 2. पुनः + देवराजः = ........................

3. शनैः + याति = ........................ 4. प्रातः + उतिष्ठति = ........................

5. अन्तर्हितः = ............ + ............ 6. प्रातरुदेतिः = ............ + ............

7. पुनरास्ते = ............ + ............ 8. प्रातर्वन्दनीयः = ............ + ............

अत्र विसर्गस्य स्थाने रत्वम् (र्) अभवत् यतः सर्वत्र अव्ययपदम् अस्ति। क्वचित् अव्ययेन सह विसर्गस्य रत्वम् (र्) एव भवति।

❋ ❋ ❋

## विसर्गस्य शत्वम्

: + श् / च् / छ् = : → श्

**यथा** – धनुः + चक्रम्

धनु श् + चक्रम् = धनुश्चक्रम्

**अत्र ध्यातव्यम्** – विसर्गात् परं यदि श्, च्, छ् आगच्छन्ति तर्हि विसर्गस्य (:) स्थाने 'श्' भवति।

❖ **रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. ब्रह्मणः **आयुश्शतं** वर्षाणि। = ........................ + ........................
2. **कः + चन** विद्वान् सङ्कल्पवाचनं करोति। = ................................................
3. कालः **अखण्डः + शाश्वतः विभुश्च**। = ................................................
   = ........................ + ........................
4. बालकाः **बालिकाश्च** देवालयं दृष्ट्वा मन्त्रमुग्धाः। = ........................ + ........................
5. **शनैश्शनैः** प्रभूतं धनमर्जितवान्। = ........................ + ........................
6. श्रीकृष्णार्जुनौ **युधिष्ठिरः + च** प्रविष्टवन्तः। = ................................................
7. प्रधानाचार्यः, पर्यटनाधिकारी, **अध्यापकाश्च** मञ्चे सन्ति। = ........................ + ........................
8. द्रौपद्याः पुत्राः **भ्रातरः + च** द्रौणिना हताः। = ................................................

## विसर्गस्य षत्वम्

: + ष् ट् ठ् = : → ष्

**यथा** – धनुः + टङ्कारः

धनु ष् + टङ्कारः = धनुष्टङ्कारः

**अत्र ध्यातव्यम्** – विसर्गात् परं यदि ट् ठ् ष् आगच्छन्ति तर्हि विसर्गस्य (:) स्थाने 'ष्' भवति।

❖ **अधोलिखितानि सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. डयमानः + टिट्टिभः = ....................
2. चतुष्षष्टिः = .................... + ....................

3. रूप्यकैष्ठनठनायते = .................... + ....................

4. देवेन्द्रः + टीकते = ....................

5. श्लोकष्षष्ठः = .................... + ....................

## विसर्गस्य सत्वम्

| |
|---|
| ः + स् त् थ् = ः → स् |

**यथा** – ऋग्वेदः + तु

ऋग्वेद स् + तु = ऋग्वेदस्तु

**अत्र ध्यातव्यम्** – विसर्गात् परं यदि स् त् थ् आगच्छन्ति तर्हि विसर्गस्य (ः) स्थाने 'स्' भवति।

❖ **रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा लिखत –**

1. मम **अर्थिनः + तु** धनलाभमात्रेण सन्तोषं भजन्ते। = ....................
2. कः + स्यात् **पापतरस्ततः** ? = .................... + ....................
3. देशान्तरेभ्योऽपि **जनाः + तं** देशमायान्ति स्म। = ....................
4. शक्रोऽहमस्मि **देवेन्द्रस्त्वत्समीपम्** उपागतः। = .................... + ....................
5. **शक्रः + तत्रैव** अन्तर्हितः अभवत्। = ....................
6. का नु **हानिस्ततो**ऽधिका। = .................... + ....................
7. राजहंसः राजहंसी च **सरः + तीरे** विहरतः। = ....................
8. ध्यायतो विषयान् पुसः **सङ्गस्तेषु** उपजायते। = .................... + ....................
9. पिताऽस्य किं **तपस्तेपे** **इत्युक्तिः + तत्कृतज्ञता**। = .................... + ....................

   = ....................
10. श्रीकृष्णस्य चक्रं दृष्ट्वा **रिपुभिः + थरथरायते**। = ....................

# द्वितीयः अभ्यासः

# समासाः

❖ निम्नलिखितवाक्यानि पठित्वा उदाहरणानुसारं वाक्येषु स्थूलपदाधृतानां प्रश्नानाम् उत्तराणि प्रदत्तरिक्तस्थानेषु लिखत –

**यथा –**

जनाः **देशभक्तं** पूजयन्ति।



1. जनाः कं पूजयन्ति? — जनाः देशभक्तं पूजयन्ति।
2. जनाः कस्य भक्तं पूजयन्ति? — जनाः देशस्य भक्तं पूजयन्ति।

क. **वृक्षारूढाः** वानराः कूर्दन्ते।



1. कीदृशाः वानराः कूर्दन्ते? ....................................
2. कम् आरूढाः वानराः कूर्दन्ते? ....................................

ख. **वृक्षपतितानि** आम्राणि पक्वानि।



1. कानि आम्राणि पक्वानि? ....................................
2. कस्मात् पतितानि आम्राणि पक्वानि? ....................................

ग. बालकाः **क्रीडाक्षेत्रे** क्रीडन्ति।



1. बालकाः कुत्र क्रीडन्ति? ....................................
2. बालकाः कस्याः क्षेत्रे क्रीडन्ति? ....................................

**अत्र वयं पश्यामः यत् उपरिलिखितेषु वाक्येषु स्थूलपदानां निर्माणं द्वे पदे योजयित्वा कृतम् अस्ति।**

❖ अधुना उदाहरणम् अनुसृत्य अधोदत्तानि पदानि पृथक् कृत्वा लिखत –

| | | |
|---|---|---|
| उदाहरणम् – | **देशभक्तम्** | देशस्य भक्तम् |
| क. | वृक्षारूढाः | ............................ |
| ख. | वृक्षपतितानि | ............................ |
| ग. | क्रीडाक्षेत्रे | ............................ |

एवम् अनेकानि पदानि योजयित्वा एकपदस्य निर्माणप्रक्रिया समासप्रक्रिया कथ्यते। संयुक्तपदं समस्तपदं कथ्यते। एवञ्च पृथक्–पृथक् रूपे स्थितानि पदानि विग्रहपदानि कथ्यन्ते। अधुना समासस्य विषये जानीमः।

- **समासः कः भवति ?**

समसनं समासः कथ्यते अर्थात् अनेकानि पदानि योजयित्वा एकपदनिर्माणस्य विधिः समासः भवति।

**समासविषये** अवश्यम् अवधातव्याः बिन्दवः –

- समासः प्रायेण द्वयोः सुबन्तपदयोः (संज्ञासर्वनामादि) पदयोः भवति न तु तिङन्तपदानाम् (क्रियापदानाम्)

**यथा** – नगरस्य समीपम् = उपनगरम्

विद्यायाः आलयः = विद्यालयः

रामः च लक्ष्मणः च = रामलक्ष्मणौ

सत्यं प्रियं यस्य सः = सत्यप्रियः

- समस्तपदम् – समासे संयुक्तं पदं समस्तपदं कथ्यते। यथा – विद्यालयः
- पदानां विभक्तियुक्तः प्रयोगः विग्रहवाक्यं कथ्यते। यथा – विद्यायाः आलयः।
- **पूर्वपदम्** – समासे यत् प्रथमं पदं भवति तत् पूर्वपदम् कथ्यते। यथा – विद्या / विद्यायाः
- **उत्तरपदम्** – समासे पूर्वपदात् अनन्तरं प्रयुक्तं पदम् उत्तरपदं कथ्यते। यथा – आलयः
- समस्तपदनिर्माणम् विग्रहवाक्ये प्रयुक्तानां विभक्तीनां लोपं कृत्वा एकपदनिर्माणं भवति।

**यथा** – विद्यायाः + आलयः = विद्यालयः किन्तु तेषाम् अर्थः तत्रैव विद्यमानः भवति। अत एव उच्यते –

**विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।**
**पदानां चैकपद्यं च समासः सोऽभिधीयते॥**

- समस्तपद-निर्माणे सन्धिः नित्यः (अनिवार्यः) भवति।

**समासभेदाः** – सामान्यतः समासः चतुर्धा भवति –

1. अव्ययीभावसमासः – पूर्वपदार्थप्रधानः
2. तत्पुरुषसमासः – उत्तरपदार्थप्रधानः (तत्पुरुष-भेदाः – कर्मधारयः, द्विगुः, नञ्, उपपदतत्पुरुषः)
3. द्वन्द्वसमासः – उभयपदार्थप्रधानः (इतरेतरः, समाहारः, एकशेषः)
4. बहुव्रीहिः – अन्यपदार्थप्रधानः (समानाधिकरणः, व्यधिकरणः)

**अधुनेदं पश्यत –**

| भेदाः | उदाहरणानि | विग्रहाः |
|---|---|---|
| अव्ययीभावः | यथाशक्ति | शक्तिम् अनतिक्रम्य |
| तत्पुरुषः | प्रजाहितम् | प्रजायै हितम् |
| द्विगुः | सप्ताहः | सप्तानाम् अह्नां समाहारः |
| कर्मधारयः | नीलोत्पलम् | नीलं च तत् उत्पलम् |
| द्वन्द्वः | फलपुष्पाणि | फलानि च पुष्पाणि च |
| बहुव्रीहिः | पीताम्बरः | पीतम् अम्बरं यस्य सः |

## ( क ) अव्ययीभाव समासः
### ( उप, अनु, निर्, यथा, प्रति, सह )

❖ **निम्नलिखितानि वाक्यानि पठत अवगच्छत च –**

1. नृपः नेत्रं **यथास्थानम्** अस्थापयत्।
2. काकः **सक्रोधं** प्रविशति।
3. राजपुत्राः वानरेभ्यः **प्रतिदिनं** भोज्यपदार्थान् यच्छन्ति स्म।
4. **उपगङ्गं** मुनेः आश्रमः अस्ति।
5. भीमः **अनुद्रौणि** धावति।
6. **निर्मक्षिकं** स्थानम् इदम्।
7. **निर्विघ्नं** कुरु मे देव! सर्वकार्येषु सर्वदा।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानि समस्तपदानि अधोलिखितानि सन्ति। एतेषां समुचितं विग्रहवाक्यं मञ्जूषातः चित्वा समक्षं लिखत –**

1. यथास्थानम् ..........................................................
2. सक्रोधम् ..........................................................
3. प्रतिदिनम् ..........................................................
4. उपगङ्गम् ..........................................................
5. अनुद्रौणि ..........................................................
6. निर्विघ्नम् ..........................................................

**मञ्जूषा**

| |
|---|
| विघ्नानाम् अभावः, दिनं दिनम् इति, द्रौणेः पश्चात्, क्रोधेन सहितम् (सह), गङ्गायाः समीपम्, स्थानम् अनतिक्रम्य। |

**अत्र वयं पश्यामः –** उपरिलिखितेषु समस्तपदेषु यानि पूर्वपदानि तानि अव्ययानि उपसर्गाः वा सन्ति।

- ध्यातव्यं यत् केषाञ्चन अव्ययपदानां निर्धारितेषु अर्थेषु शब्दैः सह समासः भवति।
- अव्ययीभावसमासः पूर्वपदार्थप्रधानः भवति। (अत्र पूर्वपदस्य अर्थस्य प्रधानता भवति।)
- समस्तपदे पूर्वपदम् अव्ययम् उत वा उपसर्गः भवति। प्रायशः विग्रहवाक्ये अव्ययपदस्य स्थाने तस्य अर्थवाचिशब्दः प्रयुज्यते। यथा– निर्विघ्नम् = विघ्नानाम् अभावः
- विग्रहे संज्ञापदस्य प्रयोगः आरम्भे भवति तथा च अव्ययस्य अथवा उपसर्गस्य अर्थवाचिपदम् अनन्तरं प्रयुज्यते।
- अव्ययीभावसमासेन निर्मितं पदम् अव्ययं भवति।
- अव्ययीभावसमासेन निर्मितं पदं यदि अकारान्तं भवति तदा तस्य अन्ते 'अम्' अर्थात् 'म्' इति वर्णः संयुक्तः भवति।
- अव्ययीभावसमासेन निर्मितस्य पदस्य अन्ते कदापि दीर्घः स्वरः न भवति। यथा गङ्गायाः समीपम् = उपगङ्गम् ।
- अत्र 'उपगङ्गम्' इति पदे 'उप' इति अव्ययं 'समीपम्' इति अर्थे प्रयुक्तम्।

◆ एवमेव अन्येषाम् अव्ययानां तेषाम् अर्थानां च विषये प्रदत्ततालिकायाः माध्यमेन अवगच्छन्तु–

| अव्ययपदानि | अर्थः (विग्रहे प्रयुज्यमानं पदम्) | विग्रहे प्रयुज्यमाना विभक्तिः | उदाहरणानि |
|---|---|---|---|
| उप | समीपम् | षष्ठी | ग्रामस्य समीपम् =उपग्रामम् |
| निर् | अभावः | षष्ठी | जनानाम् अभावः = निर्जनम् |
| अनु | पश्चात् | षष्ठी | रथस्य पश्चात् = अनुरथम् |
| अनु | योग्यम् | षष्ठी | गुणानां योग्यम् = अनुगुणम् |
| यथा | अनतिक्रम्य (अनुसारम्) | द्वितीया | विधिम् अनतिक्रम्य = यथाविधि |
| प्रति | वीप्सा (द्विरुक्तिः) | द्वितीया, सप्तमी | दिनं दिनं प्रति<br>दिनं दिनम्<br>दिने दिने इति = प्रतिदिनम् |
| स (सह) | सहितम्, सह | तृतीया | मित्रेण सहितम् = समित्रम् |

**अधोलिखितानि उदाहरणानि सावधानं पठित्वा समस्तपदं विग्रहं वा रिक्तस्थानेषु लिखत –**

### ❖ उप – समीपम्

| | | | | | |
|---|---|---|---|---|---|
| उपनदम् / उपनदि | = | नद्याः समीपम् | उपनगरम् | = | ...................... |
| ...................... | = | राष्ट्रपतेः समीपम् | उपयमुनम् | = | यमुनायाः समीपम् |
| उपवधु | = | वध्वाः समीपम् | ...................... | = | गिरेः समीपम् |
| उपकुलम् | = | ...................... | उपतटम् | = | तटस्य समीपम् |
| ...................... | = | गृहस्य समीपम् | उपग्रामम् | = | ...................... |
| ...................... | = | गङ्गायाः समीपम् | उपगुरु | = | ...................... |
| ...................... | = | कृष्णस्य समीपम् | उपकार्यालयम् | = | ...................... |
| ...................... | = | पर्वतस्य समीपम् | | | |

### ❖ निर् – अभावः

| | | | | | |
|---|---|---|---|---|---|
| निर्मक्षिकम् | = | मक्षिकाणाम् अभावः | निर्जनम् | = | ...................... |
| ...................... | = | गुणानाम् अभावः | निर्विघ्नम् | = | ...................... |
| ...................... | = | दोषाणाम् अभावः | निरङ्कुशम् | = | ...................... |
| ...................... | = | फलानाम् अभावः | निष्कलङ्कम् | = | ...................... |

## ❖ अनु – योग्यम्, पश्चात्

| | | | | | |
|---|---|---|---|---|---|
| अनुहरि | = | हरेः पश्चात् | अनुरामम् | = | …………………… |
| …………………… | = | व्रतस्य योग्यम् | अनुरूपम् | = | …………………… |
| …………………… | = | वृक्षस्य योग्यम् | अनुरथम् | = | रथस्य पश्चात् |
| अनुयमुनम् | = | …………………… | …………………… | = | गङ्गायाः पश्चात् |
| अनुगुणम् | = | …………………… | …………………… | = | शम्भोः पश्चात् |

## ❖ प्रति – ( वीप्सायाम् )

| | | | | | |
|---|---|---|---|---|---|
| प्रतिदिनम् | = | दिने दिने इति | प्रतिसप्ताहम् | = | …………………… |
| प्रतिग्रामम् | = | ग्रामं ग्रामं प्रति / ग्रामे ग्रामे इति | …………………… | = | छात्रं छात्रं प्रति |
| प्रत्येकम् | = | …………………… | …………………… | = | क्षणं क्षणम् प्रति |
| प्रतिवर्षम् | = | …………………… | …………………… | = | हृदयं हृदयं प्रति |
| प्रतिराज्यम् | = | …………………… | …………………… | = | नगरं नगरं प्रति |
| प्रतिमासम् | = | …………………… | | | |

## ❖ स – सह / सहितम्

| | | | | | |
|---|---|---|---|---|---|
| सहरि | = | हरिणा सह | सस्नेहम् | = | …………………… |
| …………………… | = | रागेण सह | सरोषम् | = | …………………… |
| …………………… | = | चित्रेण सह / चित्रैः सह | साट्टहासम् | = | …………………… |
| …………………… | = | क्रोधेन सहितम् | सपरिवारम् | = | …………………… |
| …………………… | = | धनेन सहितम् | सादरम् | = | …………………… |
| सशरीरम् | = | …………………… | …………………… | = | विनयेन सह |
| सजलम् | = | …………………… | सशङ्खम् | = | शङ्खेन सह |
| सहृदयम् | = | …………………… | | | |

## ❖ यथा – एवं प्रकारेण, अनतिक्रम्य = अनुसारम्

| समस्तपदम् | | विग्रहवाक्यम् | समस्तपदम् | | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| यथाशक्ति | = | शक्तिम् अनतिक्रम्य | यथेच्छम् | = | …………………… |
| …………………… | = | सामर्थ्यम् अनतिक्रम्य | यथासमयम् | = | …………………… |
| …………………… | = | रुचिम् अनतिक्रम्य | यथाबलम् | = | …………………… |
| …………………… | = | गतिम् अनतिक्रम्य | यथापरिस्थिति | = | …………………… |
| …………………… | = | प्रसङ्गम् अनतिक्रम्य | यथामर्यादम् | = | …………………… |
| …………………… | = | स्थानम् अनतिक्रम्य | यथारुचि | = | …………………… |

## समासं विग्रहं वा कृत्वा लिखत –

| | | |
|---|---|---|
| यथाशक्ति | = | ............................................................ |
| विघ्नानाम् अभाव: | = | ............................................................ |
| उपगङ्गम् | = | ............................................................ |
| रूपस्य योग्यम् | = | ............................................................ |
| प्रत्येकम् | = | ............................................................ |
| गृहं गृहम् प्रति | = | ............................................................ |
| मक्षिकाणाम् अभाव: | = | ............................................................ |
| उपनदि | = | ............................................................ |
| गर्वेण सहितम् | = | ............................................................ |
| कालम् अनतिक्रम्य | = | ............................................................ |

## अधोलिखितायां कथायां कानिचित् पदानि रेखाङ्कितानि सन्ति तेषां विग्रहान् रिक्तस्थानेषु लिखत –

एक: अतिदुष्ट: वानर: आसीत्। **प्रतिदिनं** स: **यथाशक्ति** वृक्षे स्थितान् पक्षिण: तुदति स्म। **उपनीडं** गत्वा तेषां श्रमस्य उपहासं करोति स्म। एक: पक्षी अवदत् – भो: किमर्थम् उपहससि? **अनुवृष्टि** नीडम् एव अस्मान् रक्षति। वयं परिश्रमं कुर्म: **निर्विघ्नं** च जीवाम:। वानर: **साट्टहासम्** अवदत् – मूर्खा: यूयम्! अरे योगिनां कुत: गृहम्? एवं कथयित्वा तेन दुष्टेन पक्षिणां नीडानि भग्नानि। एक: पक्षी अवदत्–योगिन: तु **प्रतिजीवम्** उपकारमेव कुर्वन्ति। किम् इदम् **अनुरूपं** साधुजनस्य?

1. ..............................  2. ..............................  3. ..............................

4. ..............................  5. ..............................  6. ..............................

7. ..............................  8. ..............................

## अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कुरुत –

1. एकदा राजा **उपसरोवरं** विहरति स्म। ............................................................
2. प्रकृतिमाता सर्वान् **सस्नेहं** पालयति। ............................................................
3. **समयम् अनतिक्रम्य** सर्वेषामेव महत्त्वं विद्यते। ............................................................
4. मुने: आश्रम: तु **निरस्त्रम्** अस्ति। ............................................................
5. श्री ए.पी.जे. अब्दुलकलाम: **गुणानां योग्यं** भारतरत्नं प्राप्तवान्। ............................................................
6. अर्थिनां समूह: **प्रतिदिनं** राज्ञ: समीपम् आगच्छति। ............................................................
7. **अनुचयनं** नेतार: संसद्भवनं गच्छन्ति। ............................................................

## ( ख ) तत्पुरुषाः

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

**देवाधिपतिः** शक्रः नेत्रहीनयाचकस्य रूपम् अधारयत्।

तृषार्ताय **शीतलसलिलं** बहु रोचते।

**चतुर्युगम्** एव महायुगं भवति।

**अनिच्छन्** अपि वार्ष्णेय बलादिव नियोजितः।

**सर्वदा** शारदा अस्माकं मुखकमले वासं कुर्यात्।

**अत्र वयं पश्यामः यत्–**

- देवाधिपतिः – देवानाम् अधिपतिः। अत्र अधिपतिः इति पदस्य प्राधान्यम्।
- शीतलसलिलम् – शीतलं सलिलम्। अत्र सलिलम् इति पदस्य प्राधान्यम्।
- चतुर्युगम् – चतुर्णां युगानां समाहारः। अत्र युगानाम् इति पदस्य प्राधान्यम्।
- अनिच्छन् – न इच्छन् अत्र इच्छन् इति पदस्य प्राधान्यम्।
- सर्वदा – सर्वं ददाति इति सा। अत्र दानम् इति अर्थस्य प्राधान्यम्।

❖ **अवधातव्यं** यत् उपरिलिखितेषु उदाहरणेषु सर्वत्रापि उत्तरपदस्य अर्थस्य प्रधानता वर्तते। अत एव अत्र उत्तरपदार्थप्रधानः तत्पुरुषसमासः वर्तते।

- तत्पुरुषसमासस्य भेदाः सन्ति – विभक्तितत्पुरुषः, कर्मधारयः, द्विगुः, नञ्-तत्पुरुषः, उपपदतत्पुरुषः

### विभक्तितत्पुरुषः

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. **सत्यसमं** तपः नास्ति।
2. राजा नगरस्य समीपं **दानशालाः** अकारयत्।
3. काकानाम् ऐक्यं तु **जगत्प्रसिद्धम्** अस्ति।
4. मयूरः भारतस्य **राष्ट्रपक्षी** अस्ति।
5. राजगृहे एकं **मेषयूथम्** आसीत्।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानि समस्तपदानि समुचितस्य विग्रहस्य समक्षं लिखत –**

| यथा– विग्रहाः | समस्तपदानि |
|---|---|
| 1. सत्येन समम् | ........................................................ |
| 2. दानाय शालाः | ........................................................ |
| 3. जगति प्रसिद्धम् | ........................................................ |

4. राष्ट्रस्य पक्षी ..............................................................

5. राज्ञः गृहे ..............................................................

6. मेषाणां यूथम् ..............................................................

- उपरिलिखितेषु उदाहरणेषु यत्र विग्रहाः सन्ति तत्र पूर्वपदेषु विभिन्नानां विभक्तीनां प्रयोगः अस्ति।
- एवमेव समस्तपदेषु तासां विभक्तीनां लोपः अभवत्। अतः अत्र विभक्तितत्पुरुषः समासः अस्ति।
- विग्रहे पूर्वपदे यस्याः विभक्तेः प्रयोगः भवति तन्नाम्ना एव तस्य समासस्य नाम भवति।

  यथा– सत्येन समम् – सत्यसमम्, अत्र तृतीयाविभक्तेः प्रयोगः। अत एव तृतीयातत्पुरुषः समासः।

  एषः समासः विभक्त्यनुगुणं भवति। पूर्वपदे यस्याः विभक्तेः प्रयोगः भवति तन्नाम्ना एव समासस्य नाम भवति ।

**अधुना विभक्तितत्पुरुषस्य अभ्यासं कुर्मः –**

❖ **द्वितीयातत्पुरुषः –** अस्मिन् समासे उत्तरपदे श्रित, अतीत, पतित, गत, प्राप्त, आपन्न, आरूढ इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे द्वितीया विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे द्वितीया विभक्तेः प्रयोगः भवति ।

| | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|
| यथा– | कृष्णम् आश्रितः | कृष्णाश्रितः |
| | दुःखम् अतीतः | दुःखातीतः |
| | शोकं पतितः | शोकपतितः |
| | प्रलयं गतः | प्रलयगतः |
| | सुखं प्राप्तः | सुखप्राप्तः |
| | भयम् आपन्नः | भयापन्नः |
| | ग्रामं गतः | ग्रामगतः |
| | कूपं पतितः | कूपपतितः |
| | वृक्षम् आरूढः | वृक्षारूढः |
| | मेघान् अत्यस्तः | मेघात्यस्तः |

❖ **तृतीयातत्पुरुषः –** अस्मिन् समासे उत्तरपदे पूर्व, सदृश, सम, ऊन, कलह इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे तृतीया विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे तृतीयाविभक्तेः प्रयोगः भवति।

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| मासेन पूर्वः | मासपूर्वः |
| मात्रा सदृशः | मातृसदृशः |
| वाचा कलहः | वाक्कलहः |
| सप्ताहेन पूर्वः | सप्ताहपूर्वः |
| पित्रा समः | पितृसमः |
| सुखेन युक्तः | सुखयुक्तः |

| | |
|---|---|
| हरिणा त्रातः | हरित्रातः |
| बाणेन हतः | बाणहतः |
| विद्यया विहीनः | विद्याविहीनः |
| सर्पेण दष्टः | सर्पदष्टः |
| हस्तेन ताडितः | हस्तताडितः |
| धनेन हीनः | धनहीनः |

❖ **चतुर्थीतत्पुरुषः** अस्मिन् समासे उत्तरपदे अर्थ, बलि, हित, सुख, रक्षित, इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे चतुर्थी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे चतुर्थ्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| सत्काराय इदम् | सत्कारार्थम् (अङ्गवस्त्रम्) |
| पठनाय अयम् | पठनार्थः (पाठः) |
| ज्ञानाय इयम् | ज्ञानार्था (उपनिषद्) |
| भूतेभ्यः बलिः | भूतबलिः |
| जनेभ्यः हितम् | जनहितम् |
| मानवाय सुखम् | मानवसुखम् |
| भिक्षायै अटनम् | भिक्षाटनम् |
| यूपाय दारु | यूपदारु |

❖ **पञ्चमीतत्पुरुषः** – अस्मिन् समासे उत्तरपदे भय, भीत, भीति, मुक्त, त्रस्त, च्युत इत्यादयः शब्दाः भवन्ति। एतैः शब्दैः सह पूर्वं विद्यमानपदे पञ्चमी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे पञ्चम्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| चोराद् भयम् | चोरभयम् |
| सिंहाद् भीतिः | सिंहभीतिः |
| पदात् च्युतः | पदच्युतः |
| दुष्टेभ्यः त्रस्तः | दुष्टत्रस्तः |
| अश्वात् पतितः | अश्वपतितः |
| आलस्यात् मुक्तः | आलस्यमुक्तः |

❖ **षष्ठीतत्पुरुषः** अस्मिन् समासे पूर्वं विद्यमानशब्दे सम्बन्धार्थे षष्ठी विभक्तिः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| राज्ञः पुरुषः | राजपुरुषः |
| राष्ट्रस्य पतिः | राष्ट्रपतिः |
| देवस्य पूजकः | देवपूजकः |

| | |
|---|---|
| मातुः वचनम् | मातृवचनम् |
| हिमस्य आलयः | हिमालयः |
| सुराणाम् ईशः | सुरेशः |
| अर्थस्य गौरवम् | अर्थगौरवम् |
| भिक्षायाः पात्रम् | भिक्षापात्रम् |
| राज्यस्य कार्यम् | राज्यकार्यम् |
| क्रीडायाः कीडाक्षेत्रम् | क्रीडाक्षेत्रम् |
| राज्ञः दर्शनम् | राजदर्शनम् |

❖ **सप्तमीतत्पुरुषः** – अस्मिन् समासे उत्तरपदे प्रवीण, अन्तर्, पटु, कुशल, चपल, निपुण, सिद्ध, शुष्क, पक्व, बन्ध इत्यादयः शब्दाः भवन्ति। विग्रहे एतैः शब्दैः सह विद्यमानपदे सप्तमी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे सप्तम्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| कार्ये निपुणः | कार्यनिपुणः |
| कार्येषु कुशलः | कार्यकुशलः |
| संस्कृते सिद्धः | संस्कृतसिद्धः |
| चक्रे बन्धः | चक्रबन्धः |
| आतपे शुष्कः | आतपशुष्कः |
| व्याकरणे पटुः | व्याकरणपटुः |
| स्थाल्यां पक्वः | स्थालीपक्वः |

## अभ्यासः

◆ **अधोलिखिते अनुच्छेदे स्थूलाक्षरेषु पदेषु समासं कृत्वा रिक्तस्थानेषु समस्तपदानि लिखत –**

**ग्रामं गतः** ...................... कश्चित् नागरिकः एकं बालकं **कूपं पतितम्** ...................... अपश्यत् । उच्चैः विलपन्ती तस्य माता अवदत् – भोः! अहं भवतः **शरणम् आगता** ...................... । कृपया रक्षतु मम बालकम् इति। नागरिकः सपदि कूपे रज्जुं पातयित्वा **सङ्कटम् आपन्नं** ...................... बालकं रक्षितवान् । **दुःखम् अतीता** ...................... सा जननी अवदत् – 'भद्रम् अस्तु ते' इति ।

◆ **अधोलिखिते अनुच्छेदे समस्तपदानि रेखाङ्कितानि कुरुत –**

कश्चित् वनवासी एकदा ग्रामम् अगच्छत्। ग्रामगतः सः तत्र यन्त्रचालितम् अरघट्टम् दृष्टवान्। अरघट्टस्य घटिकापतत् जलं क्षेत्राणि सिञ्चति स्म। यन्त्रदर्शनेन चकितः सः नगरं प्रति प्रस्थितः। तत्र आपणगतानि वस्तूनि दृष्ट्वा अचिन्तयत् – अरे! किमेतत् सर्वं मानवनिर्मितम्। अनुपमा मानवशक्तिः। विविधा भोजनसामग्री, यन्त्रनिर्मितानि परिधानवस्त्राणि, आत्मरक्षायै शस्त्राणि, शरीरशोभायै प्रसाधनद्रव्याणि, विस्तृताः सञ्चारमार्गाः, विद्युद्व्यजनानि ग्रीष्मतापहरणाय वातानुकूलनयन्त्राणि

शीतनिवारणाय उष्णकानि सन्ति। एतत् सर्वं दृष्ट्वा सः आश्चर्यविमूढः जातः। वृक्षमूले उपविश्य सः अवदत् – अहो! कथं विज्ञानाधीनः जातः अद्यतनः मानवः!

- **अधोलिखितविग्रहान् पठत अनुच्छेदात् चित्वा तेषा समक्षं समस्तपदानि लिखत –**

**यथा** – क) वृक्षस्य मूले — वृक्षमूले

ख) आत्मनः रक्षायै ...........................................

ग) ग्रामं गतः ...........................................

घ) वातानुकूलनाय यन्त्राणि ...........................................

ङ) मानवस्य शक्तिः ...........................................

च) मानवेन निर्मितम् ...........................................

छ) आपणं गतानि ...........................................

ज) यन्त्रस्य दर्शनेन ...........................................

झ) यन्त्रेण चालितम् ...........................................

ञ) सञ्चाराय मार्गाः ...........................................

ट) विज्ञानस्य अधीनः ...........................................

ठ) यन्त्रेण निर्मितानि ...........................................

ड) विद्युतः व्यजनानि ...........................................

ढ) शीतस्य निवारणाय ...........................................

ण) आश्चर्येण विमूढः ...........................................

त) घटिकाभ्यः पतत् ...........................................

थ) भोजनाय सामग्री ...........................................

द) परिधानाय वस्त्राणि ...........................................

ध) शरीरस्य शोभायै ...........................................

न) ग्रीष्मस्य तापस्य हरणाय ...........................................

- **उपर्युक्तसमस्तपदानि अधोलिखिततालिकायां विभज्य लिखन्तु –**

द्वितीयातत्पुरुषः ...........................................

तृतीयातत्पुरुषः ...........................................

चतुर्थीतत्पुरुषः ...........................................

पञ्चमीतत्पुरुषः ...........................................

षष्ठीतत्पुरुषः ...........................................

सप्तमीतत्पुरुषः ...........................................

## कर्मधारय:

**आचार्या** – इदानीं वयं क्रीडिष्याम:। वर्गत्रये कार्यं भविष्यति। भासवर्ग:, कालिदासवर्ग:, व्यासवर्ग: च। भासवर्ग: एकं शब्दं वदिष्यति, कालिदासवर्ग: तस्मात् पूर्वं विशेषणं योजयिष्यति, व्यासवर्ग: च समस्तपदनिर्माणं करिष्यति।

**सर्वे छात्रा** – आचार्ये! वयं सज्जा:।

| भासवर्ग: | कालिदासवर्ग: | व्यासवर्ग: |
|---|---|---|
| गगनम् | नीलं गगनम् | नीलगगनम् |
| काष्ठानि | शुष्कानि काष्ठानि | शुष्ककाष्ठानि |
| भोजनम् | अमृतमयं भोजनम् | अमृतमयभोजनम् |
| ज्ञानी | महान् ज्ञानी | महाज्ञानी |

**आचार्या** – शोभनम्। किं भवन्त: जानन्ति यत् एतानि सर्वाणि कर्मधारयसमासस्य उदाहरणानि सन्ति। समस्तपदप्रक्रियायां पूर्वपदं विभक्तिरहितं करणीयम् विग्रहे च पुन: विभक्तियुक्तम्।

**छात्रा:** – आम् आचार्ये! परं कृपया बोधयतु यत् अस्मिन् समासे कस्य पदार्थस्य प्रधानता भवति?

**आचार्या** – पश्यन्तु। वयं पूर्वमेव चर्चां कृतवन्त: यत् कर्मधारय: तु तत्पुरुषस्य एव भेद: अस्ति। अत: भवन्त: एव वदन्तु कस्य पदार्थस्य प्राधान्यम्?

**छात्रा:** – अधुना ज्ञातं महोदये! अत्रापि उत्तरपदार्थ: एव प्रधान:।

**आचार्या** – अस्तु! परम् इदमपि जानन्तु यत् यत्र विशेषण-विशेष्ययो: उपमानोपमेययोश्च समास: भवति तत्र कर्मधारय: समास: भवति।

**यथा–** मधुरा वाणी – मधुरवाणी

घन: इव श्याम: – घनश्याम:

**आचार्या** – अधुना वयम् उपमेय-उपमानयो: संयोजनं करिष्याम:। पुन: वर्गेषु उपमेयम् उपमानं समस्तपदं च वदत। उपमानस्य अग्रे 'इव' योजनीयम्।

**यथा–** पुरुष: सिंह: इव – पुरुषसिंह:

| भासवर्ग: (उपमेयम्) | कालिदासवर्ग: (उपमानम्) | व्यासवर्ग: (समस्तपदम्) |
|---|---|---|
| मुखम् | कमलम् इव | मुखकमलम् |
| पुरुष: | सिंह: इव | पुरुषसिंह: |
| लोचनम् | राजीव: इव | राजीवलोचनम् |
| कोमलम् | कुसुमम् इव | कुसुमकोमलम् |
| पुरुष: | ऋषभ: इव | पुरुषर्षभ: |

❖ अधुना अधोलिखितसमस्तपदानां विग्रहं रिक्तस्थानेषु लिखत –

| | | | |
|---|---|---|---|
| यथा – (क) | महावीरः | महान् | वीरः |
| (ख) | श्रान्तपथिकः | .................. | .................. |
| (ग) | महात्मा | .................. | .................. |
| (घ) | स्वच्छजलम् | .................. | .................. |
| (ङ) | उन्नतप्रसादः | .................. | .................. |
| (च) | शीतलसलिलम् | .................. | .................. |

❖ अधोलिखितानां विग्रहवाक्यानां समस्तपदानि रचयत –

| | | |
|---|---|---|
| यथा – (क) | महान् पुरुषः | महापुरुषः |
| (ख) | पवित्रं मनः | .................................................................... |
| (ग) | विस्तृता नाटिका | .................................................................... |
| (घ) | पुष्पितः वृक्षः | .................................................................... |
| (ङ) | विकसितानि पुष्पाणि | .................................................................... |
| (च) | कमलम् इव नयनम् | .................................................................... |
| (छ) | पर्वतः इव उन्नतः | .................................................................... |
| (ज) | उत्पलम् इव कोमलम् | .................................................................... |
| (झ) | पुत्रः इव नकुलः | .................................................................... |
| (ञ) | सलिलम् इव शीतलम् | .................................................................... |
| (ट) | सुभाषितम् रत्नम् इव | .................................................................... |
| (ठ) | मुखं चन्द्रः इव | .................................................................... |
| (ड) | हिमकणं मौक्तिकम् इव | .................................................................... |
| (ढ) | गीता अमृतम् इव | .................................................................... |

## द्विगुसमासः

❖ अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –

1. **अष्टाध्यायी** व्याकरणस्य महान् ग्रन्थः अस्ति।
2. उदारचरितानां कृते **त्रिभुवनम्** एव स्वदेशः भवति।
3. मम विद्यालयस्य उद्याने **पञ्चवटी** अस्ति।
4. पञ्जाबप्रान्ते **पञ्चनदम्** अस्ति।

❖ अधुना रेखाङ्कितपदानां विग्रहाः अधः प्रदत्ताः तेषां समक्षं समस्तपदानि लिखत –

1. अष्टानाम् अध्यायानां समाहारः ..............................................

2. त्रयाणां भुवनानां समाहार: ..............................................

3. पञ्चानां वटानां समाहार: ..............................................

4. पञ्चानां नदीनां समाहार: ..............................................

❖ **अत्र वयं पश्याम: यत् उपरिलिखितेषु उदाहरणेषु पूर्वपदं सर्वत्र सङ्ख्यावाचकम् अस्ति –**

1. यदा पूर्वपदं सङ्ख्यावाचकं समस्तपदं च समाहारार्थस्य द्योतकं भवति तदा द्विगुसमास: भवति।
2. अस्य समासस्य विग्रहवाक्ये उभयो: पदयो: षष्ठीविभक्ते: प्रयोग: भवति तथा च समाहार: शब्द: अनिवार्यतया प्रयुज्यते।
3. प्राय: उत्तरपदे यदा शत, अध्याय, लोक, अष्ट, वट, पद, पर्ण इत्यादय: शब्दा: भवन्ति तदा समस्तपदम् ईकारान्तस्त्रीलिङ्गे भवति। अन्यथा अकारान्त – नपुंसङ्कलिङ्गे भवति।
4. द्विगुसमासस्य समस्तपदानि सर्वदा एकवचने एव भवन्ति।

❖ **अधोलिखितानां समस्तपदानां विग्रहं मञ्जूषात: चित्वा लिखत –**

1. सप्ताह: ..............................................
2. शताब्दी ..............................................
3. त्रिपथम् ..............................................
4. नववादनम् ..............................................
5. त्रिलोकी ..............................................
6. पञ्चगवम् ..............................................

| | | |
|---|---|---|
| पञ्चानां गवां समाहार: | नवानां वादनानां समाहार: | सप्तानां अह्नां समाहार: |
| त्रयाणां लोकानां समाहार: | शतस्य अब्दानां समाहार: | त्रयाणां पथां समाहार: |

❖ **अधोलिखितानां पदानाम् आवश्यकतानुसारं समस्तपदं विग्रहं वा लिखत –**

1. सप्तानां पदानां समाहार: ..............................................
2. चतुर्णां पथां समाहार: ..............................................
3. नवानां रात्रीणां समाहार: ..............................................
4. सप्तशती ..............................................
5. चतुर्मुखम् ..............................................
6. नवग्रहम् ..............................................
7. पञ्चानां मूलानां समाहार: ..............................................
8. पञ्चपात्रम् ..............................................
9. त्रयाणां वादनानां समाहार:, तस्मिन् ..............................................
10. पञ्चाङ्गम् ..............................................

**विशेषेण ध्यातव्यम्**

यदा पूर्वपदं सङ्ख्यावाचकं भवति परन्तु समाहारस्य बोधः अपेक्षितः न भवति तदा कर्मधारयः एव, न तु द्विगुः।

यथा – दश आननानि = दशाननानि　　सप्त ऋषयः = सप्तर्षयः　　पञ्चानां पाठानाम् = पञ्चपाठानाम्

❖ **अध मञ्जूषायां कानिचित् समस्तपदानि सन्ति तेभ्यः द्विगुसमासस्य समस्तपदानि रिक्तस्थानेषु लिखित्वा तेषां विग्रहान् अपि लिखत –**

| |
|---|
| सप्तबालकाः, सप्तपर्णी, अष्टध्यायी, चतुर्मुखानि, अष्टवादने, चतुर्युगम्, नवरत्नम्, नवदिनानि, नवरात्रम्, पञ्चवृक्षाः, चतुर्वेदम्, अष्टाङ्गम्। |

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

........................　　........................................................................................

## नञ् समासः

❖ **अधोलिखितवाक्यानि ध्यानेन पठत अवगच्छत च –**

1. सरस्वत्याः कोषः **अपूर्वः** वर्तते।
2. **अनुद्वेगकरं** वचनं सर्वान् तोषयति।
3. काकः मेध्यम् **अमेध्यं** सर्वमेव भक्षयति।
4. **अनृतं** वदसि चेत् काकः दशेत्।
5. आज्ञा गुरूणां हि **अविचारणीया**।

❖ **अधुना अधोलिखितानां विग्रहवाक्यानां समस्तपदानि उपरिदत्तेभ्यः वाक्येभ्यः चित्वा लिखत –**

यथा –

1. न पूर्वः ........................
2. न उद्वेगकरम् ........................
3. न मेध्यम् ........................
4. न ऋतम् ........................
5. न विचारणीया ........................

**उपर्युक्तेषु वाक्येषु रेखाङ्कितानि सर्वाणि अपि पदानि निषिद्धार्थे प्रयुक्तानि सन्ति।**

## अवधातव्यम् –

1. निषेधार्थे शब्दैः सह नञ् इत्यस्य समासः भवति।

   यथा – न उचितम्, न ज्ञानम्

2. अत्र नञ् समासे यदि उत्तरपदस्य प्रथमः वर्णः स्वरः भवति तर्हि समस्तपदस्य निर्माणे "न" इत्यस्य स्थाने "अन्" आदेशः भवति।

   यथा – न उचितम्

   ↓

   अन् उचितम् = अनुचितम्

3. तथैव यदि उत्तरपदस्य प्रथमः वर्णः व्यञ्जनं भवति तर्हि समस्तपदस्य निर्माणे "न" इत्यस्य स्थाने "अ" आदेशः भवति।

   यथा – न ज्ञानम्

   ↓

   अ ज्ञानम् = अज्ञानम्

### ❖ अधुना अधोलिखितानां पदानां समस्तपदं विग्रहवाक्यं वा लिखत –

| | | | |
|---|---|---|---|
| न आदिः | .......................... | अविवेकः | .......................... |
| न हिंसाम् | .......................... | अनास्था | .......................... |
| न विद्या | .......................... | न सत्यम् | .......................... |
| न उत्साहः | .......................... | अप्रिया | .......................... |
| न अश्वः | .......................... | अकालः | .......................... |
| अविज्ञातम् | .......................... | न परीक्षितम् | .......................... |
| न पवित्रम् | .......................... | अनादरः | .......................... |
| अनुपस्थितम् | .......................... | न धर्मः | .......................... |
| न मन्त्रः | .......................... | अनेके | .......................... |
| असत् | .......................... | न ध्रुवम् | .......................... |
| न आगतः | .......................... | अश्रुतम् | .......................... |
| न कार्यम् | .......................... | न पठितम् | .......................... |
| न दृष्टम् | .......................... | अमूल्यम् | .......................... |
| न द्वितीयम् | .......................... | अनन्तः | .......................... |

### ❖ अधोलिखितेभ्यः वाक्येभ्यः नञ् तत्पुरुषस्य उदाहरणानि चित्वा लिखत तेषां विग्रहं च कुरुत –

1. अनृतं न ब्रूयात्। .......................... ..........................
2. न ब्रूयात् सत्यम् अप्रियम्। .......................... ..........................

3. अविवेकः परमापदां पदम्। ........................ ........................
4. अपरीक्षितं च न अभिनिविशेत्। ........................ ........................
5. किं हेयम्? अकार्यम्। ........................ ........................
6. किं जीवितम्? अनवद्यम्। ........................ ........................

## उपपदतत्पुरुषः

❖ **अधोलिखितपर्यायवाचिनः शब्दान् पठत –**



जलजम्, नीरजम्, वारिजम्
तोयजम्, अम्बुजम्, अम्भोजम्



वारिदाः, जलदाः, तोयदाः
नीरदाः, अम्बुदाः, अम्भोदाः, पयोदाः



वारिधिः, जलधिः, तोयधिः
अम्भोधिः, अम्बुधिः, पयोधिः



महीपः, क्षितिपः, भूमिपः, भूपः
महीपालः, क्षितिपालः, भूमिपालः, भूपालः



खगाः, विहगाः, विहङ्गाः, द्विजाः
खेचराः, अण्डजाः



महीधराः, क्षितिधराः, धरणीधराः,
भूभृतः (भूभृत्), महीभृतः (महीभृत्), क्षितिभृतः (क्षितिभृत्), भूधराः (भूधरः)

**अवधेयम् –**

- उपर्युक्तानि सर्वाणि उपपदतत्पुरुषस्य उदाहरणानि सन्ति।
- एतेषु उत्तरपदार्थः एव प्रधानः वर्तते।
- अत्र सुबन्तपदेन (शब्दरूपेण) उपपदेन सह क्रियाशब्दस्य समासः भवति।
- विग्रहे धातुरूपेण सह 'इति' अव्ययस्य प्रयोगः भवति। यथा जलं ददाति इति।
- समस्तपदस्य अन्ते उत्तरपदरूपेण क्रियायाः संक्षिप्तं रूपं प्रयुक्तं भवति यस्य स्वतन्त्रः प्रयोगः भाषायां न क्रियते। यथा– जलद, अत्र ददाति इत्यस्य स्थाने 'द' इति प्रयुक्तः।
- विग्रहे पूर्वपदे अर्थानुसारं विभक्तेः प्रयोगः भवति –

यथा –

| | | | |
|---|---|---|---|
| जायते इति | (ज) | नीरे जायते इति | = नीरजम् |
| | | अण्डात् जायते | = अण्डजः |
| ददाति इति | (द) | तोयं ददाति इति | = तोयदः |
| (अस्मिन्) धीयते इति | (धिः) | जलम् अस्मिन् धीयते इति | = जलधिः |
| पाति इति | (प) | महीं पाति इति | = महीपः |
| | | यूथं पाति इति | = यूथपः |
| | | नॄन् पाति इति | = नृपः |
| | | भुवं पाति इति | = भूपः |
| पालयति इति | (पाल) | भूमिं पालयति इति | = भूमिपालः |
| | | भुवं पालयति इति | = भूपालः |
| गच्छति इति | (ग) | खे गच्छति इति | = खगः |
| धारयति इति | (धर) | महीं धारयति इति | = महीधरः |
| | | भुवं धारयति इति | = भूधरः |
| पिबति इति | (प) | मधु पिबति इति | = मधुपः |
| | | पादैः पिबति इति | = पादपः |
| | | द्वाभ्यां पिबति इति | = द्विपः |
| करोति इति | (कर / कार) | भयं करोति इति | = भयङ्करः |
| | | कुम्भं करोति इति | = कुम्भकारः |
| | | दिनं करोति इति | = दिनकरः |
| जानाति इति | (ज्ञ) | सर्वं जानाति इति | = सर्वज्ञः |
| | | विशेषं जानाति इति | = विशेषज्ञः |

| | | | |
|---|---|---|---|
| चरति इति | (चर) | खे चरति इति | = खेचरः |
| वेत्ति इति | (वित्) | वेदान् वेत्ति इति | = वेदवित् |
| भुङ्क्ते इति | (भुक्) | हुतं भुङ्क्ते इति | = हुतभुक् |
| गायति इति | (ग) | सामं गायति इति | = सामगः |
| तिष्ठति इति | (स्थ) | गृहे तिष्ठति इति | = गृहस्थः |
| हरति इति | (हर) | मनः हरति इति | = मनोहरः |

**अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहवाक्यं वा लिखत -**

1. सूपकारः मेषम् अर्धज्वलितेन काष्ठेन ताडितवान्।
2. मयूरः अहिभुक् अपि कथ्यते।
3. जाज्वल्यमानशरीरः मेषः निकटे तिष्ठति इति ताम् अश्वशालां प्रविशति।
4. राजा शालिहोत्रज्ञान् वैद्यान् अपृच्छत्।
5. कृतं जानाति इति पुत्रः पितुः उपकारं स्मरति।
6. दुष्टबुद्धिः कलशे विषधरम् अपश्यत्।
7. अर्जुनः श्रेष्ठः शस्त्रविद् आसीत्।
8. मानवेन श्रेयः करोति इति मार्गः अनुसरणीयः।
9. सुधीः धर्मप्रदां वाचं वदति।
10. द्वारस्थः बालसमूहः मधुरस्वरेण गायति।

**अधोलिखितपद्येषु उपपदतत्पुरुषस्य उदाहरणानि रेखाङ्कितानि कुरुत -**

क) समुद्वहन्तः सलिलातिभारम्,
बलाकिनो वारिधरो नदन्तः
महत्सु शृङ्गेषु महीधराणाम्
विश्रम्य विश्रम्य पुनः प्रयान्ति।

ख) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद्बुद्धजनसकाशादधिगतम्।
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

ग) सौख्यदं शुभदं भूयात् नवं वर्षं सुमङ्गलम्।

## ( ग ) द्वन्द्वसमासः

**एतानि उदाहरणानि पठत –**

क) ईशः च कृष्णः च = ईशकृष्णौ

ख) ग्रीष्म च वसन्तः च शिशिरः च = ग्रीष्मवसन्तशिशिराः

ग) माता च पिता च = मातापितरौ

घ) पाणी च पादौ च एतेषां समाहारः = पाणिपादम्

ङ) जननी च जनकः च = जनकौ

- अत्र वयं पश्यामः यत् उपरिलिखितेषु विग्रहवाक्येषु प्रत्येकं पदादनन्तरं 'च' इति अव्ययस्य प्रयोगः अस्ति।
- अत्र सर्वत्र द्वन्द्वसमासस्य प्रयोगः अस्ति। द्वन्द्वसमासः 'च' इत्यर्थे भवति ।
- प्रायेण उभयपदार्थप्रधानः द्वन्द्वसमासः भवति। समस्तपदे विद्यमानपदद्वयस्य अपि प्रधानता अर्थात् महत्त्वं भवति ।
- द्वन्द्वसमासः त्रिधा भवति – 1. इतरेतरद्वन्द्वः 2. समाहारद्वन्द्वः 3. एकशेषद्वन्द्वः

### इतरेतर-द्वन्द्वः

- समस्तपदस्य लिङ्गम् अन्तिमपदानुसारं भवति ।
- यदि द्वयोः समासः भवति तर्हि समस्तपदं द्विवचने अन्यथा अधिकानां समासे बहुवचने भवति।

यथा– रामः च लक्ष्मणः च = रामलक्ष्मणौ

हरिः च हरः च गुरुः च = हरिहरगुरवः

सीता च रामः च = सीतारामौ

सीता च गीता च लता च = सीतागीतालताः

माता च पिता च = मातापितरौ

**❖ अधोलिखितानां समस्तपदानां विग्रहवाक्यानि लिखत –**

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| धर्मार्थौ | धर्मः च अर्थः च। |
| हरिहरौ | ................................ |
| सुखदुःखे | ................................ |
| वृक्षलते | ................................ |
| लवकुशौ | ................................ |
| लतावृक्षौ | ................................ |
| पितापुत्र्यौ | ................................ |

पशुपक्षिण: ..................................

पत्रपुष्पफलानि ..................................

धर्मार्थकाममोक्षा: ..................................

हरिहरगुरव: ..................................

पशुपक्षिण: ..................................

**कोष्ठके प्रदत्तानि पदानि संयोज्य समस्तपदानि रिक्तस्थानेषु लिखत –**

(क) (राम: च लक्ष्मण: च) ........................ विश्वामित्रस्य शिष्यौ आस्ताम्।

(ख) (लक्ष्मण: च शत्रुघ्न: च) ........................ सुमित्राया: पुत्रौ आस्ताम्।

(ग) (नकुल: च सहदेव: च) ........................ सहोदरौ आस्ताम्।

(घ) (युधिष्ठिर: च भीम: च अर्जुन: च) ........................ कुन्त्या: पुत्रा: आसन्।

(ङ) (वसिष्ठ: च विश्वामित्र: च) ........................ आचार्यौ आस्ताम्।

(च) तव (पुत्रा: च पौत्रा: च) ........................ चिरञ्जीवन्तु।

## समाहार-द्वन्द्वः

- समस्तपदस्य विग्रहवाक्ये शब्दानां वचनानुसारं एतयो:/तयो: समाहार: तथा च एतेषां/तेषां समाहार: इति प्रयुज्यते।
- समाहारद्वन्द्वे समस्तपदं सर्वदा अकारान्तनपुंसकलिङ्गे एकवचने एव भवति।

| | समस्तपदम् | विग्रहवाक्यम् |
|---|---|---|
| 1. | हस्तपादम् | हस्तौ च पादौ च एतेषां समाहार: |
| 2. | सुखदु:खम् | ............................................................ |
| 3. | सर्पनकुलम् | ............................................................ |
| 4. | सत्यासत्यम् | ............................................................ |
| 5. | शीतोष्णम् | ............................................................ |
| 6. | शिरोग्रीवम् | ............................................................ |
| 7. | यूकालिक्षम् | ............................................................ |
| 8. | पाणिपादम् | ............................................................ |
| 9. | जयाजयम् | ............................................................ |
| 10. | चराचरम् | ............................................................ |
| 11. | गङ्गायमुनम् | ............................................................ |
| 12. | दन्तोष्ठम् | ............................................................ |
| 13. | सम्पद्विपदम् | ............................................................ |

## एकशेषद्वन्द्वः

- एकशेषद्वन्द्वः प्रायेण युगलानां मध्ये भवति।
- विग्रहवाक्ये इतरेतर-द्वन्द्ववद् भवति।
- समस्तपदे पुंलिङ्गशब्दः एव अवशिष्यते।
- यदि द्वयोः समासः भवति तर्हि समस्तपदं द्विवचने अन्यथा बहुवचने भवति।

यथा- पिता च माता च = पितरौ

पुत्राः च पुत्र्यः च = पुत्राः

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| हंसौ | ................................ |
| वृद्धौ | ................................ |
| भ्रातरौ | ................................ |
| बालकौ | ................................ |
| नरौ | ................................ |

## अभ्यासः

**निम्नलिखितवाक्येषु रेखाङ्कितपदेषु समासं कुरुत -**

1. <u>लवः च कुशः च</u> क्रीडतः। ........................................
2. जनः <u>सुखं च दुःखं च</u> अनुभवति। ........................................
3. <u>कृष्णः च बलरामः च</u> गच्छतः। ........................................
4. <u>ग्रीष्मः च वसन्तः च शिशिरः च</u> पुनः पुनः आगच्छन्ति। ........................................
5. <u>पिकः च काकः च</u> इति तयोः वर्णदृष्ट्या कोऽपि भेदः नास्ति। ........................................
6. <u>व्याघ्रः च चित्रकः च</u> नदीजलं पातुम् आगतौ। ........................................
7. <u>सीता च गीता च</u> गीतं गायतः। ........................................
8. रामः <u>सीतया च लक्ष्मणेन च</u> सह वनम् अगच्छत्। ........................................
9. अहं <u>मातरं च पितरं च</u> नमामि। ........................................
10. <u>सीतायै च रामाय च</u> नमः। ........................................
11. <u>वशिष्ठः च विश्वामित्रः च</u> आचार्यौ आस्ताम्। ........................................
12. तव <u>पुत्राः च पौत्राः च</u> चिरं जीवन्तु। ........................................
13. श्रीरामः <u>रावणं च कुम्भकर्णं च</u> हतवान्। ........................................

**निम्नलिखितवाक्येषु रेखाङ्कितपदानां समासविग्रहं कुरुत –**

1. **शिशिरवसन्तौ** पुनरायातः। ..............................
2. **सूर्यचन्द्रयोः** आभया इदं जगत् विभाति। ..............................
3. धरायां **खगमृगाः** चरन्ति। ..............................
4. **पाणिपादं** प्रक्षाल्य भोजनं करणीयम्। ..............................
5. योगिनं **शीतोष्णे** न बाधेते। ..............................
6. **रामलक्ष्मणभरताः** परस्परं वदन्ति। ..............................
7. **मयूरकुक्कुटौ** उत्पततः। ..............................
8. **इन्द्राग्नी** देवौ स्तः। ..............................
9. **व्यासनारदौ** प्रसिद्धौ आस्ताम्। ..............................
10. **सीतारामौ** वनम् अगच्छताम्। ..............................

## ( घ ) बहुव्रीहिः

**एतानि उदाहरणानि पठत –**

| विग्रहाः | | समस्तपदानि |
|---|---|---|
| नीलम् उत्पलं यस्मिन् तत् (सरः) | = | नीलोत्पलम् (सरः) |
| दत्तं धनं यस्मै सः (जनः) | = | दत्तधनः (जनः) |
| पीतम् अम्बरं यस्य सः (विष्णुः) | = | पीताम्बरः (विष्णुः) |

- अत्र वयं पश्यामः यत् समस्तपदानि अन्यपदार्थं प्रति विशेषणरूपेण प्रयुक्तानि।
- अन्यपदार्थप्रधानः बहुव्रीहिः समासः भवति।
- समस्तपदानि अन्येषां विशेषणरूपे प्रयुक्तानि भवन्ति
- अस्य समासस्य विग्रहे यत्-तत् सर्वनामशब्दयोः रूपाणाम् अर्थानुसारं प्रयोगः भवति।

अन्यानि उदाहरणानि पश्यामः

| विग्रहाः | | समस्तपदानि |
|---|---|---|
| बहूनि फलानि यस्मिन् सः (वृक्षः) | = | बहुफलः (वृक्षः) |
| पीतं दुग्धं येन सः (बालः) | = | पीतदुग्धः (बालः) |
| पीतं दुग्धं यया सा (बालिका) | = | पीतदुग्धा (बालिका) |

**1. अधुना उदाहरणानि अनुसृत्य समस्तपदानि लिखत।**

| विग्रहाः | समस्तपदानि |
|---|---|
| (क) कृतं भोजनं येन सः (जनः) | ...................... (......................) |
| (ख) पतितानि पर्णानि यस्मात् सः (वृक्षः) | ...................... (......................) |
| (ग) वीराः पुरुषाः यस्मिन् सः (ग्रामः) | ...................... (......................) |
| (घ) अधीतं व्याकरणं येन सः (विद्वान्) | ...................... (......................) |
| (ङ) दश आननानि यस्य सः (रावणः) | ...................... (......................) |

**2. अधोलिखिते अनुच्छेदे स्थूलाक्षरपदानां समस्तपदानि मञ्जूषायाः चित्वा रिक्तस्थानेषु लिखत।**

| नतपृष्ठः, मरणशीलः, सिद्धार्थः, दुर्बलदृष्टिम्, उत्क्रान्तजीवितम्, विगतप्राणः। |
|---|

एकदा **सिद्धः अर्थः यस्य सः** ...................... विहाराय नगरम् अगच्छत्। तत्र सः एकं रुग्णं **दुर्बला दृष्टिः यस्य तम्** ...................... नरम् अपश्यत्। तस्य नतं पृष्ठं दृष्ट्वा सः अचिन्तयत् – किम् अहम् अपि एवमेव **नतं पृष्ठं यस्य सः** ...................... भविष्यामि? ततः सः **उत्क्रान्तं जीवितं यस्य तं** ...................... नरम् अपश्यत्। सः सारथिम्

अपृच्छत् – अरे! किमर्थं जनाः एवं मनुष्यं बद्ध्वा नयन्ति। सारथिः उवाच – भगवन्! अयं तु **विगताः प्राणाः यस्य सः** ...................... एव। सिद्धार्थः पृष्टवान् – भोः! – किम अहम् अपि मरिष्यामि? सारथिः अवदत् – **मरणं शीलं यस्य सः** ...................... संसारः। सिद्धार्थः तद् दृष्ट्वा विरक्तः जातः।

3. **अधः कर्मधारयस्य बहुव्रीहिसमासस्य च कानिचित् विग्रहवाक्यानि प्रदत्तानि सन्ति। अत्र भेदम् अवगत्य समस्तपदानि रिक्तस्थानेषु लिखत।**

| | विग्रहवाक्यानि | समस्तपदानि |
|---|---|---|
| यथा – | चन्द्र इव मुखम् | चन्द्रमुखम् |
| | चन्द्रः इव मुखं यस्याः सा | चन्द्रमुखी |
| (क) | पतितं पर्णम् | ...................... |
| (ख) | पतितानि पर्णानि यस्मात् सः (वृक्षः) | ...................... |
| (ग) | पीतम् अम्बरम् | ...................... |
| (घ) | पीतम् अम्बरं यस्य सः | ...................... |
| (ङ) | वृक्षम् आरूढः | ...................... |
| (च) | वृक्षः आरूढः येन सः | ...................... |
| (छ) | दश आननानि | ...................... |
| (ज) | दश आननानि यस्य सः | ...................... |
| (झ) | कृतः अभिषेकः यस्य सः | ...................... |
| (ञ) | कृतः अभिषेकः | ...................... |

4. **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा लिखत –**

1. नृपः **विनयं शीलं यस्य सः** आसीत्। ......................
2. **कृष्णः वर्णः यस्य सः** काकः अवदत्। ......................
3. बकः **स्थितप्रज्ञः** इव बहुकालपर्यन्तं जले तिष्ठति। ......................
4. **जाज्वल्यमानशरीरः** मेषः अश्वशालां प्राविशत्। ......................
5. **प्रचण्डाः ज्वालाः यस्य सः** अग्निः प्रसरति। ......................
6. **बद्धः अञ्जलिः यस्य सः** अर्जुनः नारदम् अवदत्। ......................
7. **प्रतिहतान्तः करणः** प्रच्छन्नभाग्यः अचिन्तयत्। ......................
8. काकः आत्मानं **सत्यप्रियं** मन्यते। ......................
9. पश्चात्तापेन **दग्धमानसः** प्रच्छन्नभाग्यः सकरूणम् अक्रन्दत्। ......................
10. **द्वादशाः अक्षाः यस्मिन् तस्य** संवत्सरस्य विषये इदमुच्यते। ......................

## मिश्रितप्रश्नाः

**(क) अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कृत्वा लिखत –**

1. **न उद्वेगकरं** ........................ वाक्यं वाङ्मयं तप उच्यते।
2. **अक्षरव्यक्तिः** ........................ इति एकः पाठकस्य गुणः।
3. भारति! तव अयं कोशः **अपूर्वः** ........................ विद्यते।
4. **विद्यया समं** ........................ चक्षुः नास्ति।
5. शुश्रूषाश्रवणादयः **धियः गुणाः** ........................ सन्ति।
6. **शीतलं च तत् सलिलं** ........................ पुरुषं प्रह्लादयति।
7. शिष्यः **स्वमेधया** ........................ पादं गृह्णाति।
8. **प्रियहितं** ........................ वाक्यमपि वाङ्मयं तपः कथ्यते।
9. शारदा **सर्वदा** ........................ भवति।
10. शक्रः **आशया अन्वितः** ........................ राज्ञः समीपम् आगच्छत्।
11. अहं **भवन्मनोरथं** ........................ पूरयितुम् इच्छामि।
12. राजा **नीलोत्पलम्** ........................ इव एकं चक्षुः प्रायच्छत्।
13. काकः **क्रोधेन सहितं** ........................ राजहंसीं तर्जयति।
14. वायसः **कटुभिः क्वणितैः** ........................ जनजागरणं करोति।
15. सर्वेषां महत्त्वं भवति **समयम् अनतिक्रम्य** ........................।
16. बकः **अहिभुजं** ........................ मयूरम् आक्षिपति।
17. **पिकः च काकः च, तयोः** ........................ भेदः वसन्तसमये ज्ञायते।
18. मयूरः **साट्टहासं** ........................ वदति।
19. मेषः **अहः च निशा च, तयोः समाहारः** ........................ पाकशालां प्रविशति।
20. **यूथपः** ........................ कपीन् वनं गन्तुं कथयति।
21. वानराः **राज्ञः भवनं** ........................ त्यक्तुं न इच्छन्ति।
22. **यथोचितं** ........................ क्रियताम् इति राजा आदिशत्।
23. राजा **शालिहोत्रं जानन्ति इति, तान्** ........................ वैद्यान् घोटकचिकित्सां कर्तुम् आह्वयति।
24. **अनिच्छन्** ........................ अपि जनः पापं चरति।
25. स्मृतिभ्रंशाद् **बुद्धेः नाशः** ........................ भवति।
26. युधिष्ठिरः **साश्चर्यं** ........................ पृच्छति।
27. **प्रचण्डाः ज्वालाः यस्य सः** ........................ अग्निः परितः प्रसरति।
28. कथं भवन्तौ **सुष्ठु पन्थाः, तम्** ........................ परित्यज्य कुपथेन गन्तुं प्रवृत्तौ ?

29. बालकाः **<u>नतोन्नते</u>** ...................... मार्गे क्रीडन्ति।

30. **<u>विमूढधीः</u>** ...................... परुषां वाचं वदति।

31. सुधीः जनः **<u>धर्मं प्रददाति इति, ताम्</u>** ...................... वाणीं वदेत्।

32. **<u>अकातरः</u>** ...................... मन्त्री परैः न परिभूयते।

33. अरुणाचलप्रदेशः **<u>सूर्योदयस्य भूमिः</u>** ...................... कथ्यते।

34. मिथुनः एकः **<u>विशिष्टराजपशुः</u>** ...................... वर्तते।

## (ख) उचितविकल्पं चिनुत –

1. ओरिया इति पर्वणि **<u>सेतोः निर्माणं</u>** ...................... क्रियते।

(क) सेतोर्निर्माणम् (ख) सेतुनिर्माणम् (ग) सेतूर्निर्माणम् (घ) सेतोनिर्माणम्

2. **<u>ब्रह्मायुः</u>** ...................... शतं वर्षाणि मन्यते।

(क) ब्रह्मणम् आयुः (ख) ब्रह्मणा आयुः (ग) ब्रह्मणः आयुः (घ) ब्रह्मणि आयुः

3. कालः सर्वं **<u>क्रियायाः कलापः, तम्</u>** ...................... पश्यति।

(क) क्रियाकलापः (ख) क्रियाकलापेन (ग) क्रियाकलापम् (घ) क्रियाकलापाम्

4. **<u>गुरुवचनं</u>** ...................... शिष्यैः उपादेयम्।

(क) गुरुः वचनम् (ख) गुरुणा वचनम् (ग) गुरवे वचनम् (घ) गुरोः वचनम्

5. जीवितं **<u>न अवद्यं</u>** ...................... भवेत्।

(क) अनवद्यम् (ख) अवद्यः (ग) अनवद्या (घ) नावद्यम्

6. **<u>अधिगतानि तत्त्वानि येन सः</u>** ...................... गुरुः भवति।

(क) अधिगततत्त्वानि (ख) अधिगततत्त्वः (ग) अधिगततत्त्वम् (घ) अधिगततत्त्वेन

## (ग) कोष्ठकात् शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत –

1. अनेन सदृशो महापुरुषः ...................... नास्ति। (त्रिलोके / त्रिलोक्याम्)
2. सः ...................... फलानि खादति। (यथेच्छया / यथेच्छम्)
3. ...................... सरः दृष्ट्वा कः न प्रसीदति? (विकसितपङ्कजः / विकसितपङ्कजम्)
4. ...................... वेदान्तस्य प्रचारः कृतः। (स्वामिविवेकानन्देन / स्वामीविवेकानन्देन)
5. रामः ...................... धावति। (अनुमृगम् / अनुमृगः)
6. सः पण्डितः ...................... अस्ति। (विद्याधनः / विद्याधनम्)

## (घ) अधोलिखितान् सङ्केतान् आधृत्य वर्गप्रहेलिकायां रिक्तस्थानपूर्तिं कृत्वा समस्तपदानि रचयत –

**वामतः दक्षिणम्**

1. जनानाम् अभावः
2. वृक्षस्य समीपम्
6. द्वादश अक्षाः यस्मिन् तत्

**उपरिष्टात् अधः**

1. निर्गता बाधा यस्याः सा
3. वृक्षस्य मूलम्
4. अहिं भुङ्क्ते इति तम्

8. विमूढा धीः यस्य सः
9. शीतलं सलिलम्
11. पङ्कात् जायते इति
12. महान् देवः
15. अहः च रात्रिः च तयो समाहारः
19. जले मग्नः
20. पुस्तकानाम् आलयः
21. सप्तानां पदानां समाहारः

5. न कातरः
7. जलं ददाति इति
10. चित्रेण सहितम्
13. देवस्य आलयः
14. फलानि च पुष्पाणि च
15. रूपस्य योग्यम्
16. राज्ञः पुत्रः
17. नखैः भिन्नः
18. सप्तानाम् अह्नां समाहारः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 नि | | | 2 | | 3 वृ | क्षम् | × | 4 अ |
| | 5 | | 6 द्वा | द | | | × | हि |
| | | 7 | × | 8 | | | धीः | |
| 9 | त | | 10 स | लि | लम् | 11 प | | |
| | रः | | | 12 | | 13 दे | वः | 14 |
| 15 | | 16 रा | त्रम् | | | | 17 न | |
| | 18 | 19 | | म | ग्नः | | ख | पु |
| रू | | 20 पु | | | ल | यः | | ष्पा |
| पम् | हः | त्रः | 21 स | प्त | | | | णि |

## (ङ) अधोलिखितानि समस्तपदानि समुचितेन विग्रहेण सह मेलयत –

| | समासः | विग्रहः |
|---|---|---|
| यथा – | सम्पूर्णघटः | विद्यया हीनः |
| | वृक्षमूलम् | नीलम् कमलम् |
| | कार्यनिपुणः | सम्पूर्णः घटः |
| | प्रतिपदम् | पीतानि अम्बराणि यस्य सः |
| | नीलकमलम् | वृक्षस्य मूलम् |
| | पीताम्बरः | कार्येषु निपुणः |
| | विद्याहीनः | पदं पदं प्रति |

# तृतीयः अभ्यासः

# प्रत्ययाः

❖ अधः प्रदत्तम् आरेखं पश्य

प्रत्ययाः
- (क) कृत्प्रत्ययाः
- (ख) तद्धितप्रत्ययाः
- (ग) स्त्रीप्रत्ययौ

## ( क ) कृत्प्रत्ययाः

- पूर्वकक्षासु वयं क्त्वा, ल्यप्, तुमुन्, क्त, क्तवतु प्रत्ययान् पठितवन्तः। एते सर्वेऽपि प्रत्ययाः कृत्प्रत्ययाः सन्ति।
- कृत्प्रत्ययाः धातुभिः सह प्रयुक्ताः भवन्ति।
- अधुना अन्यान् कृत्प्रत्ययान् पठामः।

## तव्यत्-अनीयर् - प्रत्ययौ

❖ एषः अस्माकं पुस्तकालयः अत्र द्वे सूचनापट्टे स्तः। अत्र लिखितान् निर्देशान् पठत –

| किं कर्त्तव्यम् | किं न कर्त्तव्यम् |
|---|---|
| 1. पुस्तकालये अनुशासनं **पालनीयम्**। | 1. कोलाहलः न **कर्त्तव्यः**। |
| 2. पुस्तकालये पठित्वा पुस्तकानि उत्पीठिकायाम् एव **त्यक्तव्यानि**। | 2. पुस्तकेषु किमापि न **लेखनीयम्**। |
| 3. पुस्तकालयाध्यक्षस्य अनुमत्या एव पुस्तकानि बहिः **नेतव्यानि**। | 3. चित्राणि न **दूषयितव्यानि**। |
| 4. समाचारपत्रं पत्राधानिकायाम् एव **पठनीयम्**। | 4. अनुमतिं विना पुस्तकानि बहिः न **नेतव्यानि**। |

❖ उपरिलिखितेषु निर्देशेषु रेखाङ्कितपदानां प्रकृतिप्रत्ययविभागं जानीत –

| प्रकृतिः ( धातुः ) | + | प्रत्ययः | = | प्रत्ययुक्तपदम् |
|---|---|---|---|---|
| पाल् | + | अनीयर् | = | पालनीय – पालनीयम् |
| त्यज् | + | तव्यत् | = | त्यक्तव्य – त्यक्तव्यानि |

| | | | | |
|---|---|---|---|---|
| नी | + | तव्यत् | = | नेतव्य – नेतव्यानि |
| पठ् | + | अनीयर् | = | पठनीय – पठनीयम् |
| कृ | + | तव्यत् | = | कर्त्तव्य – कर्त्तव्यः |
| लिख् | + | अनीयर् | = | लेखनीय – लेखनीयम् |
| दूष् | + | तव्यत् | = | दूषयितव्य – दूषयितव्यानि |

**अवधातव्यम् –**

- तव्यदनीयर् – प्रत्यययोः प्रयोगः विधिलिङ्लकारार्थे कर्मवाच्ये भाववाच्ये वा भवति।
- तव्यत् प्रत्ययस्य 'तव्य' अनीयर् प्रत्ययस्य च 'अनीय' अवशिष्यते।

**यथा –**

| | | | | | | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|---|---|---|---|
| पठ् | + | तव्यत् | = पठितव्य | = | | पठितव्यः | पठितव्या | पठितव्यम् |
| पठ् | + | अनीयर् | = पठनीय | = | | पठनीयः | पठनीया | पठनीयम् |

- कर्मवाच्ये कर्तृपदं तृतीयाविभक्तौ, कर्मपदं च प्रथमाविभक्तौ भवतः।
- तव्यदनीयर् – प्रत्ययान्तपदं कर्मपदानुसारमेव प्रथमाविभक्तौ भवति।
- भाववाच्ये तु कर्मपदं न भवति अतः तव्यदनीयर् – प्रत्ययान्तपदं सदा नपुंसकलिङ्गे प्रथमाविभक्तौ एकवचने एव भवति।
- तव्यदनीयर् – प्रत्ययस्य प्रयोगः विशेषणरूपेण अपि भवति।

❖ **अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ पृथक् कृत्वा लिखत –**

| | वाक्यम् | तृतीयान्तकर्तृपदम् | प्रथमान्तकर्मपदम् |
|---|---|---|---|
| यथा – | बालकैः प्रातः दुग्धं **पातव्यम्**। | बालकैः | दुग्धम् |
| 1. | त्वया असत्यं न **वक्तव्यम्**। | ...................... | ...................... |
| 2. | तेन लेखः **लेखितव्यः**। | ...................... | ...................... |
| 3. | अस्माभिः पुस्तकानि **पठितव्यानि**। | ...................... | ...................... |
| 4. | युवाभ्यां यथाशक्ति प्रयत्नः **कर्तव्यः**। | ...................... | ...................... |
| 5. | छात्रैः देशस्य रक्षा **करणीया**। | ...................... | ...................... |
| 6. | जनैः सौन्दर्यमयी सृष्टिः **रक्षितव्या**। | ...................... | ...................... |
| 7. | मया परहिताय सर्वस्वं **त्यक्तव्यम्**। | ...................... | ...................... |
| 8. | युष्माभिः प्रशस्तः मार्गः एव **अनुसरणीयः**। | ...................... | ...................... |

❖ विधिलिङ् -क्रियापदस्य स्थाने 'तव्यत्' प्रत्ययस्य प्रयोगं कृत्वा पुनः वाक्यानि लेखनीयानि -

| | | | |
|---|---|---|---|
| **यथा** - पीयूषः पाठं पठेत्। | पीयूषेण | पाठः | पठितव्यः। |
| 1. विजया भोजनं कुर्यात्। | .................... | .................... | .................... |
| 2. सः गुरुं नमेत्। | .................... | .................... | .................... |
| 3. बालिकाः उद्याने क्रीडेयुः। | .................... | .................... | .................... |
| 4. जनाः प्रधानमन्त्रिकोषे धनं यच्छेयुः। | .................... | .................... | .................... |
| 5. वयं पुस्तकानि पठेम। | .................... | .................... | .................... |
| 6. यूयं समाचारपत्राणि पश्येत। | .................... | .................... | .................... |

❖ अधोलिखितानि वाक्यानि पठत अवगच्छत च -

1. बालकैः जन्तुशाला द्रष्टव्या। बालकैः जन्तुशाला दर्शनीया।
2. त्वया पाठः स्मर्तव्यः। त्वया पाठः स्मरणीयः।
3. मया पत्रं लेखितव्यम्। मया पत्रं लेखनीयम्।

अत्र किम् अवगतम्?

**अत्र अवगतं यत् 'तव्यत्' इति प्रत्ययस्य स्थाने 'अनीयर्' 'प्रत्ययस्य अपि प्रयोगः भवितुं शक्यते।'**

❖ अधः वाक्येषु तव्यत्-अनीयर्-प्रत्ययौ प्रयुज्य पुनः वाक्यानि लिखत -

उदाहरणम्

सः अत्र प्रवेशं न कुर्यात्।

(क) तव्यत् - तेन अत्र प्रवेशः न कर्तव्यः।

(ख) अनीयर् - तेन अत्र प्रवेशः न करणीयः।

1. दर्शकाः पशून् न पीडयेयुः।
   (क) तव्यत् - ..............................................................
   (ख) अनीयर् - ..............................................................
2. पथिकः बसयानात् हस्तं बहिः न कुर्यात्?
   (क) तव्यत् - ..............................................................
   (ख) अनीयर् - ..............................................................
3. गोविन्दः ग्रन्थालये ग्रन्थम् उच्चैः न पठेत्।
   (क) तव्यत् - ..............................................................
   (ख) अनीयर् - ..............................................................

❖ **अधोलिखितेषु वाक्येषु तव्यत् – प्रत्ययस्य स्थाने अनीयर् – प्रत्ययस्य प्रयोगः करणीयः –**

| | | | |
|---|---|---|---|
| **यथा** – छात्रैः पाठः पठितव्यः। | छात्रैः | पाठः | पठनीयः। |
| 1. मालाकारेण पुष्पाणि चेतव्यानि। | ..................... | ..................... | ..................... |
| 2. कथाकारेण कथा कथयितव्या। | ..................... | ..................... | ..................... |
| 3. अस्माभिः गुरवः सदा पूजयितव्याः। | ..................... | ..................... | ..................... |
| 4. त्वया कुमार्गः त्यक्तव्यः। | ..................... | ..................... | ..................... |
| 5. सर्वैः महापुरुषाणां चरितानि स्मर्तव्यानि। | ..................... | ..................... | ..................... |

❖ **अनीयर् – प्रत्ययस्य स्थाने तव्यत् – प्रत्ययस्य प्रयोगः करणीयः –**

| | | | |
|---|---|---|---|
| **यथा** – प्रातः उद्याने भ्रमणीयम्। | प्रातः | उद्याने | भ्रमितव्यम्। |
| 1. नृपेण प्रजाः पालनीयाः। | ..................... | ..................... | .....................। |
| 2. त्वया धर्मग्रन्थाः श्रवणीयाः। | ..................... | ..................... | .....................। |
| 3. अस्माभिः अपरेषां गुणाः एव अनुकरणीयाः। | ..................... | ..................... | .....................। |
| 4. कृषकैः पशवः स्नेहेन रक्षणीयाः। | ..................... | ..................... | .....................। |
| 5. छात्रैः प्रातः उत्थाय ईशः स्मरणीयः। | ..................... | ..................... | .....................। |

❖ **अधोलिखितेषु वाक्येषु कोष्ठकनिर्दिष्टैः उचितपदैः रिक्तस्थानानि पूरयत –**

| | |
|---|---|
| 1. बालिकाभिः राष्ट्रगीतं .....................। | (गै + तव्यत् ) |
| 2. छात्रैः उपदेशाः .....................। | (पाल् + अनीयर्) |
| 3. युष्माभिः शुद्धं जलं .....................। | (पा + अनीयर्) |
| 4. मुनिभिः तपः .....................। | (कृ + अनीयर्) |
| 5. न्यायधीशेन न्यायः .....................। | (कृ + अनीयर्) |
| 6. भवत्या पाठः .....................। | (लिख् + अनीयर्) |
| 7. विद्वद्भिः कविताः .....................। | (रच् + अनीयर्) |
| 8. अस्माभिः श्लोकाः .....................। | (पठ् + तव्यत्) |
| 9. पत्रवाहकेन पत्राणि .....................। | (आ + नी+ तव्यत्) |
| 10. राज्ञा प्रजाः .....................। | (पाल् + तव्यत्) |
| 11. माता-पितृभ्यां पुत्राः पुत्र्यः च .....................। | (पठ् (णिच्) + अनीयर्) |
| 12. कृषकैः पशवः स्नेहेन .....................। | (रक्ष् + अनीयर्) |

## विशेषणरूपेण प्रयोगः

यथा – अहो! कीदृशं रमणीयम् उद्यानम्।

अहो! एषा द्रष्टव्या नगरी।

❖ 'क' स्तम्भे विशेषणानि 'ख' स्तम्भे विशेष्यानि सन्ति तेषां उचितमेलनं कुरुत –

| 'क' स्तम्भः | | 'ख' स्तम्भः | |
|---|---|---|---|
| 1. | रमणीया | (क) | पुष्पाणि |
| 2. | आचरणीयम् | (ख) | अश्वानाम् |
| 3. | पालनीयानाम् | (ग) | गीतम् |
| 4. | उल्लेखनीयायाः | (घ) | माता |
| 5. | दर्शनीयेषु | (ङ) | सृष्टिः |
| 6. | चयनीयानि | (च) | पुस्तकाभ्याम् |
| 7. | पूजनीया | (छ) | पर्यटनस्थलेषु |
| 8. | रक्षणीयायै | (ज) | कर्म |
| 9. | श्रवणीयम् | (झ) | कथायाः |
| 10. | पठनीयाभ्याम् | (ञ) | मातृभूम्यै |

## शतृ-प्रत्ययः

❖ इदानीं पुनरावृत्तिं कुर्मः। भवद्भिः नवमकक्षायां शतृप्रत्ययस्य विषये पठितम् –

1. **उदाहरणम् अनुसृत्य शतृ-प्रत्ययान्तपदैः वाक्यं योजयत –**

(क) बालकः पठति। बालकः लिखति।

पठन् बालकः लिखति।

(ख) बालिका पठति। बालिका लिखति।

पठन्ती बालिका लिखति।

(ग) शिक्षकः शिक्षयति। शिक्षकः फलं दर्शयति।

शिक्षयन् शिक्षकः फलं दर्शयति।

(घ) शिक्षिका शिक्षयति। शिक्षिका फलं दर्शयति।

.................... शिक्षिका फलं दर्शयति।

(ङ) बालकः धावति। बालकः हसति।

.................... बालकः हसति।

(च) बालिका धावति। बालिका हसति।

...................... बालिका हसति।

(छ) गौरवः गच्छति। गौरवः आचार्यं नमति।

...................... गौरवः आचार्यं नमति।

(ज) राधिका गच्छति। राधिका आचार्यं नमति।

...................... राधिका आचार्यं नमति।

| धातुः | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| पठ् | पठन् | पठन्ती | पठत् |
| शिक्ष् | शिक्षयन् | शिक्षयन्ती | शिक्षयत् |
| धाव् | धावन् | धावन्ती | धावत् |
| गम् | गच्छन् | गच्छन्ती | गच्छत् |
| हस् | हसन् | हसन्ती | हसत् |

संस्कृतभाषायाम् उपरि वाक्येषु प्रयुक्ताः धातवः 'परस्मैपदिनः' मन्यन्ते। एतैः सह शतृप्रत्ययस्य प्रयोगः क्रियते। एवम् एव संस्कृतभाषायां धातूनाम् अन्यः वर्गः अपि भवति यस्मिन् लभ्-सेव्-वृध्-सह्-यत्-इत्यादयः धातवः भवन्ति। एषः वर्गः 'आत्मनेपदी' इति कथ्यते।

**यथा**–परस्मैपदि-धातुभिः सह शतृ-प्रत्ययस्य प्रयोगः भवति तथैव अस्मिन् एव अर्थे आत्मनेपदिधातुभिः सह शानच्-प्रत्ययस्य प्रयोगः भवति।

## शानच् प्रत्ययः

| धातुः | पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|
| सेव् | सेवमानः | सेवमाना | सेवमानम् |
| लभ् | लभमानः | लभमाना | लभमानम् |
| सह् | सहमानः | सहमाना | सहमानम् |
| वृध् | वर्धमानः | वर्धमाना | वर्धमानम् |
| यत् | यतमानः | यतमाना | यतमानम् |

➔ एतेषां रूपाणि क्रमशः देववत्, लतावत्, फलवत् भवन्ति।

❖ **अधोलिखितम् उदाहरणम् अनुसृत्य त्रिषु लिङ्गेषु 'शानच्' प्रत्ययान्त-रूपाणि लिखत –**

| | धातुः | पुल्लिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|---|---|
| यथा – | प्र+यत् | प्रयतमानः | प्रयतमाना | प्रयतमानम् |
| 1. | कम्प् | .................... | .................... | .................... |
| 2. | वन्द् | .................... | .................... | .................... |
| 3. | सेव् | .................... | .................... | .................... |
| 4. | प्र+काश् | .................... | .................... | .................... |
| 5. | मुद् (मोद्) | .................... | .................... | .................... |

❖ **कोष्ठके दत्तानां धातूनां शानच्-प्रत्ययान्त-रूपेण रिक्तस्थानानि पूरयत –**

**यथा – वन्दमानः** स आशिषं लभते। (वन्द्)

1. शनैः .................... सा वैभवं प्राप्नोति। (वृध् / वर्ध् )
2. .................... नक्षत्रैः आकाशः दीव्यति। (प्र + काश्)
3. कष्टानि .................... वीराः कीर्तिं लभन्ते। (सह्)
4. .................... वृक्षेभ्यः पुष्पाणि पतन्ति। (कम्प्)
5. .................... जनाः साफल्यम् आप्नुवन्ति। (प्र+यत् )

❖ **उदाहरणम् अनुसृत्य शानच्-प्रयोगेन वाक्यद्वयस्य स्थाने वाक्यम् एकं रचयत –**

**यथा –** छात्रः दीनान् **सेवते**। छात्रः मोदते। दीनान् **सेवमानः** छात्रः मोदते।

1. लताः **कम्पन्ते**। लताभ्यः पुष्पाणि पतन्ति। .................... लताभ्यः पुष्पाणि पतन्ति।
2. कमलानि जले **जायन्ते**। कमलेभ्यः परागः पतति। जले .................... कमलेभ्यः परागः पतति।
3. ते **मोदन्ते**। ते गायन्ति। .................... ते गायन्ति।
4. सैनिकाः **युध्यन्ते**। सैनिकाः देशं रक्षन्ति। .................... सैनिकाः देशं रक्षन्ति।
5. दिलीपः गां **सेवते**। दिलीपः सिहं पश्यति। गां .................... दिलीपः सिहं पश्यति।
6. बालिका चित्रम् **ईक्षते**। सा प्रसन्ना भवति। चित्रं .................... बालिका प्रसन्ना भवति।
7. छात्रः पुरस्कारं **लभते**। छात्रः प्रसन्नः भवति। पुरस्कारं .................... छात्रः प्रसन्नः भवति।
8. पुत्रः मातापितरौ **सेवते**। सः स्वकर्तव्यं निर्वहति। मातापितरौ .................... पुत्रः स्वकर्तव्यं निर्वहति।

## ध्यातव्यम्

शानच्-प्रत्ययान्त-पदानां प्रयोगः विशेषणरूपेण भवति। अतः विशेषणस्य लिङ्ग-विभक्ति-वचनानि तु सर्वदा विशेष्य-पदानुसारं भवन्ति।

❖ **अधोलिखितानां विशेषणपदानां समुचितविशेष्यपदैः सह मेलनं कुरुत –**

| | | | | | |
|---|---|---|---|---|---|
| 1. | वर्धमानः | (क) | वृक्षात् | यथा वर्धमानः | बालः |
| 2. | प्रार्थयमानम् | (ख) | बालः | ...................... | ...................... |
| 3. | वन्दमानया | (ग) | भक्तम् | ...................... | ...................... |
| 4. | सेवमानाय | (घ) | बालिकया | ...................... | ...................... |
| 5. | कम्पमानात् | (ङ) | छात्राय | ...................... | ...................... |

## ( ख ) तद्धितप्रत्ययाः

### मतुप् प्रयोगः

**तद्धितप्रत्ययाः संज्ञाशब्दैः सह प्रयुक्ताः भवन्ति।**

❖ अधोलिखितानि वाक्यानि पठत स्थूलाक्षराणि पदानि च समक्षं लिखत –

1. **शक्तिमान्** जनः रक्षति सर्वम्। ..............................
2. **बुद्धिमान्** नरः विचारशीलः भवति। ..............................
3. **गुणवान्** जनः यशः प्राप्नोति। ..............................
4. **धनवान्** नरः दानेन शोभते। ..............................
5. **श्रद्धावान्** छात्रः लभते ज्ञानम्। ..............................

❖ किं भवन्तः उपर्युक्तपदानाम् अर्थं जानन्ति? पश्यन्तु अत्र, उदाहरणं च अनुसृत्य रिक्तस्थानानि पूरयन्तु –

| | पदानि | अर्थः | | | |
|---|---|---|---|---|---|
| 1. | शक्तिमान् | शक्तियुक्तः | शक्तिः | अस्य | अस्ति। |
| 2. | बुद्धिमान् | ...................... | ...................... | ...................... | ......................। |
| 3. | गुणवान् | ...................... | ...................... | ...................... | ......................। |
| 4. | धनवान् | ...................... | धनम् | ...................... | ......................। |
| 5. | श्रद्धावान् | ...................... | ...................... | ...................... | ......................। |

❖ किं जानन्ति यत् एतेषां शब्दानां निर्माणं कथं भवति पश्यन्तु –

1. शक्ति + मतुप् = शक्तिमत् शक्तिमान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)
2. बुद्धि + मतुप् = बुद्धिमत् बुद्धिमान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)
3. गुण + मतुप् = गुणवत् गुणवान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)

**परं कुत्रचित् 'मत्' दृश्यते, कुत्रचित् च 'वत्' दृश्यते, एतत् कथम्? जानन्तु—**

4. धन + मतुप् = धनवत् धनवान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)
5. श्रद्धा + मतुप् = श्रद्धावत् श्रद्धावान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)
6. यशस् + मतुप् = यशस्वत् यशस्वान् (पुंलिङ्गम्, प्रथमाविभक्तिः, एकवचनम्)

एवं ज्ञायते यत् उपर्युक्तपदानि मतुप्–प्रत्ययेन युक्तानि सन्ति। अकारान्त / आकारान्त, सकारान्त शब्दानां योगे मतुप् (मत्) स्थाने (वत्) भवति।

## ❖ अधोलिखितं गद्यांशं पठत –

पुरा मेवाडराज्ये शक्तिमान् नृपः प्रतापः आसीत्। तस्य नीतिमान् पूर्वमन्त्री भामाशाहः आसीत्। राज्ञः श्रद्धावन्तः सैनिकाः तेन सह वने अवसन्। बुद्धिमान् प्रतापः राज्यस्य रक्षायै पुनः पुनः प्रयत्नम् अकरोत् परं धनाभावे सेनाभावे च असफलः जातः। तदा धनवान् मन्त्री राज्यस्य रक्षायै विपुलं धनम् अयच्छत्। धन्याः एतादृशाः गुणवन्तः जनाः ये देशहिताय सर्वम् अर्पयन्ति।

➔ **अधः प्रदत्तम् उदाहरणम् अनुसृत्य उचितैः विशेषणैः रिक्तस्थानानि पूरयत तेषां प्रकृतिप्रत्यय-विभागमपि कुरुत–**

| | विशेषणानि | प्रकृतिः | + | प्रत्ययः | विशेष्यानि |
|---|---|---|---|---|---|
| 1. | शक्तिमान् | शक्ति | + | मतुप् | नृपः |
| 2. | ..................... | ..................... | + | ..................... | पूर्वमन्त्री |
| 3. | ..................... | ..................... | + | ..................... | सैनिकाः |
| 4. | ..................... | ..................... | + | ..................... | प्रतापः |
| 5. | ..................... | ..................... | + | ..................... | मन्त्री |
| 6. | ..................... | ..................... | + | ..................... | जनाः |

➔ **अत्र वयं पश्यामः यत् मतुप्-प्रत्ययान्तपदानि विशेषणानि भवन्ति।**

## ❖ अधोलिखितं संवादं पठित्वा मतुप्-प्रत्ययान्त-विशेषणैः रिक्तस्थानानि पूरयत –

**अध्यापकः** – ..................... (बुद्धि + मतुप्) छात्राः! संसारेऽस्मिन् कः श्रेष्ठः?

**सुजयः** – आचार्य! यः ..................... (धन + मतुप्), ..................... (रूप + मतुप्) च नरः भवति, जनाः तम् एव श्रेष्ठं मन्यन्ते।

**श्रुतिः** – आचार्य! अहं वदानि, यः ................ (सदाचार + मतुप्), विवेकी, ............. (नीति + मतुप्), ..................... (शक्ति + मतुप्) च भवति सः श्रेष्ठः।

**प्रिया** – आचार्य! अहं चिन्तयामि, .................. (विद्या + मतुप्), ................... (चरित्र + मतुप्) च जनः एव सर्वोत्तमः भवति।

**श्रेष्ठा** – आचार्य! मम पक्षम् अपि शृणोतु। यः सत्यवादी, ..................... (निष्ठा + मतुप्), ..................... (विनय + मतुप्), ..................... (कीर्ति + मतुप्) देशभक्तः च अस्ति स एव श्रेष्ठः।

**अध्यापकः** – सत्यमेतत्, यः ................... (सदाचार + मतुप्), विपत्सु च ............... (धृति + मतुप्) .............. (यशस् + मतुप्) च भवेत् सः देशभक्तः एव समाजे ............. (गुण + मतुप्) श्रेष्ठः च मन्यते। वीराः अभ्युदये ..................... (क्षमा + मतुप्) भवन्ति युधि च ..................... (धैर्य + मतुप्) भवन्ति।

**ध्यातव्यम्**

मतुप्–प्रत्ययः संज्ञाशब्दैः सह प्रयुज्यते।

- **यथा –** शक्ति + मतुप् – शक्तिमान्

  धन + मतुप् – धनवान्
- अयं प्रत्ययः 'युक्तः'/अस्य अस्ति/अस्मिन् अस्ति वा इति अर्थे प्रयुज्यते।
- 'मतुप्' प्रत्ययेन युक्तः शब्दः विशेषणं भवति।

  **यथा –** शक्तिमान् जनः।
- मत् स्थाने वत्

  यदा शब्दस्य अन्ते स् अथवा अ/आ/वर्गीय – प्रथमचत्वारः वर्णाः स्युः तदा मत् स्थाने वत् भवति।

  **यथा –** रूप+मतुप् – रूपवत्

  यशस्+मतुप् – यशस्वत् –

  भास्+मतुप् – भास्वत्

एतेषां रूपाणि पुंलिङ्गे भवत् शब्दवत्, स्त्रीलिङ्गे नदीवत् नपुंसकलिङ्गे जगत् शब्दवत् भवन्ति।

| बुद्धिमत् | | | |
|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **पुंलिङ्गम्** | बुद्धिमान् | बुद्धिमन्तौ | बुद्धिमन्तः |
| **स्त्रीलिङ्गम्** | बुद्धिमती | बुद्धिमत्यौ | बुद्धिमत्यः |
| **नपुंसकलिङ्गम्** | बुद्धिमत् | बुद्धिमती | बुद्धिमन्ति |

| गुणवत् | | | |
|---|---|---|---|
| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| **पुंलिङ्गम्** | गुणवान् | गुणवन्तौ | गुणवन्तः |
| **स्त्रीलिङ्गम्** | गुणवती | गुणवत्यौ | गुणवत्यः |
| **नपुंसकलिङ्गम्** | गुणवत् | गुणवती | गुणवन्ति |

## णिनि ( इन् )

❖ अधोलिखितानि वाक्यानि ध्यानेन पठित्वा रेखाङ्कितानि पदानि समक्षं लिखत –

1. नमन्ति **फलिनो** वृक्षाः। ........................
2. नमन्ति **गुणिनो** जनाः। ........................
3. **परिश्रमिणः** बालाः विद्यां लभन्ते। ........................
4. **धनी** जनः दानेन शोभते। ........................
5. श्रीकृष्णः **योगी** अस्ति। ........................
6. **ज्ञानी** पुरुषः समदर्शी भवति। ........................

❖ किं भवन्तः एतेषां पदानाम् अर्थं जानन्ति ? अत्र पश्यन्तु उदाहरणं च अनुसृत्य तेषाम् अर्थं लिखन्तु –

| | | | | | |
|---|---|---|---|---|---|
| फलिनः | = | फलयुक्ताः | गुणिनः | = | ........................ |
| परिश्रमिणः | = | ........................ | योगी | = | ........................ |
| धनी | = | धनयुक्तः | ज्ञानी | = | ........................ |

❖ एतेषाम् अर्थं ज्ञात्वा वयं जानीमः यत् एतानि पदानि विशेषणपदानि सन्ति।
अत्र विशेषण-विशेष्यसन्दर्भः कीदृशः अस्ति इति पश्यामः –

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| 1. | फलिनः | वृक्षाः |
| 2. | गुणिनः | जनाः |
| 3. | परिश्रमिणः | बालाः |
| 4. | धनी | जनः |
| 5. | योगी | श्रीकृष्णः |
| 6. | ज्ञानी | पुरुषः |

❖ किं वचनदृष्ट्या एतेषु पदेषु कोऽपि भेदः अस्ति ? पश्यन्तु –

1, 2, 3-क्रमाङ्कपदानि बहुवचने सन्ति।

4, 5, 6-क्रमाङ्कपदानि एकवचने सन्ति।

❖ किं ज्ञायते उपर्युक्तस्थूलपदेषु कः प्रत्यय ? –

तत्र 1 , 2, 3-क्रमाङ्कपदेषु अन्ते 'इनः' दृश्यते।

4, 5, 6-क्रमाङ्कपदेषु अन्ते 'ई' दृश्यते।

**एतेषु 'णिनि' प्रत्ययः एव अस्ति। वचनभेदात् स्वरूपभेदः।**

**यथा – फलिनः ( बहुवचनम् ) धनी ( एकवचनम् )**

❖ **अधोलिखितानाम् पदानां परिचयम् उदाहरणम् अनुसृत्य लिखत –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | लिङ्गम् |
|---|---|---|---|---|---|
| 1. | फलिनः | फल | णिनि | फलिन् | पुं० |
| 2. | गुणिनः | गुण | णिनि | गुणिन् | पुं० |
| 3. | परिश्रमिणः | ..................... | ..................... | ..................... | ..................... |
| 4. | धनी | धन | णिनि | धनिन् | पुं० |
| 5. | योगी | ..................... | ..................... | ..................... | ..................... |
| 6. | ज्ञानी | ..................... | ..................... | ..................... | ..................... |

**अस्माभिः अधीतम्**

1. 'णिनि' प्रत्ययः संज्ञाशब्दात् मतुप्वत् 'युक्तः' इत्यर्थे भवति।
   **यथा** – फलिनः – (फल+णिनि) फलैः युक्ताः अथवा फलानि सन्ति एतेषु इति।
   धनी (धन+णिनि) – धनेन युक्तः अथवा धनम् अस्ति अस्य इति।
2. णिनि – प्रत्यययुक्तानि पदानि विशेषणपदानि सन्ति। अतः एतेषां रूपाणि त्रिषु लिङ्गेषु भवन्ति।

❖ **अधः प्रदत्तशब्दैः सह उदाहरणम् अनुसृत्य 'णिनि' प्रत्ययं योजयित्वा लिखत –**

| | शब्दः+प्रत्ययः | | मूलशब्दः | अर्थः | प्रथमा |
|---|---|---|---|---|---|
| **यथा** – | दण्ड + णिनि | = | दण्डिन् | दण्डयुक्तः | दण्डी |
| 1. | दान + णिनि | = | ..................... | ..................... | ..................... |
| 2. | विवेक + णिनि | = | ..................... | ..................... | ..................... |
| 3. | सुख + णिनि | = | ..................... | ..................... | ..................... |
| 4. | प्राण + णिनि | = | ..................... | ..................... | ..................... |
| 5. | देह + णिनि | = | ..................... | ..................... | ..................... |
| 6. | क्रोध + णिनि | = | ..................... | ..................... | ..................... |

❖ **अधोलिखितां तालिकां पूरयत –**

| | शब्दः+प्रत्ययः | रूपाणि | पुंल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|---|---|
| **यथा** – | उद्योग + णिनि | उद्योगिन् | उद्योगी | उद्योगिनी | उद्योगि |
| 1. | अर्थ + णिनि | ............. | ............. | ............. | ............. |
| 2. | संसार + णिनि | ............. | ............. | ............. | ............. |
| 3. | धन + णिनि | ............. | ............. | ............. | ............. |
| 4. | सुख + णिनि | ............. | ............. | ............. | ............. |
| 5. | मान + णिनि | ............. | ............. | ............. | ............. |

❖ कोष्ठकात् उचितपदम् आदाय रिक्तस्थानपूर्तिं क्रियताम् –

यथा – अभिमानी मानं न लभते। (अभिमानी / अभिमानिनः)

1. ...................... सदा सम्मान्याः भवन्ति। (विज्ञानी / विज्ञानिनः)
2. ...................... शान्तिं न प्राप्नोति। (लोभिनः / लोभी)
3. ...................... धन्याः लोके। (दानी / दानिनः)
4. ...................... विवेकः नश्यति। (क्रोधी / क्रोधिनः)
5. किं कुलेन विशालेन विद्याहीनस्य ...................... ? (देही / देहिनः)
6. ...................... जनः सर्वप्रियः भवति। (विनोदिनः / विनोदी)
7. सर्वे ...................... भवन्तु । (सुखी / सुखिनः)
8. ...................... इयं बाला। (व्यवसायी / व्यवसायिनी)

## मिश्रितप्रश्नाः

❖ अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु प्रकृति-प्रत्ययविभागं कुरुत –

| | प्रकृतिः | + | प्रत्ययः |
|---|---|---|---|
| यथा – **बुद्धिमान्** सर्वत्र पूज्यते। | बुद्धि | + | मतुप् |
| 1. **बलवती** हि आशा। | ...................... | + | ...................... |
| 2. **उद्योगिनं** पुरुषसिंहमुपैति लक्ष्मीः। | ...................... | + | ...................... |
| 3. **गुणिषु** गुणाः पूजास्थानं भवन्ति। | ...................... | + | ...................... |
| 4. **नीतिमान्** जनः सुष्ठु आचरति। | ...................... | + | ...................... |

## ठक् ( इक )

❖ अधः प्रदत्तानि वाक्यानि ध्यानेन पठत रेखाङ्कितानि पदानि तेषां प्रकृति-प्रत्ययविभागं च अवगच्छत –

| | | |
|---|---|---|
| 1. | मनुष्यः **सामाजिकः** प्राणी अस्ति। | समाज + ठक् |
| 2. | 'पर्यावरण-रक्षणम्' अस्माकं **नैतिकं** कर्तव्यम् अस्ति। | नीति + ठक् |
| 3. | अद्यत्वे **औद्योगिकः** विकासः सर्वत्र दृश्यते। | उद्योग + ठक् |
| 4. | विद्यया **लौकिकी** **अलौकिकी** च उन्नतिः भवति। | लोक + ठक् |
| 5. | मम गृहे **माङ्गलिकः** कार्यक्रमः सम्पत्स्यते। | मङ्गल + ठक् |

❖ उपरिलिखितेषु वाक्येषु रेखाङ्कितानि पदानि प्रकृतिप्रत्यय-विभागेन सह लिखत –

| | |
|---|---|
| सामाजिकः | समाज + ठक् |
| ...................... | ...................... |
| ...................... | ...................... |
| ...................... | ...................... |
| ...................... | ...................... |

### चिन्तनीयम्

क. उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानाम् अन्ते कः प्रत्ययः प्रयुक्तः ?

ख. एतेषु पदेषु मूलशब्दः कः अस्ति ?

ग. एतेषां पदानां शब्दस्य प्रथमस्वरे (आदिस्वरे) किं परिवर्तनं दृश्यते ?

घ. एतानि पदानि वाक्ये 'विशेषण' – रूपेण प्रयुक्तानि सन्ति वा 'विशेष्य'-रूपेण।

**एतेषां चिन्तनीयप्रश्नानाम् उत्तराणि अग्रे पश्यामः –**

2. वयं पश्यामः यत् रेखाङ्कितपदानि एवम्भूतानि सन्ति –

| (क) | पदानि | मूलशब्दः | प्रत्ययः | शब्दस्य प्रथमस्वरे-वृद्धिः |
|---|---|---|---|---|
| 1. | सामाजिकः (पु.) | समाज | ठक् (इक) | (स्+अ)-अ स्थाने आ = (स ⇨ सा) |
| 2. | नैतिकम् (नपु.) | नीति | ठक् (इक) | (न्+ई) – 'ई' स्थाने 'ऐ' = (नी ⇨ नै) |
| 3. | औद्योगिकः (पु.) | उद्योग | ठक् (इक) | 'उ' स्थाने 'औ' = (उ ⇨ औ) |
| 4. | लौकिकी (स्त्री.) | लोक | ठक् (इक) | (ल्+ओ) – 'ओ' स्थाने 'औ' = (लो ⇨ लौ) |
| 5. | माङ्गलिकः (पु.) | मङ्गल | ठक् (इक) | (म्+अ) – 'अ' स्थाने 'आ' = (म ⇨ मा) |

❖ स्थूलपदानां स्थितिः वाक्येषु ईदृशी अस्ति –

वयं तत्र पश्यामः – 1. **सामाजिकः** प्राणी

2. **नैतिकं** कर्तव्यम्

3. **औद्योगिकः** विकासः
4. **लौकिकी** उन्नतिः
5. **माङ्गलिकः** कार्यक्रमः

| | |
|---|---|
| अर्थात् | **एतानि स्थूलाक्षरपदानि विशेषणरूपेण प्रयुक्तानि सन्ति।** |
| | **अन्यानि पदानि च विशेष्यरूपेण प्रयुक्तानि सन्ति।** |

## अस्माभिः अधीतम्

1) 'ठक्' प्रत्ययस्य स्थाने 'इक' भवति। प्रयोगे तु 'इक' एव दृश्यते। (यथा – समाज + ठक् = सामाजिक)
अत्र इदम् अपि ध्यातव्यं यत् 'ठञ्' प्रत्ययस्य स्थाने अपि 'इक' एव भवति। (दिन + ठञ् = दैनिक)
2) ठक् / ठञ् (इक) प्रत्यये जाते मूलशब्दस्य आदिस्वरस्य वृद्धिः भवति। 'आ' 'ऐ' 'औ' त्रयः वृद्धिस्वराः सन्ति। ते क्रमशः –

| | | |
|---|---|---|
| अ, आ | ⇨ | आ |
| इ, ई, ए, ऐ | ⇨ | ए ऐ |
| उ, ऊ, ओ, औ | ⇨ | ओ औ |
| ऋ, ॠ | ⇨ | आर् (कृतिका + इक = कार्तिक) |

3) 'ठक्' प्रत्ययान्तं पदं विशेषणपदं भवति। अतः अस्य पदस्य विशेष्यपदानुसारं लिङ्गवचन-विभक्तयश्च भवन्ति।
4) एतेषां रूपाणि पुंलिङ्गे बालकवत् स्त्रीलिङ्गे नदीवत् नपुंसकलिङ्गे च फलवत् भवन्ति।

**3. उदाहरणम् अनुसृत्य ठक्/ठञ् ( इक ) प्रत्ययान्त-पदानि रचयत –**

| | मूल शब्दः | | प्रत्ययः ठक्/ठञ् | निर्मितशब्दः | पुं० | स्त्री० | नपुं० |
|---|---|---|---|---|---|---|---|
| **यथा** – | अर्थ | + | इक | आर्थिक | आर्थिकः | आर्थिकी | आर्थिकम् |
| | धर्म | + | इक | .................... | .................... | .................... | .................... |
| | सप्ताह | + | इक | .................... | .................... | .................... | .................... |
| | सेना | + | इक | .................... | .................... | .................... | .................... |
| | कल्पना | + | इक | .................... | .................... | .................... | .................... |
| | बुद्धि | + | इक | .................... | .................... | .................... | .................... |
| | प्रकृति | + | इक | .................... | .................... | .................... | .................... |
| | देव | + | इक | .................... | .................... | .................... | .................... |
| | इतिहास | + | इक | .................... | .................... | .................... | .................... |

| | | | | | | |
|---|---|---|---|---|---|---|
| साहित्य | + | इक | ........................ | ........................ | ........................ | ........................ |
| वेद | + | इक | ........................ | ........................ | ........................ | ........................ |
| उद्योग | + | इक | ........................ | ........................ | ........................ | ........................ |
| दिन | + | इक | ........................ | ........................ | ........................ | ........................ |
| मास | + | इक | ........................ | ........................ | ........................ | ........................ |
| वर्षा | + | इक | ........................ | ........................ | ........................ | ........................ |

❖ **निम्नलिखितवाक्येषु कोष्ठके प्रदत्तशब्देन ठक् / ठञ् ( इक ) प्रत्ययं प्रयुज्य अस्य उचितरूपेण ( पदेन ) रिक्तस्थानानि पूरयत।**

**यथा – अहं भारतस्य नागरिकः ( नगर + ठक् ) अस्मि।**

1. अत्र ( धर्म + ठक् ) ........................ उत्सवः भवति।
2. अयं ( वेद + ठञ् ) ........................ विद्वान् अस्ति।
3. स ( पुराण + ठक् ) ........................ मङ्गलाचरणं करोति।
4. देहल्याम् अनेकानि ( इतिहास + ठक् ) ........................ स्थानानि सन्ति।
5. भारतस्य ( भूगोल + ठक् ) ........................ स्थितिः विचित्रा अस्ति।
6. सम्प्रति देशस्य ( अर्थ + ठक् ) ........................ स्थितिः सन्तोषप्रदा।
7. ( सप्ताह + ठक् ) ........................ अवकाशः रविवारे भवति।
8. अयं ( कल्पना + ठक् ) ........................ उपन्यासः केन लिखितः
9. मम पुस्तकालये अनेकाः ( साहित्य + ठक् ) ........................ पत्रिकाः आयान्ति।
10. ( उद्योग + ठक् ) ........................ विकासेन पर्यावरणं प्रदूष्यते।
11. ( वर्ष + ठञ् ) ........................ परीक्षायां मया 'पर्यावरणम्' विषयम् अवलम्ब्य निबन्धः लिखितः।
12. ( दिन + ठञ् ) ........................ कार्यं मया सम्पन्नम्।

❖ **अधोलिखितानां विशेष्याणां विशेषणपदानि कोष्ठकात् चित्वा लिखत –**

| | विशेषणपदानि | विशेष्यपदानि | |
|---|---|---|---|
| यथा – | ऐतिहासिकम् | नाटकम् | ( ऐतिहासिकः / ऐतिहासिकम् ) |
| 1. | ........................ | उपदेशः | ( नैतिकः / नैतिकम् ) |
| 2. | ........................ | अभ्यासः | ( प्रायोगिकम् / प्रायोगिकः ) |
| 3. | ........................ | परीक्षा | ( मासिकम् / मासिकी ) |
| 4. | ........................ | निमन्त्रणम् | ( औपचारिकम् / औपचारिकः ) |
| 5. | ........................ | कृतिः | ( मौलिकम् / मौलिकी ) |
| 6. | ........................ | दृश्यम् | ( प्राकृतिकम् / प्राकृतिकः ) |
| 7. | ........................ | विद्यालयः | ( प्राथमिकम् / प्राथमिकः ) |
| 8. | ........................ | विद्या | ( आध्यात्मिकी / आध्यात्मिकम् ) |

## 'तल्' ( ता )

**गायत –**

वाचि **सरसता** हृदि **निर्मलता**
व्यवहारे **सज्जनता।**
भाति सतां प्रकृतौ प्रिय शृणु रे!
रमणीया **मानवता॥**

❖ **उपरिलिखितपद्यात् स्थूलाक्षरपदानि चित्वा लिखत –**

..........................................................................................

..........................................................................................

**ध्यानेन पश्यत –**

- 'तल्' प्रत्ययस्य प्रयोगः संज्ञा-विशेषण-शब्दैः सह क्रियते।
- 'तल्' स्थाने 'ता' प्रयुज्यते।
- 'ता' योगेन निर्मित-शब्दस्य रूपाणि स्त्रीलिङ्गे 'लतावत्' एकवचने एव चलन्ति।
- 'तल्' योगेन 'भाववाचक' संज्ञापदानि निर्मीयन्ते।
- यथा– सुन्दरता, मधुरता, क्रूरता, कोमलता आदयः।

❖ **अधः मञ्जूषायां प्रदत्तैः शब्दैः सह 'तल्'-प्रत्ययं संयोज्य रिक्तस्थानानि पूरयत –**

**यथा – क्रूरता** तु सदैव निन्दनीया एव भवति।

1. अग्नेः ........................ शीतकाले रोचते।
2. ........................ दुःखदायिनी भवति।
3. गृहस्य ........................ आनन्ददायिनी भवति।
4. प्रकृतेः ........................ मनोरमा अस्ति।
5. मनसः ........................ वानरस्य इव भवति।
6. गणितविषये अशोकस्य ........................ प्रशंसनीया वर्तते।

**मञ्जूषा**

| |
|---|
| क्रूर, चञ्चल, दक्ष, स्वच्छ, उष्ण, निर्धन, रमणीय। |

## ‘त्व’ प्रत्ययः ( त्वम् )

**एतानि वाक्यानि पठत –**

1. ग्रीष्मे सूर्यस्य **प्रचण्डत्वम्** (प्रचण्ड+त्व) असह्यं वर्तते।
2. परिश्रमस्य **महत्त्वं** (महत्+त्व) सर्वे जानन्ति।
3. गुरोः **गुरुत्वं** (गुरु+त्व) वर्णयितुं न शक्यते।
4. अस्य पिण्डस्य **घनत्वं** (घन+त्व) मापय।
5. आचार्यशङ्करस्य **विद्वत्त्वं** (विद्वस्+त्व) आश्चर्यजनकम् आसीत्।
6. वानरस्य **चपलत्वं** (चपल+त्व) बालकेभ्यः रोचते।
7. काव्यस्य **मधुरत्वं** (मधुर+त्व) सहृदयाः जानन्ति।
8. सागरस्य **गहनत्वं** (गहन+त्व) मापनीयं न अस्ति।

**सरला –** सुमेधे! किम् ‘त्व’-प्रत्ययस्य प्रयोगः भाववाचक-संज्ञापद-निर्माणाय भवति?

**सुमेधा –** आम्, सरले!

**सरला –** परम् अत्र तु सर्वत्र नपुंसकलिङ्गस्य प्रयोगः अस्ति।

**सुमेधा –** साधु उक्तम्, पश्य –

- ‘त्व’ – प्रत्ययस्य प्रयोगः भाववाचक-संज्ञापदानां निर्माणाय भवति।
- ‘त्व’ – प्रत्ययस्य प्रयोगः संज्ञाविशेषणपदैः सह भवति।
- ‘त्व’ – प्रत्यय-योगेन निर्मिताः शब्दाः नपुंसकलिङ्गे फलशब्दवत् एकवचने एव भवन्ति।

❖ **अधोलिखित-शब्दैः सह ‘त्व’- प्रत्ययं योजयत –**

| | | | | | |
|---|---|---|---|---|---|
| **यथा –** | पृथु | + | त्व | = | पृथुत्वम् |
| 1. | लघु | + | त्व | = | ........................ |
| 2. | मनुष्य | + | त्व | = | ........................ |
| 3. | विशाल | + | त्व | = | ........................ |
| 4. | कवि | + | त्व | = | ........................ |
| 5. | दीन | + | त्व | = | ........................ |
| 6. | क्षत्रिय | + | त्व | = | ........................ |
| 7. | वीर | + | त्व | = | ........................ |
| 8. | शम | + | त्व | = | ........................ |

**4. 'त्व'-'तल्'-प्रत्ययान्तानि पदानि मञ्जूषायाः चित्वा यथोचितं रिक्तस्थानानि पूरयत –**

**यथा** – पवनस्य **शीतलताम्** अनुभूय मनः प्रसीदति।

1. विद्यायाः .................... को न जानाति?
2. कृष्णसुदाम्नोः .................... जगति आदर्शं स्थापयति।
3. दुष्प्रयुक्ता वाणी मनुष्यस्य .................... प्रकटयति।
4. मनसः .................... वशीकरणीयम्।
5. लवस्य .................... अद्‌भुता आसीत्।

| चञ्चलत्वम्, मित्रता, वीरता, महत्त्वम्, पशुत्वम् |
| --- |

**5. अधोलिखिताः सूक्तीः पठित्वा 'तल्-त्व-प्रत्ययान्तानि पदानि रेखाङ्कितानि कुरुत –**

**यथा** – ऐश्वर्यस्य विभूषणं **सुजनता**।

1. नः कालस्य अस्ति **बन्धुत्वम्**।
2. अविवेकिता तु अनर्थाय एव भवति।
3. अहो! बालकस्य ईदृशी निपुणता।
4. न अस्ति अमरत्वं हि कस्यचित् प्राणिनः भुवि।
5. क्षणे क्षणे यत् नवताम् उपैति तदेव रूपं रमणीयतायाः।
6. विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन।
7. उदारता श्रेष्ठः गुणः अस्ति।

## ( ग ) स्त्रीप्रत्ययौ

### टाप् ( आ )

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत –**

(क) बालः **बाला** च उदयन्तं भास्करं नमतः।

(ख) आचार्यः **आचार्या** च वृक्षान् आरोपयतः।

(ग) शिष्यः **शिष्या** च लताः जलेन सिञ्चतः।

(घ) गायकः **गायिका** च प्रकृतिगीतं गायतः।

(ङ) अहो! अत्र **शोभना** प्रकृतिः शोभनः च उत्सवः।

❖ **उपर्युक्तानि स्थूलाक्षराणि पदानि अधः मञ्जूषायां क्रमेण लिखत –**

(क) बाला (ख) ........................ (ग) ........................

(घ) ........................ (ङ) ........................

**किं यूयं जानीथ?**

**उपर्युक्तवाक्येषु प्रयुक्तानाम् एतेषां स्थूलाक्षरपदानां लिङ्गदृष्ट्या किं वैशिष्ट्यम्? पश्यत –**

"एतानि पदानि स्त्रीलिङ्गरूपे तत्र प्रयुक्तानि सन्ति"।

**एतेषां पदानाम् अन्ते कः प्रत्ययः दृश्यते?**

'आ' प्रत्ययः दृश्यते।

**एष 'आ' प्रत्ययः कस्य रूपम् अंशः वा अस्ति?**

'टाप्' (ट् + आ + प्) प्रत्ययस्य।

टाप् इति स्त्रीप्रत्ययः अस्ति।

**तर्हि 'टाप्' प्रत्ययस्य कदा कीदृशैः शब्दैः च सह योजनं क्रियते?**

स्त्रीलिङ्गशब्द-निर्माणाय अकारान्त पुंलिङ्गशब्दैः सह 'टाप्' प्रत्ययः योज्यते। 'टाप्' प्रत्ययस्य तु केवलम् 'आ' एव शिष्यते।

**यथा –**

बाल (अकारान्त, पुं.) + टाप् (स्त्रीलिङ्गे) = (बाल) + (ट् + आ + प्) = बाल + आ = बाला (स्त्रीलिङ्गे)

'टाप्' प्रत्ययान्तशब्दानां रूपरचना कीदृशी भवति?

ईदृशानां शब्दानां रूपरचना 'लता' शब्दवत् भवति।

❖ **वयम् अत्र उपर्युक्तानां स्थूलाक्षरपदानां परिचयं प्राप्नुमः –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| | | ( अकारान्तशब्दः ) | | | | |
| (क) | बाला | बाल (ब्+आ+ल्+अ) | टाप् | बाला | प्रथमा | ए० व० |

| | | | | | |
|---|---|---|---|---|---|
| (ख) | आचार्या | आचार्य | टाप् | आचार्या | प्रथमा | ए० व० |
| (ग) | शिष्या | शिष्य | टाप् | शिष्या | प्रथमा | ए० व० |
| (घ) | गायिका | गायक | टाप् | गायिका | प्रथमा | ए० व० |
| (ङ) | शोभना | शोभन | टाप् | शोभना | प्रथमा | ए० व० |

❖ **अतः अस्माभिः ज्ञातम् –**

- 'टाप्' स्त्रीप्रत्ययः अस्ति। प्रयोगे तु अस्य 'आ' एव शिष्यते।
- एषः प्रत्ययः स्त्रीलिङ्गशब्दनिर्माणाय अकारान्त – पुंलिङ्गशब्दैः सह प्रयुज्यते। यथा–
  बाल +टाप् =बाल+आ = 'बाला' आदयः।
- 'अक' भागान्तशब्देषु 'क' वर्णात् पूर्वम् अकारस्थाने 'इ' भवति।
  यथा–गायक – (ग+आ+य्+अ+क) + टाप् = 'गायिका' आदयः।
- टाप् प्रत्ययान्तशब्दानां रूपाणि 'लतावत्' भवन्ति।

❖ **उदाहरणम् अनुसृत्य स्त्रीलिङ्गशब्दान् रचयत –**

| | शब्दाः | | प्रत्ययः | निर्मितस्त्रीलिङ्गशब्दाः |
|---|---|---|---|---|
| **यथा –** | अज | + | टाप् | अजा |
| (i) | एडक | + | टाप् | ...................... |
| (ii) | अश्व | + | टाप् | ...................... |
| (iii) | कोकिल | + | टाप् | ...................... |
| (iv) | चटक | + | टाप् | ...................... |
| (v) | छात्र | + | टाप् | ...................... |
| (vi) | प्रिय | + | टाप् | ...................... |
| (vii) | बालक | + | टाप् | बालिका |
| (viii) | सेवक | + | टाप् | ...................... |
| (ix) | नायक | + | टाप् | ...................... |
| (x) | मूषक | + | टाप् | ...................... |

❖ **अधोलिखितेषु वाक्येषु निर्दिष्टशब्दैः सह टाप् – प्रत्ययं प्रयुज्य वाक्यानि पूरयत –**

**यथा –** प्रभा पठने **प्रवीणा** (प्रवीण + टाप्) अस्ति।

(i) अस्याः ...................... (अनुज + टाप्) दीपिका अस्ति।

(ii) दीपिका क्रीडायां ...................... (कुशल + टाप्) अस्ति।

(iii) प्रभा-दीपिकयोः माता ...................... (चिकित्सक + टाप्) अस्ति।

(iv) सा समाजस्य ...................... (सेवक + टाप्) अपि अस्ति।

(v) सा तु स्वभावेन अतीव ...................... (सरल + टाप्) अस्ति।

❖ **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदानां मूलशब्दं प्रत्ययं च पृथक्कृत्य लिखत –**

| | | मूलशब्दः + प्रत्ययः |
|---|---|---|
| **यथा** – | आगता पर्वसु **प्रिया** दीपावलिः। | प्रिय+टाप् |
| (i) | विपणीनां शोभा **अनुपमा** भविष्यति। | ............ + ............ |
| (ii) | रात्रिः दीपानां प्रकाशेन **उज्ज्वला** भविष्यति। | ............ + ............ |
| (iii) | पूजनेन **प्रसन्ना** लक्ष्मीः कृपां करिष्यति। | ............ + ............ |
| (iv) | 'भवतु **शुभदा** दीपावलिः' इति परस्परं कामयन्ते जनाः। | ............ + ............ |
| (v) | **धन्या** इयं दीपावलिः प्रकाशपुञ्जरूपा। | ............ + ............ |

❖ **अधोलिखितेषु वाक्येषु 'टाप्' – प्रत्ययान्तानि पदानि चित्वा समक्षं मञ्जूषायां लिखत –**

(i) अमृतजला इयं गङ्गा पवित्रा।
(ii) कथं नु एतस्याः शोभा विचित्रा!
(iii) सवेगं वहन्ती खलु शोभमाना।
(iv) वन्द्या सदा सा भुवि राजमाना।
(v) भक्तैः सदा तु चिरं सेवमाना।
(vi) भागीरथी भवतु मे पूर्णकामा।

**मञ्जूषा**

| | |
|---|---|
| (i) अमृतजला | (ii) ............................. |
| (iii) ............................. | (iv) ............................. |
| (v) ............................. | (vi) ............................. |
| (vii) ............................. | (viii) ............................. |

## ङीप् ( ई )

❖ **अधोलिखितानि वाक्यानि ध्यानपूर्वकं पठत –**

(क) पुण्यजला गङ्गा **नदी**।
(ख) जीवन-**दात्री** प्रकृतिः रक्षणीया सदा।
(ग) **उपकारिणी** वृत्तिः भवति खलु सज्जनानाम्।
(घ) **लौकिकी** उन्नतिः यशः वर्धयति।
(ङ) **यादृशी** भावना सिद्धिः भवति **तादृशी**।

**उपर्युक्तस्थूलाक्षरपदानि अधः मञ्जूषायां लिखत –**

| **यथा** | | | |
|---|---|---|---|
| | (क) नदी | (ख) ...................... | (ग) ...................... |
| | (घ) ...................... | (ङ) (1) ...................... | (2) ...................... |

❖ **उपर्युक्तानि पदानि कस्य लिङ्गस्य रूपाणि सन्ति? तत्पश्यत –**

एतानि पदानि तु 'स्त्रीलिङ्गस्य' एव रूपाणि सन्ति।

**कथं ज्ञायते यत् एतानि पदानि स्त्रीलिङ्गस्य रूपाणि सन्ति?**

यतः एतेषाम् पदानाम् अन्ते 'ई' प्रत्ययः दृश्यते।

**किम् 'ई' एव स्त्रीप्रत्ययः?**

नहि, 'ङीप्' (ङ् + ई + प्) स्त्रीप्रत्ययः।

'ङीप्' – प्रत्यये तु 'ई' एव शिष्यते। अतः 'ई' ङीप् प्रत्ययस्य एव रूपम्।

**तर्हि 'ङीप्' – प्रत्ययस्य कदा प्रयोगः क्रियते ?**

स्त्रीलिङ्गशब्दनिर्माणाय एव ङीप्-प्रत्ययस्य प्रयोगः क्रियते।

**यथा** – नद + ङीप् = 'नदी' ईकारान्तस्त्रीलिङ्गशब्दः भवति।

'ङीप्' प्रत्ययान्तशब्दानां रूपरचना कीदृशी भवति?

ईदृशानां शब्दानां रूपरचना 'नदी' शब्दवत् भवति।

❖ **अत्र वयम् उपर्युक्तानां स्थूलपदानां परिचयं प्राप्नुमः –**

| | पदानि | मूलशब्दः | प्रत्ययः | निर्मितशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| (क) | नदी | नद | ङीप् | नदी | प्रथमा | ए.व. |
| (ख) | दात्री | दातृ | .............. | .............. | .............. | .............. |
| (ग) | उपकारिणी | उपकारिन् | .............. | .............. | .............. | .............. |
| (घ) | लौकिकी | लौकिक | .............. | .............. | .............. | .............. |
| (ङ) (1) | यादृशी | यादृश | .............. | .............. | .............. | .............. |
| (2) | तादृशी | तादृश | .............. | .............. | .............. | .............. |

❖ **अतः वयं जानीमः**

- ङीप् स्त्रीप्रत्ययः अस्ति। प्रयोगदशायाम् अस्य 'ई' एव अवशिष्यते।
- स्त्रीलिङ्गशब्दनिर्माणाय 'ङीप्' प्रत्ययः प्रयुज्यते। यथा लौकिक + ङीप् = लौकिकी।
- ङीप् प्रत्ययान्तशब्दानां रूपाणि 'नदी' शब्दवत् भवन्ति।

❖ **उदाहरणम् अनुसृत्य ईकारान्तस्त्रीलिङ्गशब्दान् रचयत –**

| | शब्दाः + प्रत्ययः | निर्मितस्त्रीलिङ्गशब्दाः |
|---|---|---|
| **यथा** – | देव + ङीप् | देवी |
| (i) | तरुण + ङीप् | .................................... |
| (ii) | कुमार + ङीप् | .................................... |
| (iii) | त्रिलोक + ङीप् | .................................... |

(iv) किशोर + ङीप् ..............................

(v) कर्तृ + ङीप् कर्त्री

(vi) जनयितृ + ङीप् ..............................

(vii) मनोहारिन् + ङीप् मनोहारिणी

(viii) मालिन् + ङीप् ..............................

(ix) तपस्विन् + ङीप् ..............................

(x) भवत् + ङीप् भवती

(xi) श्रीमत् + ङीप् ..............................

(xii) गच्छत् (गम् + शतृ) + ङीप् ..............................

(xiii) पचत् (पच् + शतृ) + ङीप् ..............................

(xiv) नृत्यत् (नृत् + शतृ) + ङीप् ..............................

(xv) पश्यत् (दृश् + शतृ) + ङीप् ..............................

(xvi) वदत् (वद् + शतृ) + ङीप् ..............................

(xvii) पृच्छत् (प्रच्छ् + शतृ) + ङीप् ..............................

(xviii) स्पृशत् (स्पृश् + शतृ) + ङीप् ..............................

**ध्यातव्यम्** – यदा शतृप्रत्ययान्तशब्दैः सह ङीप् प्रत्ययः योज्यते तदा अन्तिम 'त्' वर्णात् पूर्व 'न्' इति वर्णस्य आगमः भवति। यथा – गम् + शतृ = गच्छत् + ङीप् = गच्छ + न् + त् + ई = गच्छन्ती

❖ **अधोलिखितेषु वाक्येषु निर्दिष्टशब्दैः सह 'ङीप्' प्रत्ययं प्रयुज्य वाक्यानि पूरयत –**

**यथा** – श्रीमती (श्रीमत् + ङीप्) हेमा नाट्योत्सवे दीपं प्रज्वालयति।

(i) (कुमार + ङीप्) ........................ वन्दना पुष्पगुच्छैः तस्याः स्वागतं करोति।

(ii) एका (किशोर + ङीप्) ........................ भरतनाट्यं प्रस्तौति।

(iii) तया सह (नृत्यत् + ङीप्) ........................ देविका अस्ति।

(iv) मञ्चे (गायत् + ङीप्) ........................ सुधा अस्ति।

(v) (मनोहारिन् + ङीप्) ........................ एषा नाट्यप्रस्तुतिः।

❖ **अधोलिखितेषु वाक्येषु स्थूलाक्षरपदेषु मूलशब्दं स्त्रीप्रत्ययं च पृथक्कृत्य लिखत –**

**यथा**– **हसन्ती** विभा स्वसखीम् अमिलत्। हसत् + ङीप्

(i) तदैव एका **तरुणी** विभाम् अपृच्छत्। ............ + ............

(ii) किम् इयम् तव सखी **कुमारी** भावना अस्ति? ............ + ............

(iii) अहो! **एतादृशीं** सखीं प्राप्य त्वं धन्या असि। ............ + ............

(iv) तया बसयानात् **पतन्ती** बाला रक्षिता। ............ + ............

## मिश्रितप्रश्नाः

❖ **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत –**

1. **शीतल + टाप्** .................... छाया घर्मकाले परमोपकारिका भवति।
2. **मधुरभाषिन् + ङीप्** .................... वाणी सर्वान् प्रह्लादयति।
3. बोधिसत्त्वः **वृद्धोपसेवा + णिनि** .................... आसीत्।
4. राजा दानशालासु **विचरन्** .................... + .................... अर्थिनां विरलसङ्ख्यां दृष्ट्वा निराशः जातः।
5. राज्ञः **दानशीलताम्** .................... + .................... आकर्ण्य जनाः तत्र आयान्ति स्म।
6. नेत्राभ्यां लोकयात्रा **निर्बाध + टाप्** .................... भवति।
7. **रम् + अनीयर्** .................... हि सृष्टिरेषा।
8. तत्र **हंसी** .................... + .................... राजहंसेन सह विहरति।
9. बकः हंसम् आक्षिपति – किं ते **महत्त्वम्** .................... + .................... इति।
10. एकः मेषः **जिह्वालोलुप + तल्** .................... महानसं प्रविश्य यत् पश्यति तद् भक्षयति स्म।
11. जीवितं **वाञ्छ् + शतृ** .................... नरः कलहयुक्तं गृहं दूरतः परिवर्जयेत्।
12. मेषः **निकटस्थ + टाप्** .................... अश्वशालां प्रविशति।
13. मेषस्य क्षितौ **प्रलुठतः** .................... + .................... तृणेषु वह्निज्वालाः समुत्थिताः।
14. **सुख + णिनि** .................... नरः कामक्रोधोद्भवं वेगं सोढुं शक्नोति।
15. न जानाति भवान् द्रौणेः **चपल + टाप्** .................... प्रकृतिम्।
16. द्रौपदी आत्मानं **मन्दभाग्या** .................... + .................... मनुते।
17. ब्रह्मास्त्रं मानवेषु न **प्रयोक्तव्यम्** .................... + .................... इति द्रोणाचार्यः पुत्रं सावधानम् अकरोत्।
18. दुष्टबुद्धिः प्रच्छन्नभाग्यश्च गर्तसङ्कुले मार्गे **व्रज् + शतृ** .................... आस्ताम्।
19. प्रच्छन्नभाग्यस्य पत्नी **बुद्धि + मतुप्** .................... आसीत्।
20. सा परद्रव्ये **अनासक्ता** .................... + .................... अस्ति।
21. सः भयङ्करं विषधरं फूत्कारं **कुर्वन्तं** .................... + .................... पश्यति।
22. दम्पती प्रचुरमाणिक्यानाम् आभया **भास् + शानच्** .................... निजगृहम् अपश्यताम्।
23. **अवक्रता** .................... + .................... चित्ते वाचि च उभयत्र भवेत्।
24. लोकेऽस्मिन् विद्वांसः **चक्षुस् + मतुप्** .................... प्रकीर्तिताः।
25. **धैर्यवान्** .................... + .................... मन्त्री अकातरः अपि भवेत्।
26. अरुणाचलप्रदेशः सप्तराज्येषु **विभासमानः** .................... + .................... वर्तते।
27. तत्र **लोहिताख्य + टाप्** .................... नदी वहति।
28. ईटा प्रधाना **पुरी** .................... + .................... अस्ति।

29. **पर्यटनाधिकारी** …………………… + …………………… मञ्चे तिष्ठति।

30. अरुणाचले **विपुल + टाप्** …………………… वनसम्पदा वर्तते।

31. ओरिया इति पर्वणि **समाज + ठक्** …………………… कार्यं क्रियते।

32. छात्राः अरुणाचलप्रदेशस्य **ऐतिहासिकानां** …………………… + …………………… स्थलानां विषये ज्ञातुम् इच्छन्ति।

33. तवाङ्ग इति बौद्धभिक्षूणां **निवासयोग्य + टाप्** …………………… स्थली अस्ति।

34. परशुरामकुण्डम् एकं **दृश् + अनीयर्** …………………… स्थलं वर्तते।

35. अरुणाचले अनेकानि **दर्शनीयानि** …………………… + …………………… स्थलानि सन्ति।

36. इमां पर्यटनविभागेन **प्रकाशितां** …………………… + …………………… सूचीं पठन्तु भवन्तः।

37. कालः सततं चक्रवत् **परिवृत् + शानच्** …………………… भूतं वर्तमानं भविष्यदपि वीक्षते।

38. **कियती** …………………… + …………………… प्राचीना इयं सृष्टिः इति किं यूयं जानीथ?

39. **विवेक + णिनि** …………………… पण्डितः भवति।

40. मरणं **मूर्खत्वं** …………………… + …………………… भवति इति शङ्कराचार्यः अकथयत्।

❖ **अधोलिखितेषु वाक्येषु स्त्रीप्रत्ययान्तं ( टाप्-ङीप्-युक्तं ) पदं चित्वा कोष्ठके पृथक् पृथक् लिखत –**

(i) मधुरा वाणी प्रीणयति मनः।

(ii) सतां बुद्धिः हितकारिणी भवति।

(iii) सत्सङ्गतिः सर्वत्र दुर्लभा।

(iv) उपकारकर्त्री प्रकृतिः धन्या।

(v) कुलाङ्गना सदा सम्मानस्य अधिकारिणी।

(vi) नैतिकी शिक्षा आवश्यकी।

**टाप्**

| | | |
|---|---|---|
| (i) मधुरा | (ii) …………………… | (iii) …………………… |

**ङीप्**

| | | |
|---|---|---|
| (i) हितकारिणी | (ii) …………………… | (iii) …………………… |
| (iv) …………………… | (v) …………………… | |

# चतुर्थः अभ्यासः

# वाच्यम्

कर्तृवाच्यम् | कर्मवाच्यम् | भाववाच्यम्

## कर्तृवाच्यं कर्मवाच्यं च

♦ **अधः प्रदत्तानि वाक्यानि ध्यानेन पठत अवगच्छत –**

| ( क ) | ( ख ) |
|---|---|
| मोहनः कथयति | सोहनः कथयति |
| (i) अशोकः लेखं लिखति। | i) अशोकेन लेखः लिख्यते। |
| (ii) बालः जनकं प्रणमति। | ii) बालेन जनकः प्रणम्यते। |
| (iii) अहं फलानि क्रीणामि। | iii) मया फलानि क्रीयन्ते। |
| (iv) अम्बा ओदनं पचति। | iv) अम्बया ओदनं पच्यते। |
| (v) छात्राः प्रार्थनां कुर्वन्ति। | v) छात्रैः प्रार्थना क्रियते। |
| (vi) महिलाः जलम् आनयन्ति। | vi) महिलाभिः जलम् आनीयते। |








इत्थं वयं पश्यामः यत् लोकव्यवहारे एकम् एव कथनं सामान्यतः द्विप्रकारेण कथ्यते। **मोहनस्य कथनं कर्तृवाच्ये अस्ति सोहनस्य च कथनं कर्मवाच्ये अस्ति।** उभयोः कथनयोः कः भेदः अस्ति इति अत्र ज्ञास्यामः

| 'क' अन्तर्गतेषु वाक्येषु | 'ख' अन्तर्गतेषु वाक्येषु |
|---|---|
| कर्ता प्रथमाविभक्तौ अस्ति। | कर्ता तृतीयाविभक्तौ अस्ति। |
| कर्म द्वितीयाविभक्तौ अस्ति। | कर्म प्रथमाविभक्तौ अस्ति। |
| क्रिया च कर्तृपदानुरूपा अस्ति। | क्रिया च कर्मपदानुरूपा अस्ति। |

**अवधेयम् -**

| ( क ) कर्तृवाच्ये | ( ख ) कर्मवाच्ये |
|---|---|
| 1) कर्तरि प्रथमाविभक्तिः भवति। | 1) कर्तरि तृतीयाविभक्तिः भवति। |
| 2) कर्मणि द्वितीयाविभक्तिः भवति। | 2) कर्मणि प्रथमाविभक्तिः भवति। |
| 3) क्रियापदं कर्तृपदानुरूपं भवति अर्थात् कर्तृपदं यादृश-पुरुष-वचनयुक्तं भवति, क्रियापि तादृश-पुरुष-वचन युक्ता भवति। एवं कर्तृवाच्ये कर्तृपदं प्रधानं भवति। | 3) क्रिया च कर्मपदानुरूपा भवति अर्थात् कर्मपदे यः पुरुषः, यद् वचनं च भवति, क्रियायामपि तदेव पुरुषः वचनं च भवति। एवं कर्मवाच्ये कर्म प्रधानं भवति। |

1. **चित्रम् आधृत्य अधः एकः गद्यांशः दीयते। तस्मात् कर्तृवाच्यस्य वाक्यानि 'क' भागे, कर्मवाच्यस्य वाक्यानि च 'ख' भागे लिख्यन्ताम्।**



एकः पथिकः नगरं गच्छति। सः हस्तेन पुस्तकं गृह्णाति। तेन एकः स्यूतः अपि धार्यते। मार्गे आम्र-वृक्षाः दृश्यन्ते। तत्र सः खगानां कलरवं श्रृणोति। वृक्षच्छायायां तेन सुखम् अनुभूयते। सः आम्रफलानि खादति। तेन वृक्षाः प्रशंस्यन्ते। अहो ! धन्याः एते वृक्षाः ये फलानि छायामपि च यच्छन्ति। एतैः तु सदा परोपकारः एव आचर्यते। पथिकेन सङ्कल्पः क्रियते - ''अहमपि स्वगृहे वृक्षान् आरोपयिष्यामि।''

| 'क' ( कर्तृवाच्यम् ) | 'ख' ( कर्मवाच्यम् ) |
|---|---|
| **यथा** - एकः पथिकः नगरं गच्छति। | तेन एकः स्यूतः धार्यते । |
| क) ............................................ | क) ............................................ |
| ख) ............................................ | ख) ............................................ |
| ग) ............................................ | ग) ............................................ |
| घ) ............................................ | घ) ............................................ |
| ङ) ............................................ | ङ) ............................................ |

2. **अधोलिखितेषु वाक्येषु कर्तृवाच्य-वाक्यानि कर्मवाच्य-वाक्यानि च विचित्य पृथक्-पृथक् लिखन्तु -**

(क) उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।

(ख) सर्पाः पवनं पिबन्ति ।

(ग) विद्वान् सर्वैः पूज्यते।

(घ) मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते।

(ङ) विद्या विनयं ददाति।

(च) बुभुक्षितैः व्याकरणं न भुज्यते, न पीयते काव्यरसः पिपासुभिः।

(छ) मत्तदन्तिनः रज्ज्वा बध्यन्ते।

(ज) बालकेन (जलेन) घटः पूर्यते।

| कर्तृवाच्ये | कर्मवाच्ये |
|---|---|
| **यथा** - उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः। | विद्वान् सर्वैः पूज्यते। |
| क) ........................................ | क) ........................................ |
| ख) ........................................ | ख) ........................................ |
| ग) ........................................ | ग) ........................................ |
| घ) ........................................ | घ) ........................................ |
| ङ) ........................................ | ङ) ........................................ |

3. **( अ ) अधोलिखितवाक्येषु कर्तृपदं कर्मवाच्ये परिवर्त्य लिख्यताम् -**

| **यथा** - <u>भक्तः</u> गीतां पठति। | <u>भक्तेन</u> गीता पठ्यते। |
|---|---|
| (क) शिष्याः गुरून् नमन्ति । | ........................ गुरवः नम्यन्ते। |
| (ख) पुत्रः जनकं सेवते । | ........................ जनकः सेव्यते। |
| (ग) अहं पत्रं लिखामि । | ........................ पत्रं लिख्यते। |
| (घ) त्वं कवितां शृणोषि। | ........................ कविता श्रूयते। |

**( आ ) अधोलिखितेषु वाक्येषु कर्मपदं परिवर्त्य रिक्तस्थानपूर्तिः क्रियताम् -**

| **यथा** - अहं **लोभं** त्यजामि। | मया **लोभः** त्यज्यते। |
|---|---|
| (क) आचार्याः छात्रान् उपदिशन्ति। | आचार्यैः ........................ उपदिश्यन्ते। |
| (ख) जनाः प्रदर्शनीं पश्यन्ति। | जनैः ........................ दृश्यते। |
| (ग) त्वं पुरस्कारं गृह्णासि। | त्वया ........................ गृह्यते। |
| (घ) छायाकारः छायाचित्रं रचयति। | छायाकारेण ........................ रच्यते। |

(इ) कर्मवाच्यस्य वाक्येषु क्रियापदानि लिखित्वा रिक्तस्थानानि पूरयत –

| | |
|---|---|
| **यथा** – मेघाः जलं वर्षन्ति। | मेघैः जलं वृष्यते। |
| (क) उपकारी मानं न अभिलषति। | उपकारिणा मानः न ........................ । |
| (ख) राष्ट्रपतिः राष्ट्रं सम्बोधयति। | राष्ट्रपतिना राष्ट्रं ........................ । |
| (ग) छात्राः शिक्षिकाम् अभिनन्दन्ति। | छात्राभिः / छात्रैः शिक्षिका ........................ । |
| (घ) प्रधानमन्त्री वैज्ञानिकान् सम्मानयति। | प्रधानमन्त्रिणा वैज्ञानिकाः ........................ । |

4. सुधा एका स्वस्था कन्या अस्ति। तस्याः दिनचर्या नियमिता अस्ति। तस्याः दिनचर्यां ज्ञातुम् अधः मञ्जूषायाः क्रियापदानि विचित्य रिक्तस्थानानि पूर्यन्ताम्।

सुधया –
- प्रत्यूषे उद्यानं गत्वा व्यायामः ............................ ।
- प्रातः दुग्धं ............................ ।
- नित्यं दुग्धेन सह कदलीफले अपि ............................ ।
- भोजने सन्तुलिताहारः ............................ ।
- गृहवाटिकायां वृक्षाः ............................ ।
- स्ववस्त्राणि स्वयं ............................ ।
- नित्यं समये ............................ ।
- सायमपि ईश्वरः ............................ ।
- कदापि असत्यं न ............................ ।

| |
|---|
| क्षाल्यन्ते, आरोप्यन्ते, उद्यते, पीयते, गृह्यते, पठ्यते, खाद्येते, क्रियते, स्मर्यते। |

5. अधोलिखितवाक्यानि कर्मवाच्ये परिवर्त्यन्ताम् –

| | कर्तृवाच्ये | | कर्मवाच्ये |
|---|---|---|---|
| **यथा** – | मालाकारः वृक्षान् सिञ्चति। | ↔ | मालाकारेण वृक्षाः सिच्यन्ते। |
| (क) | आरक्षकाः राष्ट्रं रक्षन्ति। | ↔ | |
| (ख) | एकः चन्द्रः तमो हन्ति। | ↔ | |
| (ग) | माता पुत्रं प्रतीक्षते। | ↔ | |
| (घ) | अहं पितरौ वन्दे। | ↔ | |

6.

रिक्तस्थानेषु वाच्यपरिवर्तनं क्रियताम्

| कर्तृवाच्ये प्रयोगः | कर्मवाच्ये प्रयोगः |
| --- | --- |
| क्रोधः ज्ञानं नाशयति। | |
| | चन्द्रेण तमः हन्यते। |
| भूमिः अन्नं ददाति। | |
| छात्रः पाठम् अभ्यस्यति। | |
| | श्रमिकैः वेतनं लभ्यते। |
| अध्यापकाः शिष्यान् परीक्षन्ते। | |
| | मित्रेण सहयोगः दीयते। |
| लता राष्ट्रगीतं गायति। | |

## भाववाच्यम्

1. **अधोलिखितानि वाक्यानि ध्यानेन पठत –**

| 'क' (कर्तृवाच्यम्) | 'ख' (भाववाच्यम्) |
| --- | --- |
| (i) बालकः क्रीडति। | (i) बालकेन क्रीड्यते। |
| (ii) शिशुः स्वपिति। | (ii) शिशुना सुप्यते। |
| (iii) छात्राः तिष्ठन्ति। | (iii) छात्रैः स्थीयते। |
| (iv) कन्याः हसन्ति। | (iv) कन्याभिः हस्यते। |
| (v) अश्वाः धावन्ति । | (v) अश्वैः धाव्यते। |

- **उपरि प्रदत्तेषु वाक्येषु वयं पश्यामः यत्**

(1) **कर्तृपदम्** अस्ति।

(2) **क्रियापदम्** अपि अस्ति परन्तु कर्मपदं न अस्ति।

- **उपरि प्रदत्तेषु वाक्येषु केषां धातूनां प्रयोगः अस्ति?**

क्रीड्, स्वप्, स्था, हस्, धाव् इति एतेषां धातूनां प्रयोगः अस्ति। एते धातवः अकर्मकाः।

एतेन ज्ञायते यत् अत्र अकर्मकधातूनां प्रयोगः अस्ति अर्थात् अत्र कर्मपदं न अस्ति। अकर्मकधातुयोगे कर्तृवाच्यं भाववाच्यं च भवतः।

♦ **अधुना भाववाच्यस्य नियमान् जानीमः –**

(1) कर्तृपदे तृतीया भवति। कर्तृपदस्य विशेषणे अपि तृतीया भवति।
(2) भाववाच्ये अकर्मकधातूनाम् एव प्रयोगः भवति।
(3) भाववाच्ये क्रियापदं सदा प्रथमपुरुषस्य एकवचने एव प्रयुज्यते।
(4) भू, अस्, स्था, स्वप्, शीङ् हस्, क्रीड्-इत्यादयो धातवः अकर्मकाः।

**भाववाच्ये**

| कर्ता तृतीयाविभक्तौ भवति। | कर्म न भवति। | क्रिया प्रथमपुरुषस्य एकवचने एव भवति। |
|---|---|---|

**2. समक्षं चित्रं दृष्ट्वा भाववाच्ये क्रियापदानि लिखन्तु –**

**उदाहरणम्**

बालकेन सुप्यते।  बालकः स्वपिति।

(i) कपोतैः ........................ ।  कपोताः उत्पतन्ति।

(ii) बालिकया ........................ ।  बालिका उपविशति।

(iii) भक्तैः गङ्गायां स्नायते ।  भक्ताः गङ्गायां स्नान्ति।

(iv) पुष्पैः ........................ ।  पुष्पाणि विकसन्ति।

(v) मयूरैः ........................ ।  मयूराः नृत्यन्ति।

3. अधोलिखितेषु कानिचित् कर्मयुक्तानि ( सकर्मकाणि ) वाक्यानि, कानिचित् च कर्मरहितानि ( अकर्मकाणि ) सन्ति। कर्मयुक्तानि वाक्यानि 'क' भागे, कर्मरहितानि वाक्यानि च 'ख' भागे लिखत –

(क) बालकेन ग्रन्थः पठ्यते।
(ख) सुधया फलानि खाद्यन्ते।
(ग) शिशुना हस्यते।
(घ) छात्रैः भ्रम्यते।
(ङ) अम्बया भोजनं पच्यते।
(च) मया नाटकं दृश्यते।
(छ) त्वया क्रीड्यते।
(ज) कृषकेण अजा नीयते।
(झ) सभासदैः स्थीयते।
(ञ) बालैः हस्यते।

| 'क' | 'ख' |
|---|---|
| क) ............................................ | क) ............................................ |
| ख) ............................................ | ख) ............................................ |
| ग) ............................................ | ग) ............................................ |
| घ) ............................................ | घ) ............................................ |
| ङ) ............................................ | ङ) ............................................ |

4. उदाहरणम् अनुसृत्य अधोलिखितानि वाक्यानि भाववाच्ये परिवर्त्यन्ताम् –

| कर्तृवाच्यम् | भाववाच्यम् |
|---|---|
| यथा – बालकाः हसन्ति। (हस्) | बालकैः हस्यते। |
| क) शिशुः रोदिति। (रुद्) | क) ............................................ |
| ख) छात्राः अत्र तिष्ठन्ति। (स्था) | ख) ............................................ |
| ग) सिंहः वने गर्जति। (गर्ज्) | ग) ............................................ |
| घ) अलसः दिने स्वपिति। (स्वप्) | घ) ............................................ |
| ङ) वानराः वृक्षेषु कूर्दन्ति। (कूर्द्) | ङ) ............................................ |
| च) लता वर्धते। (वृध्) | च) ............................................ |

5. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानपूर्तिः क्रियताम् –

**यथा** – कर्तृवाच्यम् – विद्याहीनाः न शोभन्ते।
भाववाच्यम् – विद्याहीनैः न शुभ्यते। (शुभ्यते / शोभ्यते)

(i) विमानम् उड्डयते।
विमानेन ........................ । (उड्डीयते / उड्डयते)

(ii) सज्जनाः उपविशन्ति।

सज्जनैः ...................... । (उपविश्यन्ते / उपविश्यते)

(iii) वृक्षाः कम्पन्ते।

वृक्षैः ...................... । (कम्प्यते / कम्प्यन्ते)।

(iv) विद्यार्थिनः धावन्ति।

विद्यार्थिभिः ...................... । (धाव्यते / धाव्यन्ते)

(v) सः आचार्यः भवति।

तेन आचार्येण ...................... । (भव्यते / भूयते)

**6. अत्र द्वयोः मित्रयोः संवादः दत्तः। सञ्जयः प्रश्नान् करोति, रमा च उत्तराणि ददाति। उदाहरणम् अनुसृत्य रमायाः उत्तराणि कर्मवाच्ये लिख्यन्ताम् –**

**यथा –**

**सञ्जयः** – रमे! किं त्वं प्रातः चतुर्वादने उत्तिष्ठसि?

**रमा** – आम्। मया प्रातः चतुर्वादने उत्थीयते।

**सञ्जयः** – किं त्वं प्रातः उत्थाय भ्रमसि, क्रीडसि पठसि च?

**रमा** – आम्। ...................................................................................................।

**सञ्जयः** – किं तव अग्रजः अभिनयं करोति?

**रमा** – नहि! ...................................................................................................।

**सञ्जयः** – किं तव पितामहः वाटिकां सिञ्चति ?

**रमा** – आम्। ...................................................................................................।

**सञ्जयः** – किं ते भगिनी चिकित्साशास्त्रं पठति ?

**रमा** – नहि। ...................................................................................................।

**भाववाच्ये 'क्त' प्रत्ययस्य प्रयोगः—**

**7. कर्तृपदैः तृतीयां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत –**

**यथा** – (i) कन्यया चिरं सुप्तम्।

(ii) बालकेन रात्रौ जागरितम्।

(क) ...................... उच्चैः हसितम्। (जन)

(ख) ...................... वृक्षस्य अधः स्थितम्। (पथिक)

(ग) ...................... औद्योगिकक्षेत्रे विकसितम्। (भारत)

(घ) ...................... तत्र उपविष्टम्। (भवत्–पुंलिङ्गे)

(ङ) ...................... मयि विश्वसितम्। (तत्–पुंलिङ्गे)

8. मञ्जूषायाः क्रियापदानि विचित्य रिक्तस्थानानि पूर्यन्ताम् –

(i) तया सभायां न .................... ।

(ii) सिंहचित्रं दृष्ट्वा शिशुना .................... ।

(iii) तेन प्रातः पञ्चवादने .................... ।

(iv) अधुना तु मया .................... ।

(v) यात्रिभिः वृक्षच्छायायां .................... ।

**मञ्जूषा**

रुदितम्, उपविष्टम्, विस्मृतम्, उत्थितम्, हसितम्।

## अस्माभिः अधीतम्

(1) वाच्यत्रयं भवति – कर्तृवाच्यम्, कर्मवाच्यम् भाववाच्यम् च।

(2) कर्तृवाच्ये क्रियायाः कर्त्रा सह सम्बन्धः भवति।
कर्मवाच्ये क्रियायाः कर्मणा सह सम्बन्धः भवति।

(3) भाववाच्ये कर्म न भवति।

(4) कर्तृवाच्ये (सकर्मकधातुयोगे) कर्तृपदं प्रथमाविभक्तौ, कर्मपदं द्वितीयाविभक्तौ क्रियापदं च कर्तृपदस्य पुरुष-वचनानुसारं भवति।

(5) कर्मवाच्ये तु कर्ता तृतीयाविभक्तौ, कर्म प्रथमाविभक्तिौ क्रिया च कर्मपदम् अनुसरति।

(6) भाववाच्ये तु कर्तरि तृतीया विभक्तिः भवति क्रिया च सदा प्रथम-पुरुषस्य एकवचने एव भवति। कर्तृपदे बहुवचने सत्यपि क्रिया प्रथमपुरुषैकवचने एव प्रयुज्यते।

(7) कर्मवाच्यस्य भावाच्यस्य वा क्रियापदनिर्माणे मूलधातुना सह 'य' योज्यते।
यथा – मूलधातुः + य + ते (पठ्यते, लिख्यते, सेव्यते)। सर्वेषां धातूनां रूपाणि आत्मनेपदे एव भवन्ति।

**पाठान्तर्गत-धातूनां कर्मणि/भावे प्रयोगः**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| कथ् | – | कथयति | कथ्यते | लिख् | – | लिखति | लिख्यते |
| प्र + नम् | – | प्रणमति | प्रणम्यते | क्री | – | क्रीणाति | क्रीयते |
| पच् | – | पचति | पच्यते | कृ | – | करोति | क्रियते |
| आ + नी | – | आनयति | आनीयते | दा | – | ददाति | दीयते |
| नी | – | नयति | नीयते | गम् | – | गच्छति | गम्यते |
| ग्रह् | – | गृह्णाति | गृह्यते | दृश् | – | पश्यति | दृश्यते |
| धृ | – | धारयति | धार्यते | श्रु | – | शृणोति | श्रूयते |

| | | | |
|---|---|---|---|
| अनु + भू | – | अनुभवति | अनुभूयते |
| प्र + शंस् | – | प्रशंसति | प्रशंस्यते |
| आ + रूप् + णिच् | – | आरोपयति | आरोप्यते |
| पूज् | – | पूजयति | पूज्यते |
| वि + धा | – | विदधाति | विधीयते |
| बन्ध् | – | बध्नाति | बध्यते |
| सेव् | – | सेवते | सेव्यते |
| रच् | – | रचयति | रच्यते |
| वृष् | – | वर्षति | वृष्यते |
| कम्प् | – | कम्पते | कम्प्यते |
| गर्ज् | – | गर्जति | गर्ज्यते |
| क्षाल् | – | क्षालयति | क्षाल्यते |
| उत् +डी | – | उड्डयते | उड्डीयते |
| शुभ् | – | शोभते | शुभ्यते |
| धाव् | – | धावति | धाव्यते |
| प्रति + ईक्ष् | – | प्रतीक्षते | प्रतीक्ष्यते |
| वन्द् | – | वन्दते | वन्द्यते |
| अभि + अस् | – | अभ्यस्यति | अभ्यस्यते |
| वि + श्वस् | – | विश्वसिति | विश्वस्यते |
| गै | – | गायति | गीयते |
| स्वप् | – | स्वपिति | सुप्यते |
| स्था | – | तिष्ठति | स्थीयते |
| अस् | – | अस्ति | भूयते |
| शीङ् | – | शेते | शीयते |
| उप + विश् | – | उपविशति | उपविश्यते |
| वि + कस् | – | विकसति | विकस्यते |
| खाद् | – | खादति | खाद्यते |
| आ + चर् | – | आचरति | आचर्यते |
| सिध् | – | सिध्यति | सिध्यते |
| पा | – | पिबति | पीयते |
| भुज् | – | भुनक्ति | भुज्यते |
| पूर् / पृञ् | – | पूरयति | पूर्यते |
| उप + दिश् | – | उपदिशति | उपदिश्यते |
| रुद् | – | रोदिति | रुद्यते |
| अभि + लष् | – | अभिलषति | अभिलष्यते |
| सम् + मन् + णिच् | – | सम्मानयति | सम्मान्यते |
| वृध् | – | वर्धते | वृध्यते |
| स्मृ | – | स्मरति | स्मर्यते |
| षिच्–क्षरणे | – | सिञ्चति | सिच्यते |
| रक्ष् | – | रक्षति | रक्ष्यते |
| हन् | – | हन्ति | हन्यते |
| भ्रम् | – | भ्रमति | भ्रम्यते |
| नश् + णिच् | – | नाशयति | नाश्यते |
| लभ् | – | लभते | लभ्यते |
| परि + ईक्ष् | – | परीक्षते | परीक्ष्यते |
| हृ | – | हरति | ह्रियते |
| क्रीड् | – | क्रीडति | क्रीड्यते |
| हस् | – | हसति | हस्यते |
| भू | – | भवति | भूयते |
| उत् + पत् | – | उत्पतति | उत्पत्यते |
| स्ना | – | स्नाति | स्नायते |
| नृत् | – | नृत्यति | नृत्यते |

## मिश्रितप्रश्ना:

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत।**

1. नाहं स्वर्गं मोक्षं वा कामये। ..........................................
2. अहं भवते चक्षुर्द्वयमेव प्रयच्छामि। ..........................................
3. अस्माभि: नेपथ्ये काकध्वनि: श्रूयते। ..........................................
4. केनापि कर्कशै: 'का का' शब्दै: वातावरणम् आकुलीक्रियते। ..........................................
5. अहं प्रभाते सुप्तान् प्रबोधयामि। ..........................................
6. मातर: शिशून् कथयन्ति। ..........................................
7. त्वं कथं माम् अपि अधिक्षिपसि। ..........................................
8. बक: क्रूरतया मीनान् भक्षयति। ..........................................
9. मेष: अहर्निशं महानसं प्रविशति। ..........................................
10. मेष: दाहवेदनया भूमौ लुठति। ..........................................
11. अहं मन्दभाग्या कथं धैर्यं धारयामि। ..........................................
12. भीमसेन: तत: निर्गच्छति। ..........................................
13. सम्प्रति अहम् आश्वस्त: अस्मि। ..........................................
14. नाहं त्वत्त: ब्रह्मास्त्रम् इच्छामि। ..........................................
15. गगनात् सहस्रश: उल्का: भूमौ पतन्ति। ..........................................
16. ब्रह्मास्त्रेण शैला: विदीर्यन्ते। ..........................................
17. तच्च मया संह्रियते। ..........................................
18. पिता पुत्राय महत् विद्याधनं यच्छति। ..........................................
19. छात्राणाम् एक: दल: तत्र प्रविशति। ..........................................
20. बालसमूह: मधुरस्वरेण गायति। ..........................................
21. विद्यालयस्य प्रधानाचार्य: तत्र आगच्छति। ..........................................
22. मान्य: पर्यटनाधिकारी युष्मान् प्रतीक्षते। ..........................................
23. वयम् अस्य विषये ज्ञातुम् उत्सुका: स्म:। ..........................................
24. भवद्भि: पर्यटनविभागेन प्रकाशिता सूची पठ्यते। ..........................................
25. प्रत्येकम् अयनस्य अवधि: षण्मासात्मक: भवति। ..........................................
26. य: हितानि न शृणोति स: बधिर: भवति। ..........................................

# पञ्चमः अभ्यासः

# सङ्ख्या



मम विद्यालयः दिल्ली महानगरस्य **एकः** आदर्शः विद्यालयः अस्ति। अस्मिन् विद्यालये **एकं** प्रमुखं प्रवेशद्वारम् अस्ति। एतत् सिंहद्वारम् कथ्यते, **त्रीणि** च सहायकानि द्वाराणि सन्ति। **चत्वारि** द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति। अस्माकं विद्यालये **एकः** सुयोग्यः प्रधानाचार्यः **द्वौ** च तस्य सहायकौ उपप्रधानाचार्यौ स्तः। विविधविषयाणां **शताधिकाः** शिक्षकाः सन्ति। छात्राणां सङ्ख्या **द्विसहस्राधिका** विद्यते। अत्र **तिस्रः** विज्ञानप्रयोगशालाः **एका** च सङ्गणकप्रयोगशाला अस्ति। एवं समस्तानां प्रयोगशालानां सङ्ख्या **चतस्रः** अस्ति। भाषाणां कृते अपि **त्रयः** पृथक् विभागाः सन्ति। **त्रिषु** अपि विभागेषु अनुभविनः शिक्षकाः सन्ति। अयं विद्यालयः **द्वादशकक्षापर्यन्तः** अस्ति। कतिपयासु कक्षासु पञ्च कतिपयासु च **सप्त** अनुभागाः सन्ति। प्रति अनुभागं **पञ्चाशत्** छात्राः सन्ति। **एकादशी-द्वादशी** च कक्षा **त्रिषु** विभागेषु विभक्ता अस्ति। तत्र विज्ञान-विभागः वाणिज्य-विभागः कला-विभागः च। अस्मिन् विद्यालये **द्वे** क्रीडाक्षेत्रे स्तः। **एकं** वरिष्ठेभ्यः छात्रेभ्यः **द्वितीयं** च कनिष्ठेभ्यः वर्तते। विद्यालयस्य परिसरे **त्रीणि** उद्यानानि सन्ति। **एकस्मिन्** पाटलपुष्पाणां बाहुल्यं विद्यते। **द्वयोः** च अन्येषां कुसुमानाम्। प्रत्येकम् उद्यानेषु हरितदूर्वायाः हरीतिमा जनानां मनांसि हरति। कार्यालये **त्रयः** लिपिकाः एकश्च कार्यालयस्य अधीक्षकः अस्ति। अधीक्षकेण सर्वकार्यं **त्रिषु** लिपिकेषु विभक्तं कृतम्। कार्यालयस्य **चत्वारः** लिपिकाः परस्परं सहयोगेन कार्यं कुर्वन्ति। अत एव अयं विद्यालयः अहर्निशम् उन्नतिपथं गच्छति।

**(क) उपरिप्रदत्त-अनुच्छेदात् स्थूलाक्षरैः मुद्रितानि सङ्ख्यावाचकानि पदानि चित्वा लिङ्गानुसारं पृथक्-पृथक् तालिकासु लिखत -**

| पुंलिङ्गम् | स्त्रीलिङ्गम् | नपुंसकलिङ्गम् |
|---|---|---|
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |
| .............................. | .............................. | .............................. |

## नियमा:

- सङ्ख्यावाचका: शब्दा: विशेषणानि भवन्ति।
- सङ्ख्याशब्देषु एकत: प्रारभ्य चतुर्-सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु पृथक्-पृथक् चलन्ति परन्तु पञ्चत: आरभ्य सर्वेषां सङ्ख्या-वाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु समानरूपेण चलन्ति।
- **यथा** – एकशब्दस्य रूपाणि (पुं० एक:, स्त्री-एका, नपुं०-एकम्) एकवचने भवन्ति। द्विशब्दस्य रूपाणि (द्वौ / द्वे / द्वे) द्विवचने भवन्ति। त्रिशब्दस्य रूपाणि (त्रय: / तिस्र: / त्रीणि) बहुवचने भवन्ति। पञ्चन्-आदिशब्दानां त्रिषु लिङ्गेषु रूपाणि समानानि एव भवन्ति।

**(ख) प्रदत्तम् अनुच्छेदम् आश्रित्य अधोलिखितवाक्येषु रिक्तस्थानानां पूर्तिम् उचितसङ्ख्यापदै: कुरुत –**

1. मम विद्यालय: .................. आदर्श: विद्यालय: अस्ति।
2. अस्मिन् विद्यालये .................. प्रमुखं प्रवेशद्वारम् अस्ति।
3. .................. सहायकानि द्वाराणि सन्ति।
4. .................. द्वाराणि केवलं छात्राणां गमनागमनकाले एव अनावृतानि भवन्ति।
5. अत्र .................. विज्ञानप्रयोगशाला: सन्ति।
6. विद्यालये .................. सङ्गणकप्रयोगशाला अस्ति।
7. भाषाणाम् अपि .................. विभागा: सन्ति।
8. कतिपयासु कक्षासु .................. अनुभागा:, कतिपयासु च .................. अनुभागा: सन्ति।
9. समस्तप्रयोगशालानां सङ्ख्या .................. अस्ति।
10. प्रधानाचार्यस्य .................. सहायकौ उपप्रधानाचार्यौ स्त:।

**(ग) वार्तालाप:**

**हर्षवर्द्धन:** – अहो कीदृशं रमणीयम् उद्यानम्?

**यशोवर्द्धन:** – बाढम्, अतिशोभनम्।

**हर्षवर्द्धन:** – अत्र तु आम्रवृक्षा: अपि सन्ति। अहं तान् गणितवान्। अस्मिन् उपवने विंशति: आम्रवृक्षा: सन्ति। किं त्वया गणिता:?

**यशोवर्द्धन:** – मया आम्रवृक्षा: नैव गणिता: परन्तु निम्बवृक्षाणां गणना कृता। तेषां सङ्ख्या पञ्चविंशति: अस्ति।

**हर्षवर्द्धन:** – त्वम् उद्यानं परित: परिभ्रम्य मह्यं निवेदय, अत्र कति अशोकवृक्षा: सन्ति?

**यशोवर्द्धन:** – श्रीमन्! अत्र पञ्चाशत् अशोकवृक्षा: सन्ति।

**हर्षवर्द्धन:** – अहो एष: सुगन्ध: कुत: आयाति?

**यशोवर्द्धन:** – सुगन्धस्तु मयापि अनुभूयते।

**हर्षवर्द्धन:** – पश्य, उद्यानस्य पूर्वभागे एका पुष्पवाटिका विद्यते, तत: एव समायाति सुगन्ध:।

**यशोवर्द्धन:** – तत्र चलित्वा पश्याव:। अत्र तु शताधिका: पाटलपादपा: सन्ति। अहं पाटलपुष्पाणि गणयामि। अस्यां

वाटिकायां चत्वारिंशत् विकसितानि, पञ्चत्रिंशत् च अर्द्धविकसितानि कुसुमानि सन्ति।

**हर्षवर्द्धनः** – मित्र! यावत् त्वया पाटलपुष्पाणि गणितानि तावत् मया जपाकुसुमानि गणितानि। अत्र चतु:पञ्चाशत् जपाकुसुमानि वर्तन्ते, येषां सुगन्धः सर्वत्र प्रसरति, वातावरणं सुरभितं सुरम्यं च करोति।

**( घ ) उपरिप्रदत्तवार्तालापात् सङ्ख्यावाचकानि पदानि चित्वा लिखत –**

**यथा** – विंशतिः

1. ..............................
2. ..............................
3. ..............................
4. ..............................
5. ..............................
6. ..............................
7. ..............................

## नियमनिर्धारणम्

**एकोनविंशतिः सङ्ख्यातः प्रारभ्य नव-नवतिः पर्यन्ताः सङ्ख्यावाचकशब्दाः एकवचनान्ताः नित्यस्त्रीलिङ्गाः च भवन्ति। एतेषां रूपाणि 'मति' शब्दवत् भवन्ति। त्रिंशत्, चत्वारिंशत्, पञ्चाशत् शब्दानां रूपाणि 'सरित्' शब्दवत् भवन्ति। षष्टिः, सप्ततिः, अशीतिः, नवतिः, एतेषां शब्दानां रूपाणि 'विंशतिवत्' भवन्ति।**

**( ङ) उपरि-प्रदत्तं वार्तालापम् आधृत्य अङ्कान् दृष्ट्वा रिक्तस्थानानि सङ्ख्यावाचकैः पदैः पूरयत –**

1. अस्मिन् उपवने (20) .................... आम्रवृक्षाः सन्ति।
2. उद्याने (50) .................... अशोकवृक्षाः सन्ति।
3. वाटिकायां (40) .................... विकसितानि च अर्द्धविकसितानि कुसुमानि सन्ति।
4. वाटिकायां (54) .................... गन्धकुसुमानि सन्ति।
5. उद्याने (25) .................... निम्बवृक्षाः सन्ति।

## षष्ठः अभ्यासः

# समयः



चतुर्वादनम्

(4.00)




द्वादशवादनम्

(12.00)



सपादचतुर्वादनम्

(4.15)



सार्धचतुर्वादनम्

(4.30)



पादोन-पञ्चवादनम्

(4.45)



पञ्चवादनम्

(5.00)

इदानीं कः समयः ?

इदानीम् अष्टवादनम्

दिव्या अष्टवादने विद्यालयं गच्छति।





इदानीं कः समयः ? ................................ ?

................................ ।





अहं ................................ ?

इदानीं कः समयः ?

................................

................................





त्वं ................................ ।





इदानीं कः समयः ?

................................

................................

सर्वे ................................ ।

## ध्यानेन पठत अवगच्छत च –

| | | | | | | |
|---|---|---|---|---|---|---|
| 1:00 | एक + वादनम् | = एकवादनम् | | 1:15 | सपाद + एकवादनम् | = सपादैकवादनम् |
| 2:00 | द्वि + वादनम् | = द्विवादनम् | | 2:15 | सपाद + द्विवादनम् | = सपादद्विवादनम् |
| 3:00 | त्रि + वादनम् | = त्रिवादनम् | | 3:15 | सपाद + त्रिवादनम् | = सपादत्रिवादनम् |
| 4:00 | चतुर् + वादनम् | = चतुर्वादनम् | | 4:15 | सपाद + चतुर्वादनम् | = सपादचतुर्वादनम् |
| 5:00 | पञ्च + वादनम् | = पञ्चवादनम् | | 5:15 | सपाद + पञ्चवादनम् | = सपादपञ्चवादनम् |
| 6:00 | षट् + वादनम् | = षड्वादनम् | | 6:15 | सपाद + षड्वादनम् | = सपादषड्वादनम् |
| 7:00 | सप्त + वादनम् | = सप्तवादनम् | | 7:15 | सपाद + सप्तवादनम् | = सपादसप्तवादनम् |
| 8:00 | अष्ट + वादनम् | = अष्टवादनम् | | 8:15 | सपाद + अष्टवादनम् | = सपादाष्टवादनम् |
| 9:00 | नव + वादनम् | = नववादनम् | | 9:15 | सपाद + नववादनम् | = सपादनववादनम् |
| 10:00 | दश + वादनम् | = दशवादनम् | | 10:15 | सपाद + दशवादनम् | = सपाददशवादनम् |
| 11:00 | एकादश + वादनम् | = एकादशवादनम् | | 11:15 | सपाद + एकादशवादनम् | = सपादैकादशवादनम् |
| 12:00 | द्वादश + वादनम् | = द्वादशवादनम् | | 12:15 | सपाद + द्वादशवादनम् | = सपादद्वादशवादनम् |

| | | | | | | |
|---|---|---|---|---|---|---|
| 1:30 | सार्ध + एकवादनम् | = सार्धैकवादनम् | | 1:45 | पादोन + एकवादनम् | = पादोनैकवादनम् |
| 2:30 | सार्ध + द्विवादनम् | = सार्धद्विवादनम् | | 2:45 | पादोन + द्विवादनम् | = पादोनद्विवादनम् |
| 3:30 | सार्ध + त्रिवादनम् | = सार्धत्रिवादनम् | | 3:45 | पादोन + त्रिवादनम् | = पादोनत्रिवादनम् |
| 4:30 | सार्ध + चतुर्वादनम् | = सार्धचतुर्वादनम् | | 4:45 | पादोन + चतुर्वादनम् | = पादोनचतुर्वादनम् |
| 5:30 | सार्ध + पञ्चवादनम् | = सार्धपञ्चवादनम् | | 5:45 | पादोन + पञ्चवादनम् | = पादोनपञ्चवादनम् |
| 6:30 | सार्ध + षड्वादनम् | = सार्धषड्वादनम् | | 6:45 | पादोन + षड्वादनम् | = पादोनषड्वादनम् |
| 7:30 | सार्ध + सप्तवादनम् | = सार्धसप्तवादनम् | | 7:45 | पादोन + सप्तवादनम् | = पादोनसप्तवादनम् |
| 8:30 | सार्ध + अष्टवादनम् | = सार्धाष्टवादनम् | | 8:45 | पादोन + अष्टवादनम् | = पादोनाष्टवादनम् |
| 9:30 | सार्ध + नववादनम् | = सार्धनववादनम् | | 9:45 | पादोन + नववादनम् | = पादोननववादनम् |
| 10:30 | सार्ध + दशवादनम् | = सार्धदशवादनम् | | 10:45 | पादोन + दशवादनम् | = पादोनदशवादनम् |
| 11:30 | सार्ध + एकादशवादनम् | = सार्धैकादशवादनम् | | 11:45 | पादोन + एकादशवादनम् | = पादोनैकादशवादनम् |
| 12:30 | सार्ध + द्वादशवादनम् | = सार्धद्वादशवादनम् | | 12:45 | पादोन + द्वादशवादनम् | = पादोनद्वादशवादनम् |

## अभ्यास:

**1. उदाहरणं दृष्ट्वा वाक्यानि रचयत –**


प्रात:




सायम्

**यथा** – रजनीश: प्रात:काले षड्वादने विद्यालयं गच्छति सायङ्काले च षड्वादने अध्ययनं करोति।


प्रात:




सायम्


प्रात:




सायम्

**2. अधोलिखितदिनचर्यायां रिक्तस्थानानि कालबोधकशब्दै: पूर्यन्ताम् –**

अहं .............................. वादने उत्तिष्ठामि .............................. च भ्रमणाय गच्छामि। तत्पश्चात् स्नानाल्पहारादिकं कृत्वा .............................. विद्यालयं गत्वा .............................. विद्यालयात् आगत्य .............................. भोजनं कृत्वा .............................. शयनं करोमि। पुन: .............................. उत्थाय .............................. वादनत: .............................. वादनपर्यन्तं गृहकार्यं करोमि। .............................. वादनत: .............................. पर्यन्तं क्रीडामि। रात्रौ .............................. भोजनं करोमि, .............................. वादनपर्यन्तम् अध्ययनं करोमि .............................. वादने च शयनाय गच्छामि।

**3. उचितकालबोधकपदै: रिक्तस्थानानि पूरयत –**

(क) सञ्जीव: प्रात: .............................. (5:00) जागर्ति।

(ख) अधोक्षज: .............................. (5:30) ईशवन्दनां करोति।

(ग) हार्दिक: .............................. (6:45) विद्यालयं गच्छति।

(घ) सौम्या .............................. (2:15) गृहं प्रत्यागच्छति।

(ङ) वैभव: रात्रौ .............................. (10:00) शयते।

# सप्तमः अभ्यासः

# अव्ययानि



**अधोलिखितं संवादं ध्यानेन पठत –**

(प्रातः उपवनं गत्वा बालाः परस्परम् आलपन्ति।)

**रमेशः** – एतत् उपवनम्। उपवनं परितः वृक्षाः शोभन्ते।

**तरुणः** – पश्य, अत्र बालकाः पादकन्दुकेन क्रीडन्ति।

**मेधावी** – आम्, तत्र एका कन्या अपि सखीभिः सह क्रीडति।

**कर्णः** – अत्र केचन जनाः तु शनैः-शनैः भ्रमन्ति केचित् च शीघ्रं-शीघ्रं चलन्ति।

**भास्करः** – पश्य, एकतः मालाकारः खनित्रेण भूमिं खनति बीजं च वपति।

**मोहनः** – सर्वत्र केदारेषु अनेकवर्णानि पुष्पाणि विकसन्ति।

**मनीषा** – पुष्पैः सह कण्टकानि अपि भवन्ति तथापि तानि सदा प्रसन्नचित्तानि एव।

**रमेशः** – वयम् अपि पुष्पाणि इव सदा प्रसन्नाः भवेम।

1. उपरिलिखितेषु वाक्येषु रेखाङ्कितपदानि चित्वा मञ्जूषायां लिखत –

**मञ्जूषा**

| | | | |
|---|---|---|---|
| ........................... | ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... | ........................... |
| ........................... | ........................... | ........................... | ........................... |

एतानि पदानि अव्ययानि सन्ति।

**अव्ययं नाम किम्?**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।**

**अर्थात्**

तत् पदम् अव्ययं कथ्यते, यस्मिन् पदे लिङ्ग-विभक्ति-वचन-कारणात् परिवर्तनं न भवति। यत् पदं सदा एकेन एव रूपेण तिष्ठति, तत् अव्ययम्।

यथा- अत्र, तत्र, कुत्र, कदा, अधुना, परितः इत्यादयः।

2. मञ्जूषातः उचित-अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –

वने (i) ........................... पशुमहोत्सवः अस्ति। मञ्चस्य (ii) ........................... सिंहः विराजते। आकाशे (iii) ........................... मेघाः सन्ति। मेघान् दृष्ट्वा मयूराः वृक्षाणाम् (iv) ........................... नृत्यन्ति। पशवः (v) ........................... भ्रमन्ति। सर्पः कोटरात् (vi) ........................... आगच्छति। सर्पात् भीताः पशवः कोलाहलं कुर्वन्ति। कोलाहलं श्रुत्वा सिंहः (vii) ........................... गर्जति आदिशति च – भोः! कोलाहलं (viii) ........................... कुरुत। शृणुत – अस्माकं जीवनं वृक्षान् (ix) ........................... असम्भवम्। वृक्षाः फलानि छायां (x) ........................... दत्त्वा अस्मान् उपकुर्वन्ति। (xi) ........................... अस्माभिः वने (xii) ........................... वृक्षाः रक्षणीयाः।

**मञ्जूषा**

नूनम्, उच्चैः, अद्य, बहिः, मा, उपरि, अधः,
अतः, विना, इतस्ततः, च, सर्वत्र।

♦ **अधः कोष्ठकस्थेषु अव्ययपदेषु कानिचित् पदानि कालबोधकानि, कानिचित् स्थानबोधकानि, कानिचित् प्रश्नबोधकानि प्रकीर्णानि च सन्ति।**

| कालबोधकानि | स्थानबोधकानि | प्रश्नबोधकानि | प्रकीर्णानि |
|---|---|---|---|
| पुरा, यदा, तदा,<br>अधुना, ह्यः<br>श्वः,<br>अद्य, परश्वः<br>परह्यः | अत्र, यत्र,<br>तत्र, अन्यत्र<br>सर्वत्र,<br>एकत्र<br>उभयतः | कदा, कुतः,<br>कुत्र, किमर्थम्<br>कथम्, कति,<br>किम् | इति, इव, चित्,<br>चन, मा, यत्,<br>यावत्-तावत्<br>यथा-तथा, सहसा<br>वृथा, कदापि |

## कालबोधकानि




♦ **उपरि कालचक्रे स्थितानि अव्ययपदानि अधोलिखितस्य संवादस्य सहायतया अवगच्छत -**

**अध्यापिका** - नमिते! किं त्वं जानासि कालिदासस्य कालम्?

**नमिता** - महाकविः कालिदासः **पुरा** अभवत्, परं तस्य निश्चितकालं **न** जाने।

**अध्यापिका** - राधे! किं त्वया तेन लिखितम् अभिज्ञानशाकुन्तलं नाटकं दृष्टम्?

**राधा** - आम्! महोदये! अहं तत् नाटकं द्रष्टुं **ह्यः** रवीन्द्ररङ्गशालाम् अगच्छम्।

**अध्यापिका** - नमिते! त्वम् इदं नाटकं द्रष्टुं **कदा** गमिष्यसि?

**नमिता** - अहं तु एतत् द्रष्टुं **श्वः** गमिष्यामि।

**अध्यापिका** - लतिके! किं त्वं नाटकं द्रष्टुं न इच्छसि?

**लतिका** - इच्छामि। **यदा** मम माता अनुमतिं दास्यति **तदा** अहं द्रक्ष्यामि।

3. **स्थूलाक्षराणि अव्ययपदानि अधः लिखत -**

.................. .................. .................. .................. .................. ..................

4. (क) मञ्जूषायां दत्तान् शब्दान् संयोज्य कानिचित् वाक्यानि रचयत –

| | | | |
|---|---|---|---|
| अहम् | ह्यः<br>श्वः<br>अधुना<br>यदा-कदा<br>अपि | उपवने<br>देवालयम्<br>भोजनम्<br>तरणताले<br>विद्यालयम् | अगच्छम्<br>भ्रमामि<br>तरिष्यामि<br>करोमि<br>गच्छामि |

(i) ..................................................................

(ii) ..................................................................

(iii) ..................................................................

(iv) ..................................................................

(v) ..................................................................

(ख) 'ह्यः – श्वः' इति प्रयोगेण शृङ्खलां पूरयत –

यथा – (i) ह्यः रविवासरः आसीत् **श्वः सोमवासरः भविष्यति।**

(ii) ..................... बुधवासरः आसीत् श्वः गुरुवासरः भविष्यति।

(iii) ..................... शुक्रवासरः आसीत् ..................... शनिवासरः भविष्यति।

(iv) ..................... सोमवासरः आसीत् ..................... मङ्गलवासरः भविष्यति।

ध्यातव्यम् –

**केषाञ्चित् अव्ययानां प्रयोगः युग्मरूपेण अपि भवति।**

(i) यत्र-तत्र

(ii) यदा-तदा

(iii) यावत्-तावत्

(iv) यदि-तर्हि

(v) अत्र-तत्र

(vi) चेत्-नो चेत्

(vii) यथा-तथा

5. (क) उदाहरणं दृष्ट्वा रिक्तस्थानानि पूरयत –



यत्र पुस्तकालयः तत्र पाठकाः।



............ कृष्णमेघाः ............ वृष्टिः।



............ आम्रवृक्षः ............ कोकिलः।



............ पुष्पाणि ............ भ्रमरा: ।

............ देवालय: ............ भक्ता: ।



**( ख ) उदाहरणम् अनुसृत्य अव्ययपदै: संवादं पूरयत –**

**अध्यापक:** – भास्कर: कोकिल: कदा कूजति ?

**भास्कर:** – यदा वसन्तागमनं भवति तदा कोकिल: कूजति।

**अध्यापक:** – शोभनम्! कृषका: कदा नन्दन्ति ?

**भास्कर:** – .................... सुवृष्टि: भवति .................... कृषका: नन्दन्ति।

**अध्यापक:** – साधु! तम: कदा नश्यति ?

**भास्कर:** – .................... भानु: उदयति, .................... तम: नश्यति।

**अध्यापक:** – अतिशोभनम्! मयूरा: कदा नृत्यन्ति ?

**भास्कर:** – .................... मेघा: गर्जन्ति .................... मयूरा: नृत्यन्ति।

**अध्यापक:** – सुष्ठु! मेघा: कदा अपसरन्ति ?

**भास्कर:** – .................... वात: चलति .................... मेघा: अपसरन्ति।

**( ग ) उदाहरणम् अनुसृत्य 'यावत्-तावत्' इति युग्मस्य रिक्तस्थानेषु उचितं प्रयोगं कुरुत –**

**यथा** – (i) **यावत्** दीयते **तावत्** धनस्य सदुपयोग: भवति।

(ii) .................... परोपकार: क्रियते .................... शरीरस्य सदुपयोग: ।

(iii) .................... स्थास्यन्ति गिरय: .................... रामायणी कथा प्रचरिष्यति।

(iv) .................... एव मार्जार: प्रविशति .................... सर्वे मूषका: पलायिता: ।

**यातायातस्य चिह्नै: 'मा' अव्ययस्य अवबोधनम् –**


मा तिष्ठ


ध्वनिं मा कुरु


मा गच्छ


दक्षिणं प्रति मा गच्छ


वामं प्रति मा गच्छ

6. **उदाहरणम् अनुसृत्य वाक्यपरिवर्तनं कुरुत –**

| | |
|---|---|
| **यथा – रामः असत्यं न वदेत्।** | **असत्यं मा वद।** |
| बालकः पथि न क्रीडेत्। | पथि ...................... क्रीड। |
| छात्राः कक्षायाम् उच्चैः न वदेयुः। | छात्राः! कक्षायाम् उच्चैः ...................... वदत। |
| रवीन्द्रः दीर्घसूत्री न भवेत्। | रवीन्द्र! दीर्घसूत्री ...................... भव। |
| सः कदापि पर्युषितम् अन्नं न खादेत्। | पर्युषितम् अन्नं ...................... खाद। |

7. **अधुना 'इव' अव्ययस्य प्रयोगेण अधोलिखितपदानां समुचितमेलनं क्रियताम्—**

| | | | | | |
|---|---|---|---|---|---|
| नरः | चन्द्रः | **यथा –** | नरः | व्याघ्रः | इव |
| करः | कमलम् | | ...................... | ...................... | ...................... |
| मुखम् | पल्लवः | | ...................... | ...................... | ...................... |
| चरणम् | व्याघ्रः | | ...................... | ...................... | ...................... |

8. **''इति'' अव्ययस्य प्रयोगः।**

**उदाहरणम्** – तैत्तिरीयोपनिषद् आदिशति – 'सत्यं वद, धर्मं चर' इति। एवमेव 'इति' अव्ययस्य प्रयोगं कृत्वा अस्यां मञ्जूषायां प्रदत्तान् वाक्यांशान् ग्रन्थैः सह योजयत।

(1) सत्यमेव जयते

(3) ईशावास्यमिदं सर्वम्

(2) कर्मण्येवाधिकारस्ते

(4) वाग्भूषणं भूषणम्

(2) भगवद्गीता

(3) ईशावास्योपनिषत्

(4) नीतिशतकम्

(1) मुण्डकोपनिषद्

(i) ......................................................................................................

(ii) ......................................................................................................

(iii) ......................................................................................................

(iv) ......................................................................................................

9. **अधोलिखितेषु हास्यालापेषु अव्ययपदानि रेखाङ्कितानि कृत्वा अधः लिखत।**

**(i)** **याचकः** – श्रेष्ठिन्! एकं पणं देहि।

**श्रेष्ठी** – अत्र कोऽपि मानवः न अस्ति।

**याचकः** – कृपया त्वम् एव अस्मिन् समये मानवः भव।

(ii) **अनिलः** – राजेश! नूनम् आवां मित्रे स्वः। जानासि किं मित्रस्य लक्षणम्?

**राजेशः** – सम्यक् जानामि।

**अनिलः** – तर्हि मदर्थं त्वं किं किं कर्तुं समर्थोऽसि?

**राजेशः** – अहं त्वदर्थं मृत्युनापि योद्धुं सज्जोऽस्मि।

(सहसा व्याघ्रः दृष्टिपथे समायाति)

**अनिलः** – रे वीर! रक्ष माम्, एष व्याघ्रः मां खादति।

**राजेशः** – अरे! मया मृत्युना योद्धुं कथितं न तु व्याघ्रेण।

**अव्ययानि–** .............. .............. .............. .............. .............. ..............

.............. .............. .............. .............. .............. ..............

.............. .............. .............. .............. .............. ..............

## 10. अव्ययपदानि रेखाङ्कितानि कुरुत –

(i) अलसस्य कुतः विद्या अविद्यस्य कुतः धनम्।
अधनस्य कुतः मित्रम् अमित्रस्य कुतः सुखम्॥

(ii) शनैः कन्था शनैः पन्थाः शनैः पर्वतलङ्घनम्।
शनैः विद्या शनैः वित्तम् पञ्चैतानि शनैः शनैः॥

(iii) त्वमेव माता च पिता त्वमेव,
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव,
त्वमेव सर्वं मम देव देव॥

(iv) वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम्।
वृथा दानं समर्थस्य वृथा दीपो दिवाऽपि च॥

(v) यावत् स्थास्यन्ति गिरयः सरितश्च महीतले।
तावद् रामायणी कथा लोकेषु प्रचरिष्यति॥

## 11. उचिताव्ययपदैः रिक्तस्थानानि पूरयत –

कुत्र, तर्हि, कथम्, च, अत्र।

(i) शतयोजनपर्यन्तं शैलानां पारं .................... द्रष्टुं समर्थः भव इति।

(ii) अहं यदि तव सन्ततिं न पालयामि .................... कुत्र स्युः पिकाः?

(iii) हा! दग्धा मे घोटकाः .................... रक्षणीयाः?

(iv) स पापकर्मा .................... गतः? इति न जानीमः।

(v) भो, भो बालकाः! कथम् .................... नतोन्नते मार्गे क्रीडथ?

## मिश्रितप्रश्नाः

**1. अधोलिखितपङ्क्तिषु अव्ययपदानि रेखाङ्कितानि कुरुत –**

(क) अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।

(ख) न चन्दनरसः न शीतला छाया च पुरुषं प्रह्लादयति।

(ग) अथ एकदा भगवान् बोधिसत्त्वः शिवीनां राजा जातः।

(घ) सः बाल्यात् एव शास्त्रपारङ्गतः आसीत्।

(ङ) तत्र अर्थिनां समूहः अभीष्टवस्तूनि प्राप्नोत्।

**2. मञ्जूषापदसहायतया उचिताव्ययपदैः रिक्तस्थानानि पूरयत –**

अपि, एव, यदि, इव, नूनम्।

(क) ...................... भवान् प्रीतः तदा त्वत्तः एकस्य चक्षुषः दानम् इच्छामि।

(ख) ...................... ईदृशं दानम् इच्छन् अयं केनापि प्रेरितः स्यात्।

(ग) सः याचकः ...................... तत् नेत्रं यथास्थानम् अस्थापयत्।

(घ) राजा नीलोत्पलम् ...................... एकं चक्षुः प्रीत्या अयच्छत्।

(ङ) अलम् एतावता दुस्साहसेन प्रभूतं धनम् ...................... दीयताम्।

**3. मञ्जूषायाः उचिताव्ययानि चित्वा रिक्तस्थानपूर्तिं कुरुत –**

वृथा, तर्हि, शनैः, च, इति।

(क) राजा एकं चक्षुः ...................... अक्षतम् उत्पाट्य प्रीत्या याचकाय समर्पितवान्।

(ख) शतयोजनपर्यन्तं शैलानां पारं च द्रष्टुं समर्थः भव ...................... उक्त्वा शक्रः अन्तर्हितः अभवत्।

(ग) अस्य याच्ञा ...................... मा अस्तु इति राजा अमात्यान् अकथयत्।

(घ) सरस्तीरे राजहंसः हंसी ...................... विहरतः।

(ङ) यदि अहं कृष्णवर्णः ...................... श्रीरामस्य वर्णः कीदृशः?

**4. मञ्जूषापदसहायतया रिक्तस्थानानि पूरयत –**

इव, अधुना, तु, तदा, अपि।

(क) बकः अविचलं ध्यानमग्नः 'स्थितप्रज्ञः' ...................... तिष्ठति।

(ख) मयूरस्य केकारवं श्रुत्वा कोकिलः ...................... लज्जते।

(ग) यदा कोकिलः पञ्चमस्वरेण गायति ...................... श्रोतारः मन्त्रमुग्धा इव भवन्ति।

(घ) ...................... रमणीया हि सृष्टिरेषा जगत्पतेः।

(ङ) एतत् कार्यं ...................... कुक्कुटोऽपि करोति।

**5. अव्ययपदानि अधोलिखितवाक्येषु रेखाङ्कितानि कुरुत –**

(क) जिह्वालोलुपः मेषः महानसं प्रविश्य यत् पश्यति तद् भक्षयति।

(ख) अहं तु वनं गच्छामि।

(ग) अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः।

(घ) ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्।

(ङ) तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।

**6. मञ्जूषातः उचिताव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –**

एकदा, इव, च, यदि, यावत्।

(क) पुत्रशोकसन्तप्ताः युधिष्ठिरः, भीमः द्रौपदी ...................... रणभूमौ प्रविशन्ति।

(ख) अग्निः ...................... दहति मामयं शोकः।

(ग) ...................... असौ क्रूरकर्मा न दण्ड्यते तावत् अहम् इतः न गमिष्यामि।

(घ) ...................... ब्रह्मास्त्रं प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात्।

(ङ) सः ...................... द्वारकापुरीम् आगच्छत्।

**7. मञ्जूषापदसहायतया रिक्तस्थानानि पूरयत –**

इव, सम्प्रति, उच्चैः, मा, यदि।

(क) प्रिये द्रौपदि! एवं ...................... ब्रूयाः।

(ख) युधिष्ठिरः '...................... आश्वस्तः अस्मि' इत्यवदत्।

(ग) ...................... कश्चित् गर्ते पतेत् तर्हि स विकलाङ्गो भूत्वा चिरं क्लेशम् अनुभवेत्।

(घ) गुरूपदेशेन ...................... अनेन बालवचसा मम चक्षुषी समुन्मीलिते।

(ङ) प्रच्छन्नभाग्यः ...................... अक्रन्दत्।

**8. अधोलिखितवाक्येषु अव्ययपदानि रेखाङ्कितानि कुरुत –**

(क) इदानीं विषादं त्यक्त्वा उद्यमः क्रियताम्।

(ख) सखे यदि मां मित्रस्थाने परिगणयसि, तर्हि साधुजनगर्हितम् इमं पन्थानं त्यजतु भवान्।

(ग) प्रच्छन्नभाग्यः श्रमेण शनैः शनैः प्रभूतं धनम् अर्जितवान्।

(घ) अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

(ङ) आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।

(च) न कुर्यादहितं कर्म स परेभ्यः कदापि च।

**9. मञ्जूषायाः उचिताव्ययपदानि चित्वा रिक्तस्थानानि पूरयत –**

अद्य, यत्, अधुना, एव, इति।

(क) अरुणाचलप्रदेशस्य एकस्मिन् विद्यालये ........................ उत्सवस्य वातावरणम्।

(ख) तदा ........................ छात्राणाम् एकः दलः तत्र प्रविशति।

(ग) प्रसीदामि ........................ भवन्तः अस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः।

(घ) 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' ........................ अस्ति।

(ङ) ........................ तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः।

10. अधोलिखितवाक्येषु अव्ययपदानि रेखाङ्कितानि कुरुत –

(क) प्राचीनतमा हि एषा गणना।

(ख) एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते।

(ग) अये! कथम् इमं सङ्कल्पं श्रुत्वा विस्मिताः यूयम्?

(घ) सूर्यस्य द्वे गती उत्तरायणं दक्षिणायनञ्च।

(ङ) षड्ऋतवः एव मे नाभयः।

## अष्टमः अभ्यासः

# अशुद्धिसंशोधनम्

**1. अधोलिखितानि वाक्यानि ध्यानेन पठत –**

(क) **सः** बालिका अस्ति।

(ख) **तौ** बालकाः क्रीडन्ति।

(ग) शिक्षकः सूचनां **वदन्ति**।

(घ) **श्वः** कार्यक्रमः अभवत्।

(ङ) त्वं पाठं **पठति**।

(च) क्रीडकः **कन्दुकं** क्रीडति।

(छ) माता **बालकं** मोदकं ददाति।

वयं पश्यामः यत् उपरितन-वाक्येषु रेखाङ्कितानि पदानि शुद्धानि न सन्ति। यदि ध्यानेन पश्यामः तर्हि अवगम्यते यत् एतेषु लिङ्ग-वचन-लकार-पुरुष-विभक्ति-दृष्ट्या दोषाः सन्ति। अतः सर्वदा अपि वाक्यनिर्माण-सन्दर्भे एते अंशाः अनिवार्यतया अवधातव्याः।

**2. अधुना उपरितन-वाक्यानां शुद्धरूपाणि पश्यामः –**

(क) **सा** बालिका अस्ति। (लिङ्गसम्बद्धः)

(ख) **ते** बालकाः क्रीडन्ति। (वचनसम्बद्धः-विशेषण-विशेष्यम्)

(ग) शिक्षकः सूचनां **वदति**। (कर्तृक्रियात्मकः वचनसम्बद्धः)

(घ) **ह्यः** कार्यक्रमः अभवत्। (लकारसम्बद्धः)

(ङ) त्वं पाठं **पठसि**। (पुरुषसम्बद्धः)

(च) क्रीडकः **कन्दुकेन** क्रीडति। (विभक्तिसम्बद्धः)

(छ) माता **बालकाय** मोदकं ददाति। (विभक्तिसम्बद्धः)

**3. अधोलिखितानि वाक्यानि संशोध्य लिखत – ( लिङ्गसम्बद्धानि वाक्यानि )**

(क) उत्तमा **बालकः** तत्र अस्ति। ..............................

(ख) अद्य मम **मित्रः** गृहम् आगच्छति। ..............................

(ग) **सुन्दरः** वातावरणम् अस्ति। ..............................

(घ) **विशाला** जलधिः अस्ति। ..............................

(ङ) **वृक्षं** छायां फलं च ददाति। ..............................

4. **वचनसम्बद्धानि वाक्यानि –**

(क) **सुन्दरी** बालिकाः वार्तां कुर्वन्ति। ..........................................................

(ख) **युवां** पाठं पठसि। ..........................................................

(ग) तत्र **निपुणः** क्रीडकौ क्रीडतः। ..........................................................

(घ) अहं श्लोकान् **स्मरामः**। ..........................................................

(ङ) कार्यक्रमः उत्तमः **अभवन्**। ..........................................................

5. **लकारसम्बद्धानि वाक्यानि –**

(क) श्वः परीक्षा **अभवत्**। ..........................................................

(ख) अहं **परह्यः** विदेशं गच्छामि। ..........................................................

(ग) त्वं ह्यः कुत्र **गमिष्यसि**। ..........................................................

(घ) पुरा श्रीरामः अयोध्यायाः राजा **अस्ति**। ..........................................................

(ङ) राघवः परश्वः वेदपारायणम् **अकरोत्**। ..........................................................

6. **पुरुषसम्बद्धानि वाक्यानि –**

(क) यूयं लेखम् **अलिखन्**। ..........................................................

(ख) सः कार्यं **कुरु**। ..........................................................

(ग) वयं सर्वे संस्कृतेन सम्भाषणं **कुर्वन्ति**। ..........................................................

(घ) क्रीडकाः तत्र **क्रीडत**। ..........................................................

(ङ) **भवन्तौ** कस्य देशस्य नागरिकौ स्थः? ..........................................................

7. **विभक्तिसम्बद्धानि वाक्यानि –**

(क) कृषकः **ग्रामेण** नगरं गच्छति। ..........................................................

(ख) राघवेन्द्रः **लेखन्याः** लिखति। ..........................................................

(ग) **गणेशं** मोदकं रोचते। ..........................................................

(घ) बालाः जन्तुशालायां **जन्तवः** पश्यन्ति ..........................................................

(ङ) छात्रः **विद्यालये** गच्छति। ..........................................................

## मिश्रितप्रश्नाः

1. **अधोलिखितवाक्येषु रेखाङ्कितशुद्धपदाय उचितं पदं चित्वा वाक्यानि पुनः लिखत –**

(क) भारति! तव अयं कोशः **अपूर्वं** विद्यते।

(i) अपूर्वः (ii) अपूर्वा (iii) अपूर्वाः (iv) अपूर्वाणि

(ख) नास्ति **<u>रागसमानि</u>** दुःखम्।

(i) रागसमः (ii) रागसमा (iii) रागसमम् (iv) रागसमे

(ग) बोधिसत्त्वः शिवीनां राजा **<u>अभवम्</u>**।

(i) अभवः (ii) अभवत् (iii) अभवम् (iv) अभवन्

(घ) राज्ञः नेत्रदाननिश्चयं ज्ञात्वा अमात्याः **<u>अवदत</u>**।

(i) अवदत् (ii) वदिष्यति (iii) अवदम् (iv) अवदन्

(ङ) **<u>अहम्</u>** अपि तत् नेत्रं यथास्थानम् अस्थापयत्।

(i) सः (ii) त्वम् (iii) आवाम् (iv) ते

**2. अधोलिखितानि वाक्यानि त्रुटियुक्तानि सन्ति, भवन्तः एतानि संशोध्य लिखन्तु –**

(क) भूयः प्रीताः शक्रः वरम् अयच्छत्। ..............................

(ख) सरस्तीरे राजहंसः हंसी च विहरन्ति। ..............................

(ग) सः कथं माम् अपि अधिक्षिपसि। ..............................

(घ) मम केकारवं श्रुत्वा कोकिलः अपि लज्जामहे। ..............................

(ङ) युवां न तावत् कलहेन समयं वृथा यापयेत। ..............................

**3. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितं पदं चिनुत –**

(क) कस्मिंश्चित् नगरे चन्द्रो नाम भूपति **<u>प्रतिवसतः</u>** स्म।

(i) प्रतिवसति (ii) प्रतिवससि (iii) प्रतिवसामि (iv) प्रतिवसन्ति

(ख) सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं **<u>भवति</u>**।

(i) अभवत् (ii) भवतु (iii) भविष्यति (iv) भवेत

(ग) यूथपः सर्वान् कपीन् आहूय रहसि **<u>अवदम्</u>**।

(i) वदति (ii) वदिष्यन्ति (iii) अवदन् (iv) अवदत्

(घ) कपयः प्रहस्य **<u>अवदाम</u>**।

(i) अवदत् (ii) अवदम् (iii) अवदन् (iv) वदिष्यन्ति

(ङ) ऊर्णाप्रचुरः **<u>मेषौ</u>** दाहवेदनया भूमौ लुठति।

(i) मेषम् (ii) मेषः (iii) मेषेण (iv) मेषेस्य

**4. एतानि त्रुटियुक्तानि वाक्यानि यूयं संशोध्य पुनः लिखत –**

(क) चञ्चलः हि मनः कृष्ण। ..............................

(ख) मनं दुर्निग्रहं चलं च भवति। ..............................

(ग) अयं पुरुषः पापं चरसि। ..............................

(घ) अग्निः इव दहन्ति मामयं शोकः। ..............................

(ङ) नकुलः तव सारथिः भव। ..........

5. अधोलिखितवाक्येषु रेखाङ्कितानि पदानि अशुद्धानि सन्ति, विकल्पेभ्यः उचितं शुद्धं विकल्पं चिनुत –

(क) मन्ये <u>ते</u> ब्रह्मास्त्रप्रयोगं न करिष्यति।

(i) सः (ii) त्वम् (iii) अहम् (iv) तौ

(ख) रे दुष्ट भीम! त्वम् अद्य **<u>वध्योऽस्मि</u>**।

(i) वध्योऽस्ति (ii) वध्योऽसि (iii) वध्यः सन्ति (iv) वध्यः स्मः

(ग) युधिष्ठिरार्जुनौ रथारोहणं **<u>नाटयति</u>**।

(i) नाटयन्ति (ii) नाटयथः (iii) नाटयतः (iv) नाटयामः

(घ) न जानाति भवान् द्रौणेः **<u>चपलं</u>** प्रकृतिम्।

(i) चपलाम् (ii) चपला (iii) चपलया (iv) चपलायाः

(ङ) प्रच्छन्नभाग्यस्य भार्या **<u>बुद्धिमान्</u>** आसीत्।

(i) बुद्धिमन्तः (ii) बुद्धिमन्तौ (iii) बुद्धिमती (iv) बुद्धिमत्यः

6. अधोलिखितवाक्येषु काश्चन अशुद्धयः सन्ति। ताः अपाकृत्य वाक्यानि संशोध्य लिखत –

(क) परद्रव्ये अनासक्तः सा न्यवेदयत्। ..........

(ख) अहो विचित्रः स्वप्नं मया दृष्टः। ..........

(ग) दुष्टबुद्धिः क्षेत्रं गता। ..........

(घ) वाक्पटुः धैर्यवती मन्त्री न परिभूयते। ..........

(ङ) वयं स्वागतं कुर्वन्ति। ..........

7. अधोलिखितवाक्येषु रेखाङ्किताशुद्धपदाय उचितं पदं चिनुत –

(क) कृष्ण! मनः हि **<u>चञ्चलः</u>**।

(i) चञ्चलम् (ii) चञ्चला (iii) चञ्चल! (iv) चञ्चलानि

(ख) सः शस्यक्षेत्रे हलकार्यं कर्तुम् **<u>आरभे</u>**।

(i) आरभन्त (ii) आरभध्वम् (iii) आरभेताम् (iv) आरभत

(ग) 'साडकेन' एकम् अन्यत् पर्व **<u>सन्ति</u>**।

(i) अस्मि (ii) अस्ति (iii) असि (iv) स्तः

(घ) अहं **<u>जानासि</u>** इदं स्थानम्।

(i) जानाति (ii) जानन्ति (iii) जानामि (iv) जानीमः

(ङ) कालः भूतं वर्तमानं भविष्यदपि च **<u>वीक्षमाणं</u>** जगतः विकासस्य साक्षी भवति।

(i) वीक्षमाणानि (ii) वीक्षमाणा (iii) वीक्षमाणाः (iv) वीक्षमाणः

# नवमः अभ्यासः

# रचनात्मककार्यम्

## (क) चित्रवर्णनम्

- चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन वाक्यानि रचयत –

1.



**मञ्जूषा**

होलिकापर्व, वर्णाः, आनन्दम्, गृहाणि, जलम्, द्रोणी, मार्गः, क्षिपति, विभिन्नाः, बालकौ, वर्णक्षेपणी, बालिका, वर्णोत्सवः।

2.



**मञ्जूषा**

छत्रविक्रेता, समीकरोति, आपणिकः, रक्तछत्रम्, बालिका, विद्यालयस्य, वेशभूषा, वृक्षाः, पश्यति, ग्राहकः।

3.



**मञ्जूषा**

परिवारः, कुक्कुरः, फलानि, सहभोजम्, माता, पिता, उद्यानविहाराय, पुत्रः, पुत्री, वृक्षाः, देवालयः, जनाः, उपविश्य, कुर्वन्ति।

4.



**मञ्जूषा**

बालकाः, वृक्षारोपणम्, कुर्वन्ति, पादपम्, जलपात्रेण, सिञ्चति, पर्यावरणम्, शुद्धम्, खनित्रम्, हरीतिमा, पुष्पाधानी, विद्यालये, बालकः, वृक्षौ।

5.



**मञ्जूषा**

बसस्थानकम्, भारवाहकः, बसयानानि, जनाः, प्रतीक्षाम्, तिष्ठति, समाचारपत्रम्, कुर्वन्ति, परिवारः, यानपेटिका, अवकरपात्रम्, यात्रा।

6.



मञ्जूषा

चायविक्रेता, बालकः, जनः, तिष्ठति, वृक्षाः, समाचारपत्रम्, पठति, विक्रीणीते, चल-आपणः, सुपिष्टकानि, अवकरपात्रम्।

7.



मञ्जूषा

वन्यजीवनम्, चित्रोष्ट्रः, भल्लूकः, गजः, गजशावकः, पिबति, नदी, हरीतिमा, वृक्षाः, सुन्दरं दृश्यम्, मृगः, जलम्।

8.



मञ्जूषा

तरन्ति, उद्यानस्य, मित्रैः, एका, स्तः, चत्वारः, शाटिकाम्, कोणे, दम्पती, जलाशयः।

9.



**मञ्जूषा**

प्रसीदति, दत्तचित्तः, आदर्शः, पितुः, चरणस्पर्शम्, कपाटिकायाम्, उपरि, ददाति, पुस्तकानि, भित्तौ, चित्रम्, पुष्पाधानी, आशीर्वादम्।

10.



**मञ्जूषा**

रक्षणीयम्, अन्ये, क्षिपति, सह, अवशिष्टः, अङ्कितम्, माता, वाहनम्, धूमः, जीवनम्, प्राणवायुः, बालकः, कर्तिताः वृक्षाः, पर्यावरणम्।

11.



**मञ्जूषा**

दर्दुराः, वर्षा-ऋतौ, गृहीत्वा, मेघाच्छन्नम्, धारयति, कर्गदनौकाः, उपविष्टाः, आतपत्रम्।

12.



**मञ्जूषा**

नदी, जनः, स्नानम्, तटे, वृक्षे, नृत्यति, चित्रे, शुकः, अनेके, पक्षिपरिषद्, खगाः, कूजन्ति, काकः, मयूरः, चर्चयन्ति।

## ( ख ) अनुच्छेदलेखनम्

- **मञ्जूषातः पदानि विचित्य अधः प्रदत्तान् विषयान् आधृत्य अनुच्छेदं लिखत।**

### 1. जलस्य महत्त्वम्

| |
|---|
| जलम्, क्षेत्राणाम्, विना, जीवने, स्नानाय, भोजनस्य, अस्माभिः, महत्त्वपूर्णम्, कर्तुम्, क्षालनाय, दूषितेन, जायन्ते। |

### 2. मम मातृभूमिः

| |
|---|
| अस्माभिः, पोषणम्, स्वर्गादपि, येन-केन-प्रकारेण, सत्यम्, मातृभूमिः, अहम्, माता, यच्छति, वन्दनीया। |

### 3. मम जननी

| |
|---|
| चतुर्वादने, एकाकी, प्रतिवेशिनाम्, स्निह्यति, महिला, विज्ञानस्य, परिश्रमी, मयि, करोति, अस्मि, अध्यापयति। |

### 4. मम जीवनस्य उद्देश्यम्

| |
|---|
| प्रसिद्धसङ्गीतगायकस्य, अहम्, पञ्चवर्षीयः, रोचते, इच्छामि, सङ्गीतश्रवणे, मह्यम्, आरब्धम्, स्वगुरुम्, सङ्गीतशिक्षकरूपे, भैरवीरागः। |

### 5. प्रातः-भ्रमणम्

| |
|---|
| रुग्णः, वर्धते, व्यायामः, अहम्, चतुर्दशवर्षीयः, एकः, प्रातः-भ्रमणेन, मया, एकस्मिन्, चत्वारि। |

### 6. अनुशासनम्

| |
|---|
| आवश्यकम्, जीवने, नियमपालनम्, सर्वेभ्यः, सर्वत्र, विकासः, साफल्यम्, शीलः, प्रत्येकम्। |

### 7. परोपकारः

| |
|---|
| परेषाम्, उपकारः, धनेन, दानेन, सर्वेषाम्, प्राणिनाम्, कर्तव्यम्, हितम्, भवति, प्रकृतिः। |

### 8. सत्सङ्गतिः

| |
|---|
| सताम्, सर्वम्, ददाति, हिताय, योजयते, सङ्गः, उन्नतिः, सत्सङ्गत्या, प्रभावः, नित्यम्, अद्भुतम्। |

### 9. शिक्षा

| |
|---|
| सर्वेषाम्, मानवानाम्, अधिकारः, कर्तव्यानि, साक्षरताम्, विवेकः, विकासम्, करोति, पशुमानवेषु, भेदम्, जनयति। |

## ( ग ) पत्रलेखनम्

1. **सुकन्या कोलकातानगरे छात्रावासे निवसति। सा विद्यालयतः शैक्षिकभ्रमणाय भुवनेश्वरं गन्तुम् इच्छति। एतदर्थम् अनुमतिं राशिं च प्राप्तुं सा नवदिल्लीस्थं पितरं प्रति पत्रम् एकं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।**

छात्रावासः,
राजकीयः विद्यालयः
(i) .................................... ।
तिथिः 25-02-2025

माननीयाः पितृवर्याः !

सादरं प्रणमामि।

भवतः पत्रं प्राप्तम्। मम (ii) ........................... परीक्षा समाप्ता। परीक्षापत्राणि अतिशोभनानि जातानि। यावत् परीक्षापरिणामः न आगच्छति तावत् आगामिमासस्य प्रथमसप्ताहे (iii) ........................... विद्यालयस्य अध्यापिकाः अस्मान् शैक्षिकभ्रमणाय (iv) ........................... नेष्यन्ति। अहम् अपि ताभिः (v) ........................... गन्तुम् इच्छामि। एतदर्थं मया कक्षाध्यापिकायै (vi) ........................... रूप्यकाणि दातव्यानि सन्ति। अतः यदि अनुमतिः (vii) ........................... तर्हि अहम् अपि गच्छेयम्। ज्ञानवर्धनार्थम् एतत् अतिरिच्य अवसरं न पश्यामि। अतः कृपया उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु।

सर्वेभ्यः मम (viii) ........................... निवेदनीयाः।

भवतां प्रिया (ix) ....................
सुकन्या

पत्रवेष्टनम्।

सविधे
श्री प्रणवभट्टाचार्यः,
26, चितरञ्जनपार्कः,
नवदिल्ली (x) ...........................

**मञ्जूषा**

| |
|---|
| प्रणामाः, सह, कोलकातातः, स्यात्, पञ्चसहस्रम्, 110019, भुवनेश्वरम्, प्रथमसत्रीया, मम, पुत्री। |

**2. सौम्या दिल्ली नगरे वसति। तस्याः सखी सुमतिः असमप्रदेशे वसति। सौम्यया गणतन्त्रदिवसस्य शोभायात्रायां भागः गृहीतः। सा स्वानुभवान् स्वमित्रं सुमतिं प्रति पत्रे लिखति। मञ्जूषातः पदानि विचित्य पत्रं पूरयन्तु।**

ए–14, वसन्तविहारः

नवदिल्लीतः

तिथिः ..............................

प्रियसखि सुमते,

(i) ........................

अत्र कुशलं तत्रास्तु। अहं (ii) ........................ सज्जायां व्यस्ता आसम्। अतः विलम्बेन तव पत्रस्य उत्तरं लिखामि। अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः (iii) ........................। अस्माकं विद्यालयस्य (iv) ........................ राजपथे स्वकलायाः प्रदर्शनम् अकरोत्। अहं गरबानृत्यस्य (v) ........................ आसम्। छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः (vi) ........................गुञ्जितम् अकरोत्। स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि, विचित्रवर्णानि परिदृश्यानि (vii) .............................. च दृष्ट्वा अहं गौरवान्विता अस्मि। (viii) ........................ बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः। (ix) ............................ वन्दनीयौ।

भवत्याः (x) ........................

सौम्या

आवरणम्

सविधे

सुश्री सुमतिः

98, भवतारमार्गः

असमप्रदेशः–533277

**मञ्जूषा**

पितरौ, गृहीतः, नमस्ते, मम, सखी, राजपथम्, वाद्यवृन्दम्, लोकनृत्यानि, गणतन्त्रदिवससमारोहस्य, प्रमुख–सञ्चालिका।

3. **सुजाता दिल्लीमहानगरे वसति। तस्याः सखी दिव्यामहादेवन् चेन्नईनगरे निवति। सुजातायाः विद्यालये पर्यावरणविषये एका गोष्ठी जाता। गोष्ठीं वर्णयन्ती सुजाता दिव्यायै पत्रम् एकं लिखति। मञ्जूषातः समुचितपदानि चित्वा पत्रं पूरयन्तु।**

20, वसन्तविहारः,

नवदिल्लीतः।

तिथिः 20-5-2025

(i) ........................ दिव्ये!

सस्नेहं नमस्ते।

ह्यः अस्माकं विद्यालये (ii) ........................ एका महत्त्वपूर्णा गोष्ठी अभवत्। तत्र महानगरेषु वर्धमानं प्रदूषणं दृष्ट्वा पर्यावरणस्य (ii) ........................ उपायानां विषये चर्चा अभवत्। गोष्ठ्यां वक्तॄणां विचारसारः आसीत् यत् गृहात् बहिः, (iv) ........................ रथ्यासु च अवकरः न क्षेपणीयः। (v) ........................ समये समये जलशुद्धिः करणीया। मार्गेषु, उद्यानेषु विद्यालयेषु च अधिकाधिकं (vi) ........................ आरोपणीयाः। जनजागरणार्थं "वृक्षो रक्षति रक्षितः", "जलम् एव जीवनम्" एतादृशानि महावाक्यानि पट्टिकासु लिखित्वा यत्र तत्र (vii) ................। ध्वनिप्रदूषणं निवारयितुं ध्वनिप्रसारकयन्त्राणां (viii) ........................ प्रयोगः करणीयः। अस्मिन् विषये भवत्याः विद्यालये किं किं भवति इति मां विस्तरेण लिखतु।

पितरौ वन्दनीयौ।

भवत्याः सखी,

(ix) ................................।

आवरणम्

| |
|---|
| सविधे |
| सुश्री (x) ................................ |
| 52, मरयापट्टी |
| चेन्नई-641008 |

**मञ्जूषा**

| |
|---|
| सुजाता, नदीजलेषु, स्नेहस्निग्धे, पर्यावरणविषये, न्यूनतमः, वृक्षाः, रक्षणाय, दिव्यामहादेवन्, टङ्कनीयानि, जलप्रदूषण-निवारणाय। |

4. **विकासः नैनीतालस्थे एकस्मिन् विद्यालये पठति। सः छात्रावासात् अमेरिका-वास्तव्यं मित्रं जोसेफं नैनीतालविषये पत्रम् एकं लिखति। मञ्जूषातः पदानि विचित्य पत्रे रिक्तस्थानानि पूरयन्तु।**

छात्रावासः

(i) ........................

तिथिः ........................

प्रिय (ii) ........................ जोसेफ!

(iii) ........................ ।

गतमासे आवयोः दूरभाषेण वार्तालापः अभवत्। (iv) ........................ एव अत्र हिमपातः आरभत। तं द्रष्टुम् अनेके यात्रिणः दूरतः आगताः आसन्। नैनीसरः अत्र एकं विशेषम् आकर्षणस्थलम् अस्ति, तस्य अपि जलं (v) ........................ आसीत्। तदा तत्र नौकाविहारः तु सम्भवः नासीत् किन्तु (vi) ........................ आनन्दिताः आसन्। भयङ्करे शीतेऽपि यात्रिणः 'चाइना-पीक' इति स्थानं द्रष्टुं गताः आसन्। अत्रत्यानि प्राकृतिकदृश्यानि आकर्षकाणि मनोरमाणि च सन्ति।

यात्रिणां समूहं (vii) ........................ स्थानीयाः आपणिकाः प्रमुदिताः आसन्। यात्रिनिवासालयेषु आवासः दुर्लभः अभवत्। निवासाय (viii) ........................ भाटकं प्रवृद्धम् आसीत्। अहम् इच्छामि यत् ईदृशे अवसरे भवान् अपि भारतम् आगच्छेत् पर्वतीयस्थलस्य च आनन्दम् (ix) ........................ ।

अग्रिमे दिसम्बरमासे जनवरीमासे वा भवान् अत्र आगमिष्यति इति मे हार्दिकी कामना।

सधन्यवादम्।

(x) ........................ मित्रम्

आवरणम्

| |
|---|
| सविधे |
| श्री जोसेफ, |
| 2200, पाइनहर्स्टसर्कलः, |
| जिरारड, ओहायो-44420 अमेरिका। |

**मञ्जूषा**

| |
|---|
| भवताम्, दृष्ट्वा, नैनीतालम्, अनुभवेत्, मित्र, प्रकोष्ठानाम्, हिमीभूतम्, नमो नमः, दिनद्वयानन्तरम्, स्केटिंगप्रेमिणः। |

**5. भवतः नाम अधोक्षजः। भवतः परीक्षा समाप्ता अधुना भवान् किञ्चित् विशिष्टं कर्तुम् इच्छति अतः पितुः अनुमतिं प्राप्तुम् अधोलिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु–**

रणवीरच्छात्रावासः,

वाराणसीतः

दिनाङ्कः ..........................

पूज्याः पितृचरणाः!

साष्टाङ्गं प्रणमामि।

अहमत्र (i) .............................. कुशली सन् भवतां कुशलतां भगवन्तं विश्वनाथं प्रार्थये। साम्प्रतम् अहं (ii) .......................... वाञ्छामि यत् मम वार्षिकी परीक्षा मार्चमासस्य (iii) .......................... दिनाङ्के सम्पन्ना भविष्यति। अग्रिमायै कक्षायै पुनर्नामाङ्कनं जूनमासे भविष्यति। (iv) .......................... पश्चात् मम समीपे मासत्रयस्य समयः अस्ति। तस्य मासत्रयस्य समयस्य (v) .......................... वेदाध्ययनं कर्तुं वाञ्छामि। अतः भवताम् अनुमत्या सह अम्बायाः अपि (vi) .......................... वाञ्छामि। यतोहि आधुनिकविषयाणां (vii) .......................... सह भारतीयज्ञानस्य अपि अनिवार्यताम् अनुभवामि तच्च (viii) .......................... विना न सम्भवति। विशेषाधिकम् गृहागमन-पश्चात् (ix) .......................... । पौनः पुन्येन सर्वेभ्यः ज्येष्ठेभ्यः सादरं प्रणामाञ्जलिं समर्पयन् भवताम् उत्तरस्य (x) .......................... अस्मि।

भवतां पुत्रः

अधोक्षजः

**मञ्जूषा**

| |
|---|
| प्रतीक्षायाम्, ज्ञानेन, अनुमतिम्, परीक्षायाः, सूचयितुम्, छात्रावासे, अष्टादशे, सदुपयोगाय, वेदाध्ययनम्, चर्चयिष्यामः। |

**6. भवान् ब्रह्मा एकादश्याः कक्षायाः छात्रः अस्ति। भवान् विज्ञानविषयेण सह संस्कृतविषयं पठितुम् इच्छति। तदर्थं प्रधानाचार्याय लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु–**

दिनाङ्कः ..........................

सेवायाम्

(i) ..........................

विष्णुदत्त-वरिष्ठमाध्यमिक-विद्यालयः,

इन्द्रप्रस्थः।

विषयः – संस्कृतविषयस्य (ii) .......................... सन्दर्भे प्रार्थनापत्रम्।

महोदय!

अहं भवतः (iii) .......................... एकादश्याः कक्षायाः विज्ञानसमूहस्य (iv) .......................... अस्मि। अहं विज्ञानविषयेण सह (v) .......................... अपि पठितुम् इच्छामि यतोहि संस्कृते बहवः (vi) .......................... अंशाः सन्ति। तान् अंशान् ज्ञातुं संस्कृतस्य (vii) .......................... आवश्यकम् अस्ति। संस्कृतस्य मूलज्ञानं विना तस्य (viii) .......................... अवगमनं क्लेशकरम् अस्ति इति भावयामि।

अतः सविनयं (ix) .......................... यत् मह्यं संस्कृतविषयं प्रदाय माम् अनुगृह्णातु भवान्।

सधन्यवादम्

भवदीयः छात्रः,

(x) ........................

कक्षा – एकादशी 'अ'

अनुक्रमाङ्कः – 16

**मञ्जूषा**

| |
|---|
| संस्कृतविषयम्, वैज्ञानिकाः, ज्ञानम्, विद्यालये, छात्रः, तत्त्वस्य, निवेदयामि, प्रधानाचार्यमहोदयः, ब्रह्मा, चयनस्य। |

**7. भवान् सङ्गमविहारक्षेत्रस्य निवासी अस्ति। भवान् स्वनगरस्य स्वच्छतां कारयितुम् इच्छति। तदर्थं नगर-निगमाधिकारि-महोदयाय लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु –**

सेवायाम्,

नगरनिगमधिकारि-महोदयः,

(i) ........................, दिल्ली।

विषयः – वीथिकासु स्वच्छतायाः सन्दर्भे (ii) ........................

मान्यवर!

अहं सङ्गमविहारक्षेत्रस्य (iii) .................... अस्मि। अतः सूचयितुं वाञ्छामि यत् अद्यत्वे (iv) .................... सर्वत्र अवकराणां राशिः अधिकः दृश्यते। तानि अवकराणि निगलितानि भूत्वा (v) ........................ जायमानानि सन्ति। अनेन सङ्क्रमणस्य (vi) ........................ अत्यधिका अस्ति। केचन जनाः अत्र (vii) ........................ अपि जाताः सन्ति। परम् अवकरम् अपसारयितुं कापि व्यवस्था न दृश्यते। (viii) ........................ अपि बहुभ्यः दिनेभ्यः न आगतम् अस्ति।

अतः प्रार्थयामि यत् अस्माकं वीथिकानां (ix) .............................. समुचितां व्यवस्थां कारयित्वा सर्वान् नगरवासिनः (x) ........................ रक्षतु इति।

सधन्यवादम्

भवदीयः

नगरवासी

**मञ्जूषा**

| |
|---|
| आशङ्का, रुग्णाः, अवकरवाहनम्, स्वच्छतायै, रोगेभ्यः, सङ्गमविहारम्, आवेदनपत्रम्, निवासी, वीथिकासु, दुर्गन्ध-युक्तानि। |

## ( घ ) संवादलेखनम्

### 1. गृञ्जनलाभाः

**निम्नलिखितसंवादेषु मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयन्तु।**

**शाकविक्रेत्री** – स्वीकरोतु। स्वीकरोतु। स्वास्थ्यवर्धकानि रक्तवर्णानि कोमलानि गृञ्जनकानि। एतानि पित्तं शमयन्ति। रक्तं वर्धयन्ति च।

**सुरभिः** – अयि त्वम् ...................... असि?

**शाकविक्रेत्री** – मया तु गुणाः अपि वर्णनीयाः एव। यतोहि अहम् प्राकृतिकचिकित्साम् अपठम्।

**सुरभिः** – शोभनम्। गृञ्जनकानां ......................किम्?

**शाकविक्रेत्री** – मूल्यम्? एकवारम् एव वदामि। पञ्चाशत्रूप्यकैः किलोमितानि।

**सुरभिः** – अधिकं ननु, ...................... करोतु।

**शाकविक्रेत्री** – त्रिंशत् रूप्यकाणि? नैव? त्वं तु विना मूल्येन एव वाञ्छसि किल।

**सुरभिः** – अस्तु। क्रोधं मास्तु, चत्वारिंशत् करोतु, ...................... स्वीकरोमि।

**शाकविक्रेत्री** – पञ्चकिलोमितानि ददामि। गृञ्जनपाकार्थं वाञ्छ्यते किम्?

**सुरभिः** – आम्! बालेभ्यः ...................... बहु रोचते ननु।

**शाकविक्रेत्री** – धन्यवादः। पुनरपि आगच्छतु भवती।

**मञ्जूषा**

| |
|---|
| त्रिंशत्, वैद्या, मूल्यम्, पञ्चकिलोमितानि, गृञ्जनपाकः। |

### 2. अलं विवादेन

**बस-संवाहकः** – भोः! कुत्र गन्तव्यम्? यात्रापत्रं स्वीकरोतु।

**सोमेशः** – द्वे ...................... केन्द्रीयसचिवालयं यावत् ददातु। एतानि पञ्चाशत् ...................... स्वीकरोतु।

**बस-संवाहकः** – एते यात्रापत्रे। परिवर्तं देहि। विंशतिः रूप्यकाणि न सन्ति?

**सोमेशः** – मम समीपे ...................... न अस्ति।

**बस-संवाहकः** – यात्रापत्रम् आनय। तस्य पृष्ठे अवशिष्टं राशिं लिखामि।

**सोमेशः** – अवशिष्टानि रूप्यकाणि कुतः ...................... ?

**बस-संवाहकः** – राजीवचतुष्पथे स्थितात् कार्यालयात् एव प्राप्स्यन्ते।

**सोमेशः** – विचित्रा व्यवस्था। ...................... रूप्यकाणि प्राप्तुं पुनः दशरूप्यकाणां व्ययः समयहानिः च।

**बस-संवाहकः** – अहं किं करवाणि? मम समीपे त्रिंशत् रूप्यकाणि न सन्ति?

**धनेशः** – सोमेश, अलं विवादेन। एतानि विंशतिरूप्यकाणि दीयन्ताम्।

**बस-संवाहकः** – धन्यवादाः। जनतायाः सहयोगः इत्थम् एव सर्वत्र अपेक्षितः।

**मञ्जूषा**

| |
|---|
| त्रिंशत्, रूप्यकाणि, यात्रापत्रे, प्राप्स्यन्ते, परिवर्तः। |

## 3. यातायातनियमानां पालनम्

(नगेन्द्रः द्विचक्रिकया गच्छति।)

**आरक्षकः** – विरम विरम! किं न पश्यसि रक्तविद्युत्सङ्केतम्?

**नगेन्द्रः** – ........................................................................................।

**आरक्षकः** – विद्यालयं प्रति गन्तव्यम् इति तु समुचितं कारणं नास्ति।

**नगेन्द्रः** – ........................................................................................।

**आरक्षकः** – परीक्षा अस्ति तर्हि गृहात् दशनिमेषपूर्वम् एव प्रस्थानं करणीयम्।

**नगेन्द्रः** – ......................।

**आरक्षकः** – कथं क्षमे? शीघ्रं शतं रूप्यकाणि प्रयच्छ।

**नगेन्द्रः** – ........................................................................................।

**आरक्षकः** – बाढम्! गच्छ अधुना। भविष्ये कदापि यातायातनियमानाम् उल्लङ्घनं न करणीयम्। भवतां सुरक्षार्थम् एव एते नियमाः सन्ति।

**नगेन्द्रः** – ........................................................................................।

**मञ्जूषा**

- किं करोमि? अद्य परीक्षा अस्ति।
- (विलपन्) कृपया क्षम्यताम्। अद्य तु मम समीपे धनं नास्ति।
- क्षम्यताम्। विद्यालयं प्रति गन्तव्यम्। विलम्बः जातः अस्ति।
- उपकृतः अस्मि। भविष्ये कदापि इत्थं न आचरिष्यामि।
- अद्य तावत् क्षम्यताम्।

## 4. आरोग्यं परमं सुखम्

**वैद्यः** – आगच्छ पुत्रि। किं जातम्? ज्वरः अस्ति किम्?

**सुनृता** – ........................................................................................।

**वैद्यः** – एवम्। ज्वरः न अस्ति। उदरे पीडा वर्तते ह्यः किं भक्षितम्?

**सुनृता** – ........................................................................................।

वैद्य: – अहो! आपणे आलुकस्य पिष्टिका: खादिता:। किं न जानासि, वर्षर्तौ आपणे खाद्यवस्तूनि न खादितव्यानि। एतत् चूर्णं स्वीकरोतु।

सुनृता – ........................................................................................................।

वैद्य: – अरे नहि। कटु न अस्ति। पुनरपि औषधिकृते स्वाद: न गणनीय:।

सुनृता – ...................... ?

वैद्य: – दिने त्रिवारम् एकचमसमात्रम् उष्णजलेन ग्रहीतव्यम्।

सुनृता – ......................

वैद्य: – पुन: आगमनस्य आवश्यकता एव न भविष्यति। स्वास्थ्यं प्रति भविष्ये सावधाना भव। आरोग्यं परमं सुखम्।

सुनृता – धन्यवादा:। प्रणमामि।

**मञ्जूषा**

- महोदय! ज्वर: नास्ति, उदरे पीडा अस्ति।
- औषधं दिवसे कतिवारं स्वीकरणीयम्?
- अस्तु, पुन: कदा आगन्तव्यम्?
- अहो चूर्णम्! चूर्णं कटु तु न अस्ति?
- अधिकं किमपि न भक्षितम् आपणे केवलम् आलुकस्य पिष्टिका: खादिता:।

## 5. परोपकाराय सतां विभूतय:

सुधाकर: – नमस्ते। आगच्छतु भवान्। उपविशतु।

अतिथि: – उपविशामि तावत्। भवत: पितृमहोदया: गृहे न सन्ति किम्?

सुधाकर: – स तु इदानीम् एव चिकित्सालयम् अगच्छत्।

अतिथि: – किमर्थं ...................... अगच्छत्?

सुधाकर: – नास्ति विशेषं कारणम्। स प्रतिदिनं रुग्णेभ्य: दुग्धं ...................... तत्र गच्छति।

अतिथि: – एवम् ...................... दातुम्! किं प्रतिदिनम् एव?

सुधाकर: – आम्! यदा कदा फलानि अपि नयति।

अतिथि: – महान् ...................... अस्ति।

सुधाकर: – किम् अत्र परोपकार:। एतत् तु अस्माकं कर्तव्यम् एव।

अतिथि: – धन्योऽहं यत् एतेषाम् अद्य ...................... भविष्यति।

सुधाकर: – नहि, नहि। अद्य दर्शनं न भविष्यति यत: स: तत: एव कार्यालयं प्रति गमिष्यति।

**अतिथिः** – ........................ कदा गच्छति ?

**सुधाकरः** – प्रतिदिनम् अष्टवादने एव।

**अतिथिः** – श्वः अष्टवादने एव आगमिष्यामि। कृपया निवेदय 'तस्य बालमित्रं सुरेन्द्रः आगतः आसीत्'।

**सुधाकरः** – अवश्यमेव कथयिष्यामि। नमस्ते।

**मञ्जूषा**

| |
|---|
| दातुम्, परोपकारः, कार्यालयम्, दुग्धम्, चिकित्सालयम्, दर्शनम्। |

## 6. सदुपयोगः

**ऋतिका** – तव वस्त्राणि तु अतीव शोभन्ते।

**मञ्जुला** – ..............................................................................................

**ऋतिका** – तव पार्श्वे कति परिधानानि सन्ति ?

**मञ्जुला** – बहूनि नूतनपरिधानानि वर्तन्ते मम समीपे तथापि अहं विशेषावसरेषु नवीनपरिधानानां क्रयं करोमि।

**ऋतिका** – ..............................................................................................

**मञ्जुला** – अत्र-तत्र यदा-कदा अवसरेषु धारयिष्यामि। तव समीपे कति परिधानानि ?

**ऋतिका** – ..............................................................................................

**मञ्जुला** – पुस्तकैः किं करिष्यसि ?

**ऋतिका** – पुस्तकानि एव अस्माकं मित्राणि सन्ति। अद्यत्वे दिल्लीनगरे पुस्तकमेलापकं वर्तते। तत्र गत्वा पुस्तकानि एव क्रेष्यामि।

**मञ्जुला** – ..............................................................................................

**ऋतिका** – परिधानेभ्यः किं भवति ? परिधानानि तु जीवनाय एव सन्ति न तु जीवनं परिधानेभ्यः अस्ति। पुस्तकानि तु आजीवनम् उपकुर्वन्ति।

**मञ्जुला** – ..............................................................................................

**मञ्जूषा**

- किं पुस्तकैः परिधानस्य स्थानं नीयते ?
- किं करिष्यसि एभिः परिधानैः ?
- साधु। एतत् तु मया न चिन्तितम्। अद्य आरभ्य अहम् अपि धनस्य सदुपयोगं पुस्तकेभ्यः एव करिष्यामि न तु परिधानेभ्यः।
- मम समीपे केवलं पञ्च परिधानानि सन्ति। अहं तैः सन्तुष्टा अस्मि। अहं तु पुस्तकप्रिया अस्मि।
- अये ! अद्य तु मम जन्मदिवसः, एतत् परिधानं तु मम माता मह्यं क्रीतवती।

## 7. उद्यमः

(सर्वेशः सोमेशः च विद्यालयस्य अल्पाहारगृहे उपविष्टौ। एकादशवर्षीयः मनोजः आगत्य चायपात्राणि स्थापयति।)

**सर्वेशः** – भो! कतिदिनेभ्यः अत्र कार्यं करोषि? पूर्वं तु न दृष्टः?

**मनोजः** – ........................................................................................................................

**सोमेशः** – एवम्। सप्ताहः जातः! कुतः आगतः?

**मनोजः** – ........................................................................................................................

**सोमेशः** – अध्ययनं त्यक्त्वा किमर्थं पाटलिपुत्रतः अत्र आगतः?

**मनोजः** – किं करोमि! मन्दभाग्यस्य मम पिता दुष्टैः पूर्वं हतः।
........................................................................, अनाथः अहं कथं निर्वाहं कुर्याम्?

**सर्वेशः** – अहो! महद्दुःखम्, परं पठनं न वाञ्छसि किम्?

**मनोजः** – ........................................................................................................................

**सोमेशः** – एवं हतोत्साही मा भव। विद्यालये रात्रौ कक्षा भवति। किमपि पठितं न वा?

**मनोजः** – केवलं द्वितीयकक्षा उत्तीर्णा।

**सर्वेशः** – सायं षड्वादने आगच्छतु। यदि मनोयोगेन पठिष्यसि तर्हि छात्रवृत्तिमपि प्राप्स्यसि।

**मनोजः** – ........................................................................................................................

**सोमेशः** – सर्वं तव अधीनम् एव। उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः।

### मञ्जूषा

- बहु उपकृतम्। ईश्वरः भवते सर्वां सिद्धिं प्रदास्यति।
- अवश्यम् इच्छामि। परं शिक्षा नास्ति मे भाग्ये।
- श्रीमन्! पाटलिपुत्रतः आगतोऽस्मि।
- श्रीमन्! सप्ताहः एव जातः।
- इदानीं मम माता अपि दिवङ्गता।

# ( ङ) कथापूर्तिः

♦ **अधोलिखिताः कथाः मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत-**

**1.**

पुरा लङ्कायाः नृपः (i) ........................ छलेन सीताम् अहरत्। श्रीरामः (ii) ........................ च ताम् अन्वेष्टुं वने इतस्ततः अभ्रमताम्। वने श्रीरामस्य (iii) ........................ वानरराजेन सुग्रीवेन सह (iv) ........................ । मित्रधर्मं निर्वहन् श्रीरामः (v) ........................ सहायताम् अकरोत् तस्य दुराचारिणं भ्रातरं बालिं च हत्वा किष्किन्धायाः सिंहासनम् अधिष्ठापयत्। सुग्रीवः अपि सीताम् अन्वेष्टुं (vi) ........................ प्रेषितवान्। तेषु परमबुद्धिमान् वीरः च (vii) ........................ अपि आसीत्। सः लङ्कां (viii) ........................ सीताम् अन्विष्टवान्। अन्ते श्रीरामस्य (ix) ........................ सह युद्धम् अभवत्। युद्धे श्रीरामः सर्वान् (x) ........................ लङ्कापतिं रावणं च मारयित्वा सीतां प्राप्तवान्।

**मञ्जूषा**

| |
|---|
| गत्वा, रावणः, राक्षसान्, मित्रता, रावणेन, वानरयूथम्, सुग्रीवस्य, हनुमान्, लक्ष्मणः, अभवत्। |

**2.**

कस्मिंश्चिद् वने एकः वृक्षः आसीत् । तत्र एकः चटकः स्वपरिवारेण सह वसति स्म। वर्षाकाले एकदा तत्र महती (i) ........................ भवति। एकः वानरः आश्रयार्थं (ii) ........................ अधः आगच्छति। वानरं दृष्ट्वा चटकः वदति – "भोः वानर! भवान् तु समर्थः अस्ति। भवतः (iii) ........................ मनुष्य-शरीरम् (iv) ........................ अस्ति। हस्तौ पादौ च सम्यक् सन्ति। भवान् उत्तमगृहस्य (v) ........................ कर्तुं शक्नोति। किमर्थं न स्वस्य कृते गृहस्य निर्माणं करोति?" तत् श्रुत्वा (vi) ........................ कुपितः भवति। वानरः (vii) ........................ वदति – "अधुना त्वं मौनम् एव तिष्ठ। तव (viii) ........................ आवश्यकता नास्ति।" चटकः तं पुनः कथयति – "भ्रातः! अहं तु तव हिताय एव चिन्तयामि।" तस्य (ix) ........................ श्रुत्वा सः वानरः वृक्षम् आरुह्य (x) ........................ नीडं नाशयति। अत एवोच्यते – उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये इति।

**मञ्जूषा**

| |
|---|
| निर्माणम्, इव, चटकस्य, वचनम्, वानरः, वृष्टिः, वृक्षस्य, चटकम्, शरीरम्, उपदेशस्य। |

**3.**

शीतलेन जलेन परिपूर्णः एकः घटः आसीत्। घटम् आच्छादयितुं (i) ........................ उपरि एकः शरावः (आच्छादन-पात्रम्) आसीत्। एकदा (ii) ........................ घटम् अपृच्छत् – मित्र! यत् किमपि (iii) ........................ भवतः समीपम्

आगच्छति, भवान् तत् शीतलेन (iv) ........................ पूरयति । तत् च पात्रं जलं (v) ........................ दूरं गच्छति। यद्यपि अहं सर्वदा (vi) ........................ सह एव तिष्ठामि, परं भवान् मह्यम् एकं (vii) ........................ अपि जलं किमर्थं न ददाति ? तदा घटः शरावम् अकथयत् – ''अन्यानि पात्राणि मम (viii) ........................ आगच्छन्ति तानि विनम्रतया शिरः नत्वा जलं याचन्ते, परं भवान् तु सर्वदा मम (ix) ........................ तिष्ठति। तर्हि अहं कथं भवते जलं दातुं शक्नोमि ? शिरः नत्वा आगच्छतु (x) ........................ अपि जलेन पूरयिष्यामि'' इति। उक्तम् अपि – ''विनयात् याति पात्रताम्।''

**मञ्जूषा**

| पात्रम्, भवन्तम्, भवता, घटस्य, शरावः, शिरसि, समीपम्, जलेन, बिन्दुमितम्, स्वीकृत्य । |
|---|

## 4.

एकदा केचन शिष्याः (i) ........................ कुर्तन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् (ii) ........................ आगच्छत्। गजस्य उपरि उपविष्टः (iii) ........................ उच्चस्वरेण पुनः पुनः घोषयति स्म – अपसरन्तु, अपसरन्तु इति। सर्वे (iv) ........................ धावितवन्तः। यथा सर्वेषु वस्तुषु (v) ........................ अस्ति तथा गजे अपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावति काले गजः तं (vi) ........................ गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्च्छितं तं गुरुकुलम् अनयन्। (vii) ........................ तं गुरुः अपृच्छत् – ''वत्स! त्वम् एवं किमर्थम् आचरः इति।'' शिष्यः अवदत् – ''गुरुवर्य! भवद्भिः एव (viii) ........................ यत् ईश्वरः सर्वेषु अस्ति, अतः अहम् गजे अपि ईश्वरं मत्वा तत्र (ix) ........................ इति।'' गुरुः उक्तवान् – ''वत्स! यथा गजे तथा हस्तिपके अपि ईश्वरः इति (x) ........................ न चिन्तितम् इति।''

**मञ्जूषा**

| हस्तिपकः, लब्धसंज्ञम्, कथम्, शिक्षितम्, भिक्षाटनम्, अतिष्ठम्, शिष्याः, ईश्वरः, स्वशुण्डेन, मार्गे। |
|---|

## 5.

एकदा (i) ........................ भगवान् सूर्यः (ii) ........................ प्रति गन्तुम् (iii) ........................ आसीत्। परं लोकव्यवहारविषये (iv) ........................ सः व्याकुलः अभवत्। सूर्यः अचिन्तयत् – ''मयि अस्तगते (v) ........................ संसारः अन्धकारे (vi) ........................ भविष्यति। लोकानां (vii) ........................ कथं चलिष्यति ? मां विना सर्वे जीवाः (viii) ........................ अनुभविष्यति सूर्यस्य चिन्तायाः भावं विज्ञाय एकः (ix) ........................ उपस्थितः भूत्वा सविनयं निवेदितवान् – ''भगवन्! अलं चिन्तया। यद्यपि मम प्रकाशः न्यूनः अस्ति तथापि जनानां (x) ........................ अहं यथाशक्ति स्वजीवनं समर्पयिष्यामि, कार्याणि च साधयिष्यामि।''

**मञ्जूषा**

| विचिन्त्य, व्यवहारः, दुःखम्, सेवायाम्, सायङ्काले, लघुदीपः, उद्यतः, सम्पूर्णः, अस्ताचलम्, निमग्नः। |
|---|

## 6.

एकदा महात्मा गान्धिः पत्राणि (i) ........................ । सहसा मसीपात्रे (i) ........................ समाप्ता अभवत्। तत्रैव लेखनीं परित्यज्य सः कार्यविशात् बहिः (iii) ........................ । पुनः यदा आगतः, लेखितुम् इतस्ततः (iv) ........................ परन्तु लेखनी कुत्रापि न आसीत्। सः कर्मचारिणं (v) ........................ । कर्मचारी अवदत् – ''सा तु मया बहिः (vi) ........................ । भवान् नूतनां लेखनीं स्वीकरोतु इति।'' महात्मागाधिः प्रत्यवदत् – ''तस्याम् एव मसीं पूरय। देशस्य धनम् अमूल्यम् (vii) ........................ । क्षुद्रातिक्षुद्रम् अपि वस्तु न क्षेपणीयम्।' एवम् उक्त्वा सः स्वयं बहिः गत्वा लेखनीम् अन्विष्य (viii) ........................ । तस्यां मसीम् (ix) ........................ तया एव लेखनकार्यं (x) ........................ ।

**मञ्जूषा**

| |
|---|
| आनीतवान्, प्रारब्धवान्, लिखति स्म, अस्ति, अपूरयत्, क्षिप्ता, पृष्टवान्, दृष्टवान्, गतवान्, मसी। |

## 7.

एकः बालकः (i) ........................ । तस्य नाम आलः आसीत्। एकदा सः (ii) ........................ अपृच्छत् – 'मातः! मूर्खः कः भवति? माता (iii) ........................ 'यः बुद्धिहीनः स एव मूर्खः भवति।' एतच्छ्रुत्वा सः बालकः (iv) ........................ अभवत् अकथयत् च – 'तदा अहं (v) ........................ अस्मि, यतोहि विद्यालये सर्वे मां मूर्खः। इति कथयन्ति। अधुना अहं विद्यालयं न गमिष्यामि। माता तम् अवबोधयत् – ''पुत्र! निराशः मा भव। त्वं मूर्खः नासि। अहं त्वां बुद्धिमन्तं (vi) ........................ ।''

माता बालकं प्रतिदिनम् अपाठयत्। सः बालकः अपि (vii) ........................ अपठत् मातुः सेवां च अकरोत्। एकस्मिन् दिवसे सः महान् (viii) ........................ अभवत्। ''तस्य नाम थामस अल्वा एडीसन'' आसीत्। विद्युद्-दीपकः, ग्रामोफोन-यन्त्रम्, चलचित्रयन्त्रम् आदीनि (ix) ........................ अस्य एव महावैज्ञानिकस्य आविष्काराः सन्ति। एषः महान् वैज्ञानिकः अकथयत् – ''मम माता एव मम मार्गदर्शिका (x) ........................ च अस्ति।''

**मञ्जूषा**

| |
|---|
| बुद्धिहीनः, खिन्नः, शिक्षिका, वैज्ञानिकः, आसीत्, परिश्रमेण, मातरम्, वस्तूनि, अवदत्, करिष्यामि । |

# दशमः अभ्यासः

# अपठितावबोधनम्

1. प्रकृतिः मनुष्यस्य उपकारिणी। मनुष्यैः सह तस्याः शाश्वतः सम्बन्धः। सा विविधरूपेषु अस्मिन् जगति आत्मानं प्रकटयति। पशवः पक्षिणः वनस्पतयः च तस्याः एव अङ्गानि। निराशाः असहायाः जनाः तस्याः एव आश्रयं प्राप्नुवन्ति। सा स्वमनोहरेण सौन्दर्येण नीरसं हृदयम् अपि सरसं करोति। सूर्यः चन्द्रः च तस्याः नेत्रे। शस्य-श्यामला एषा भूमिः। विविधाः ओषधयः सकलानि खनिजानि च प्रकृतेः एव शोभा। सा तु नित्यम् एव एतैः साधनैः सर्वेषाम् उपकारं करोति, परम् अधन्यः अयं जनः कृतज्ञतां विहाय असाधुसेवितं पथं गच्छति, विविधानि कष्टानि च अनुभवति। नरः शाश्वतं सुखं वाञ्छति चेत् तर्हि प्रकृतेः प्रतिकूलं कदापि न आचरेत् इति।

**अ. एकपदेन उत्तरत –**

(क) कैः सह प्रकृते शाश्वतः सम्बन्धः अस्ति?

(ख) मानवः किं विहाय असाधुसेवितं पथं गच्छति?

(ग) निराशाः असहायाः जनाः कस्याः आश्रयं प्राप्नुवन्ति?

(घ) एषा भूमिः कीदृशी अस्ति?

**आ. पूर्णवाक्येन उत्तरत –**

(क) का प्रकृतेः एव शोभा अस्ति?

(ख) शाश्वतं सुखम् इच्छन् नरः किं न आचरेत्?

(ग) प्रकृतिः स्वमनोहरेण सौन्दर्येण किं करोति?

(घ) प्रकृतेः अङ्गानि कानि सन्ति?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं समुचितमुत्तरं विकलपेभ्य चिनुत –**

(क) आचरेत् इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

(i) जनः (ii) नरः (iii) प्रकृतिः (iv) प्रतिकूलम्

(ख) 'विविधाः' इति पदं कस्य पदस्य विशेषणम्?

(i) ओषधयः (ii) वनस्पतयः (iii) जनाः (iv) कष्टानि

(ग) 'सरसम्' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(i) हृदयम् (ii) आश्रयम् (iii) शाश्वतम् (iv) नीरसम्

(घ) 'सततम्' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(i) सर्वेषाम् (ii) उपकारम् (iii) नित्यम् (iv) परम्

**2.** अहं पाटलपुष्पम् अस्मि। वृन्ते वसामि। पवनः मां मन्दं मन्दम् आन्दोलयति। दिने रविकिरणाः मां विकासयन्ति, रात्रौ ज्योत्सना मां लालयति। मम अनेके वर्णाः-श्वेतः, पीतः नारङ्गः, अरुणः पाटलश्च। एतेषु रक्तिमः वर्णः जनेभ्यः सर्वाधिकं रोचते। यत्र सौन्दर्यं कमनीयतां च कवयः वर्णयितुम् इच्छन्ति, मम उपयोगं कुर्वन्ति। अहं विवाहादिसमारोहेषु मण्डपानां शोभाम् आतनोमि। वर-वध्वोः जयमालयोः अहं विलसामि। अहं मृदुना सुगन्धेन वातावरणं सुरभितं करोमि। मम स्वल्पकालजीवनमपि लोकहितम् आतनोति अतः पूर्णं विकसितं मे रूपम् अभिनन्दन्ति जनाः। विकसितरूपे स्थितम् अहं मानवस्य निराशामयं जीवनम् अपि आशामयं करोमि। स्वगन्धं विकीर्य अन्ते प्रकृतिमातुः अङ्के स्वपिमि।

**अ. एकपदेन उत्तरत -**

(क) पाटलपुष्पं स्वगन्धं विकीर्य अन्ते कस्याः अङ्के स्वपिति?

(ख) पाटलपुष्पं के विकासयन्ति?

(ग) पाटलपुष्पस्य मृदुना सुगन्धेन वातावरणं कीदृशं भवति?

(घ) पाटलपुष्पं कुत्र वसति?

**आ. पूर्णवाक्येन उत्तरत -**

(क) विकसितरूपे स्थितं पाटलपुष्पं किं करोति?

(ख) पाटलपुष्पस्य के के वर्णाः भवन्ति?

(ग) कवयः कदा पाटलपुष्पस्य उपयोगं कुर्वन्ति?

(घ) पाटलपुष्पस्य स्वल्पकालजीवनम् अपि किं करोति?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं समुचितमुत्तरं विकलपेभ्य चिनुत -**

(क) 'पवनः' इति कर्तृपदस्य क्रियापदं गद्यांशे किं प्रयुक्तम्?

(i) लालयति (ii) आन्दोलयति (iii) आतनोति (iv) रोचते

(ख) 'रक्तिमः वर्णः जनेभ्यः सर्वाधिकं रोचते।' वाक्येऽस्मिन् विशेषणपदं किं प्रयुक्तम्?

(i) वर्णः (ii) जनेभ्यः (iii) सर्वाधिकम् (iv) रक्तिमः

(ग) 'सुवासितम्' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(i) सुरभितम् (ii) विकसितम् (iii) स्थितम् (iv) आशामयम्

(घ) 'रात्रौ' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(i) दिने (ii) वृन्ते (iii) विकीर्य (iv) विकसितरूपे

**3.** दक्षिणभारते सागर-मध्ये एकं लघुद्वीपं वर्तते। तस्मिन् द्वीपे सागरतरङ्गैः क्षाल्यमानं प्राचीनं नगरं कन्याकुमारी इति अस्ति। एषा कन्याकुमारी त्रयाणां सागराणां सङ्गमस्थली। समुद्रजले प्रतिबिम्बितं सूर्योदयस्य दृश्यम् अद्भुतम् एव। सूर्यस्य क्रमशः अरुणा पीता धवला च शोभा दर्शकान् मन्त्रमुग्धान् करोति। सागरस्य लहरीभिः क्षिप्तानां चित्र-विचित्रवर्णानां शुक्तीनां वृष्टिः इव भवति। जलधितटे स्थितैः नारिकेल-कदली पादपैः परिवृता इव एषा नगरी। एकदा स्वामिविवेकानन्दः समुद्रजले स्थितायाम् एकस्यां बृहत्-शिलायाम् उपविष्टः त्रीणि दिनानि ध्यानमग्नः जातः। एतस्यां शिलायाम् एव अधुना विवेकानन्दकेन्द्रं विकसितम् अस्ति। अत्र आगत्य साधकाः ध्यानं साधनां च कृत्वा जीवनं सफलं कुर्वन्ति।

**अ. एकपदेन उत्तरत –**

(क) समुद्रजले स्थितायां शिलायां किं विकसितम् ?

(ख) कस्य दृश्यम् अद्भुतं प्रतिभाति ?

(ग) त्रयाणां सागराणां सङ्गमस्थलस्य किं नाम अस्ति ?

(घ) कन्याकुमारी इति नगरं कैः क्षाल्यमानम् अस्ति ?

**आ. पूर्णवाक्येन उत्तरत –**

(क) कन्याकुमारीम् आगत्य साधकाः किं कुर्वन्ति ?

(ख) का दर्शकान् मन्त्रमुग्धान् करोति ?

(ग) सागरस्य लहरीभिः किं भवति ?

(घ) स्वामिविवेकानन्दः समुद्रजले स्थितायां शिलायाम् किमकरोत् ?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं समुचितमुत्तरं विकलपेभ्य चिनुत –**

(क) 'दक्षिणभारते सागरमध्ये एकं लघुद्वीपं वर्तते।' वाक्येऽस्मिन् किं कर्तृपदं प्रयुक्तम् ?

(i) लघुद्वीपम् (ii) सागरमध्ये (iii) दक्षिणभारते (iv) एकम्

(ख) 'प्रतिबिम्बितम्' इति विशेषणपदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम् ?

(i) अद्भुतम् (ii) सूर्योदयस्य (iii) दृश्यम् (iv) समुद्रजले

(ग) 'कृष्णा' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(i) शोभा (ii) अरुणा (iii) पीता (iv) धवला

(घ) 'समुद्रतीरे' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(i) समुद्रजले (ii) जलधितटे (iii) सागरमध्ये (iv) सागरतरङ्गैः

4. अहम् एकः छिन्नः द्रुमः अस्मि। ह्यः वने एकः नरः आगच्छत्। सः काष्ठाय मम शरीरम् अच्छिनत्। छेदनेन मे शरीरे अनेके व्रणाः जाताः। छुरिकायाः प्रहारेण शरीरात् अश्रुरूपाः जलबिन्दवः अपतन्। अकथनीया मम पीडा। हृदयं विदीर्णं जातम्। अश्रुभिः कण्ठः अवरुद्धः। मम अन्तकालः समीपे एव तिष्ठति। काष्ठानि एकत्रीकृत्य सः तु अगच्छत्। परं कोऽस्ति अत्र व्यथाकथाश्रवणाय ? वृक्षान् छित्त्वा नरः प्रकृतिमातुः अङ्गानि नाशयति। इन्धनाय, कर्गदपत्राय, भवननिर्माणाय मम काष्ठस्य प्रयोगः भवति। किन्तु कुतः मे पत्राणि, पुष्पाणि कुतः च रोगनिवारणाय औषधयः ? निराश्रिताः भविष्यन्ति आश्रिताः खगाः कीटपतङ्गाश्च। पन्थानः अपि छायाहीनाः भविष्यन्ति। आतपेन तप्तः श्रान्तः पथिकः अधुना कुत्र गमिष्यति ? मम जीवने पुनः वसन्तर्तुः न आगमिष्यति।

**अ. एकपदेन उत्तरत –**

(क) के छायाहीनाः भविष्यन्ति ?

(ख) नरः किमर्थं वृक्षस्य शरीरम् अच्छिनत् ?

(ग) पथिकः केन तमः भवति ?

(घ) वृक्षस्य कण्ठः कैः अवरुद्धः अभवत्?

**आ. पूर्णवाक्येन उत्तरत –**

(क) वृक्षस्य काष्ठस्य प्रयोगः कुत्र कुत्र भवति?

(ख) के निराश्रिताः भविष्यन्ति?

(ग) छुरिकायाः प्रहारेण किम् अभवत्?

(घ) वृक्षान् छित्वा नरः किं करोति?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं समुचितमुत्तरं विकलपेभ्य चिनुत –**

(क) 'अपतन्' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

(i) अश्रुरूपाः (ii) प्रहारेण (iii) शरीरात् (iv) जलबिन्दवः

(ख) 'आतपेन तप्तः श्रान्तः पथिकः अधुना कुत्र गमिष्यति।' वाक्येऽस्मिन् विशेष्यपदं किम्?

(i) पथिकः (ii) तप्तः (iii) श्रान्तः (iv) अधुना

(ग) 'आश्रिताः' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(i) पतङ्गाः (ii) निराश्रिताः (iii) छायाहीनाः (iv) अश्रुरूपाः

(घ) 'वृक्षः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?

(i) छिन्नः (ii) काष्ठानि (iii) द्रुमः (iv) औषधयः

5. पुरा गुजरातप्रदेशे एकस्मिन् ग्रामे एकं गुरुकुलम् आसीत्। तत्र द्विशतं छात्राः गुरुभ्यः अनेकान् विषयान् पठन्ति स्म। तेषां भोजनादिव्यवस्थाम् एका नगरस्थिता संस्था अकरोत्। एकदा संस्थाधिकारिणः छात्रेभ्यः एकं वैद्यं प्रेषितवन्तः। सः त्रीन् मासान् तत्र अवसत्। किन्तु कोऽपि रुग्णः तस्य समीपे चिकित्सायै न आगच्छत्। वैद्यराजः प्रधानाचार्यम् अपृच्छत् – किम् अत्र कोऽपि रोगी न भवति? प्रधानाचार्यः विहस्य अवदत् – वैद्यराज! अस्य एकं रहस्यम् अस्ति। अत्र सर्वे तदा भोजनं कुर्वन्ति, यदा ते तीव्रक्षुधाम् अनुभवन्ति। यदा तेषां भोजनेन तृप्तिः भवति, ततः पूर्वम् एव ते भोजनं त्यजन्ति। एतत् एव एतेषां स्वास्थ्यस्य रहस्यम्। भवान् जानाति एव यत् स्वस्थाः नराः औषधं न सेवन्ते। तद्वचनं श्रुत्वा वैद्यः हसित्वा अवदत् अत्र मम उपयोगः न अस्ति। अहं गच्छामि। नमस्कारः। यत्र रोगः तत्र वैद्यः।

**अ. एकपदेन उत्तरत –**

(क) गुरुकुलं कस्मिन् प्रदेशे आसीत्?

(ख) कीदृशाः नराः औषधं न सेवन्ते?

(ग) वैद्यः कियतः मासान् गुरुकुले अवसत्?

(घ) कति सङ्ख्याकाः छात्राः गुरुकुले पठन्ति स्म?

**आ. पूर्णवाक्येन उत्तरत –**

(क) एकदा संस्थाधिकारिणः किं कृतवन्तः?

(ख) छात्राणां स्वास्थ्यस्य किं रहस्यम् अस्ति?

(ग) वैद्यः हसित्वा किम् अवदत्?

(घ) छात्राणां भोजनादिव्यवस्थां का अकरोत्?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं उत्तरत –**

(क) 'विहस्य' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

(ख) 'सः त्रीन् मासान् तत्र अवसत्।' वाक्येऽस्मिन् विशेषणपदं किम्?

(ग) 'रुग्णाः' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत।

(घ) 'आगच्छत्' इति क्रियापदस्य कर्तृपदं गद्यांशे किं प्रयुक्तम्?

6. एकदा कश्चिच् नरः आखेटाय अगच्छत्। सः सर्वं दिनं वने अभ्रमत्, किन्तु कमपि पशुं न अपश्यत्। सायङ्काले यदा सः आखेटकः स्वगृहं प्रति आगच्छति स्म तदा एकां पुत्रसहितां हरिणीम् अपश्यत्। सः नरः अश्वेन तस्या अनुसरणम् अकरोत्। किन्तु सा मृगी कुत्रचित् अदृश्या अभवत्। ततः सः तस्याः शावकं गृहीत्वा अश्वस्य पृष्ठे बद्धवान्। अश्वम् आरुह्य सः नरः किञ्चिद् दूरं गत्वा अपश्यत् यत् पुत्रस्नेहव्याकुला सा मृगी अपि पुत्रम् अनुसरति स्म। एतद् दृष्ट्वा तस्य मनसि करुणा उत्पन्ना अभवत्। करुणार्द्रहृदयः सः अचिन्तयत् – एषा हरिणी स्वप्राणमोहं त्यक्त्वा पुत्रं रक्षितुम् इच्छति। अहो! एतां निराशां न करिष्यामि इति विचार्य सः मृगीशावकम् अमुञ्चत्। हरिणी प्रसन्ना अभवत्। तस्याः नयनयोः कृतज्ञताभावः आसीत्। एतद् विलोक्य सः परमम् आनन्दं प्राप्तवान्।

**अ. एकपदेन उत्तरत –**

(क) स्वशावकं प्राप्त हरिण्याः नयनयोः कः भावः आसीत्?

(ख) आखेटकः कदा स्वगृहं प्रति आगच्छति?

(ग) का स्वप्राणमोहं त्यक्तवा पुत्रं रक्षितुम् इच्छति?

(घ) नरः केन हरिण्याः अनुसरणम् अकरोत्?

**आ. पूर्णवाक्येन उत्तरत –**

(क) पुत्रस्नेहव्याकुला मृगी किं करोति स्म?

(ख) नरः मृगीशावकं गृहीत्वा किम् अकरोत्?

(ग) करुणार्द्रहृदयः सः आखेटकः किम् अचिन्तयत्?

(घ) आखेटकः किं विलोक्य परमम् आनन्दं प्राप्तवान्?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं समुचितमुत्तरं विकलपेभ्य चिनुत –**

(क) 'पुत्रस्नेहव्याकुला सा मृगी अपि पुत्रम् अनुसरति स्म।' वाक्येस्मिन् कर्तृपदं किं प्रयुक्तम्?

(ख) 'एकां पुत्रसहितां हरिणीम् अपश्यत्।' वाक्येऽस्मिन् विशेष्यपदं किमस्ति?

(ग) 'प्रातःकाले' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत्?

(घ) 'सः नरः अश्वेन तस्याः अनुसरणम् अकरोत्।' इति कर्तृपदस्य क्रियापदं किमस्ति?

7. वैज्ञानिकाः सञ्चारसाधनेषु प्रतिदिनं नवीनतमान् आविष्कारान् कुर्वन्ति येन सन्देशप्रेषणे अधिकतमा सुविधा स्यात्। चलभाषित्रयन्त्रम् (मोबाइल) तादृशम् एव लोकप्रियं यन्त्रम्। बालाः, वृद्धाः, युवकाः, पुरुषाः, महिलाः, नागरिकाः, ग्रामीणाः वा, सर्वेषाम् एव एतत् कर्णभूषणं जातम्। यानानि आरूढाः, कार्यालयेषु कार्यं कुर्वन्तः, मार्गेषु चलन्तः, सभागारेषु प्रवचनं शृण्वन्तः जनाः अस्य ध्वनिं श्रुत्वा वार्तामग्नाः भवन्ति। अविवेकपूर्णः अस्य प्रयोगः कार्येषु व्यवधानं करोति। मार्गेषु दुर्घटनाः भवन्ति। सभागारेषु, कक्षासु, अन्यसभासु वा अव्यवस्था भवति। सत्यम् अस्ति यत् आविष्कारः कदापि हानिकरः न, परन्तु तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति। वस्तुतः वयं यन्त्रस्य अधीनाः न स्याम अपितु यन्त्रम् अस्माकम् अधीनं स्यात्। ते एव बुद्धिमन्तः ये विज्ञानस्य सदुपयोगं कुर्वन्ति।

**अ. एकपदेन उत्तरत –**

(क) वर्तमानकाले किं लोकप्रियं सञ्चारसाधनम् अस्ति?

(ख) यन्त्रस्य दुष्प्रयोगेण कस्य शान्तिः नश्यति?

(ग) यन्त्रस्य कीदृशः प्रयोगः कार्येषु व्यवधानं करोति?

(घ) वयं कस्य अधीनाः न स्याम?

**आ. पूर्णवाक्येन उत्तरत –**

(क) के खलु बुद्धिमन्तः सन्ति?

(ख) चलभाषियन्त्रस्य ध्वनिना कक्षासु किं भवति?

(ग) वैज्ञानिकाः सञ्चारसाधनेषु किमर्थं नवीनतमान् अविष्कारान् कुर्वन्ति?

(घ) चलभाषित्रयन्त्रं कीदृशं साधनम् अस्ति?

**इ. गद्यांशस्य समुचितं शीर्षकं लिखत।**

**ई. यथानिर्देशं उत्तरत –**

(क) 'सन्देशप्रेषणे अधिकतमा सुविधा स्यात्।' अत्र किं विशेषणपदं प्रयुक्तम्?

(ख) 'तस्य दुष्प्रयोगेण जीवनस्य शान्तिः नश्यति।' अत्र कर्तृपदं किं प्रयुक्तम्?

(ग) 'आकर्ण्य' इति अर्थे गद्यांशे किं पदं प्रयुक्तम्?

(घ) 'व्यवस्था' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

*इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।*
*एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥*

एक ही सत्यरूप परमेश्वर का विद्वज्जन विविध प्रकार से वर्णन करते हैं। उसी को (ऐश्वर्य सम्पन्न होने पर) इन्द्र, (हितकारी होने से) मित्र, (श्रेष्ठ होने से) वरुण तथा (प्रकाशक होने से) अग्नि कहा गया है। वास्तव में, वह (परमात्मा) सुपर्ण तथा गरुत्मान् (एक) है ॥

ऋग्वेद 1.164.46


केन्द्रीय माध्यमिक शिक्षा बोर्ड
भारत
असतो मा सद्गमय

**Central Board of Secondary Education**

Shiksha Sadan, 17, Rouse Avenue, Institutional Area, Opposite Bal Bhawan, New Delhi-110002